श्रीहरिः

**महाराजासयाजिरावविश्वविद्यालयान्तर्गतस्य**

**वटोदरसंस्कृतमहाविद्यालयस्य**

**वाचस्पत्युपाधये (Ph.D) स्वीकृतस्य शीर्षकस्य**

# “रामायणे धर्मतत्त्वविमर्शः”

( इत्यस्य )

# “RAMAYANE DHARMATATTVAVIMARSHAH”

**( A THESIS SUBMITTED TO**

**THE MAHARAJA SAYAJIRAO UNIVERSITY OF BARODA**

**FOR THE DEGREE OF**

**VACHASPATI (Ph.D.)**

**(FACULTY OF ARTS)**

**शोधप्रबन्धः**


**निर्देशकः** | **शोधकर्ता**

**डॉ. श्रीरामपाल शुक्ला** | **जतीन पुरखा**

**व.प्राध्यापकः,** | **‘हरसिद्धि’**
**वटोदरसंस्कृतमहाविद्यालयः,** | **डीफेन्स कॉलोनी ,**

**म.स.विश्वविद्यालयः,वटोदरम्** | **जामनगरम्**


**DECEMBER-2013**

# ॥ उद्घोषणापत्रम् ॥

मया प्रमाणीक्रियते यत् “ **रामायणे धर्मतत्त्वविमर्शः** ” इत्याख्यः शोधनिबन्धो व्याकरणविभागे वरिष्ठप्राध्यापकपदालङ्कृतानां डॉ. श्री रामपाल शुक्लमहोदयानां निर्देशने यथानियमं निष्पादितः । इतः पूर्वं शोधनिबन्धस्य कुत्राप्यंशतः न वा पूर्णतो केनापि प्रस्तुतिर्विहिता । शोधकार्यमिदं मया सर्वथा मौलिकत्वेन सम्पादितमिति ।

अनुसन्धाता

(जतीन पुरखा)

# ॥ निर्देशकप्रमाणपत्रम् ॥

प्रमाणीक्रियते यत् श्री जतीन पुरखा “**रामायणे धर्मतत्त्वविमर्शः**” इति विषयमादाय मदीये निर्देशने वाचस्पति (Ph.D) रित्युपाधये शोधप्रबन्धमलिखत्तन्मौलिकत्वेनैव, नान्यथा । शोधप्रबन्धेऽस्मिन् शोधकर्त्रा मम मार्गदर्शनानुसारेणैव कार्यं निष्पादितम् ।

अतो विश्वविद्यालयनियमानुसारं वाचस्पतिरित्युपाध्यवाप्तये शोधनिबन्धं परीक्षणार्थं प्रस्तौमि ।

निर्देशकः

डॉ.श्री रामपाल शुक्लः

व.प्राध्यापकः

वटोदरसंस्कृतमहाविद्यालयः

म.स.विश्वविद्यालयः,वटोदरम्

# ॥ पूर्वोद्भासः ॥

विश्वेस्मिन् सकलमनुजानामशेषफललब्धिकारणन्तु धर्मा–र्थकाममोक्षमेव वरीवर्ति । तत्र प्रथमपुरुषार्थेन एव अवशिष्टत्रयाणां सिद्धिः सम्पादनीया । अतो नूनं प्रथमपुरुषार्थः प्राधान्यमावहते । हिन्दुसंस्कृतौ धर्मतत्त्वं मूलाधाररुपेण विद्यते । तत्र 'वेदा एव प्रमाणमि'ति धिषणया तद्गतप्रामाण्यमेव महर्षिभिरुररीकृतम् । वेदानाम् जनसाधारणबोधाविषयत्वात् ब्राह्मणाऽऽरण्यक–श्रुति–स्मृतिपुराणग्रन्थाः प्रणिनिन्युः महर्षयः । तथैव सामान्यजनज्ञानाय लोककथोपनिबद्धं रामायणमहाभारतं संरचयामासुः । अतः रामायणं धर्मतत्त्वं विनिश्चितुं प्रधानसाधनं लोकानाम् ।

यथा अधिरत्नाकरे संसारस्य कोटिपरिमितरत्नान्वेषकाः प्रयतामासुः केचन च फलसिद्धिं प्रापुः । तथापि अधुना रहस्यमयसमुद्रः सर्वान् आमन्त्रयति । तथा रामायणे अपि अनेकधर्मतत्त्वबोद्धृभिः समालोचकैश्च धर्मतत्त्वमादाय विषयावगाहनमकारि । किन्तु विषयबाहुल्यात् अधुनाऽपि अवकाशो वर्तते इति विचिन्त्य **"मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः"** इति कालिदासपदमुरीकृत्य **"रामायणे धर्मतत्त्वविमर्शः"** इत्याख्या शोधचिकिर्षा कार्यशरीरे प्रस्थापयितुं प्रारब्धा।

षडध्यायात्मकोऽयं शोधप्रबन्धः यथाविधि सोपानबद्ध उपनिबद्धः । विषयादौ संस्कृतवाङ्मये वाल्मीकिरामायणस्य किं महत्त्वमिति जिज्ञासोदेति चेद् यावद् महत्त्वं संस्कृतवाङ्मये वेदादीनां वरीवर्तते तावदेव महत्त्वं रामायणस्य प्रायोगिकोपदेशपरत्वात् ।

तत्रभवान् महर्षिः प्रोवाच–

**“यावत् स्थास्यन्ति गिरयः सरितश्च महीतले ।**

**तावद् रामायणकथा लोकेषु प्रचरिष्यति ॥[१]”**

चतुर्विधपुरुषार्थप्राधान्याद् आदिकालतः लोकादृतमिदम्महाकाव्यम् । यथार्थमेव भणितिः स्कन्दपुराणे–

**“धर्मार्थकाममोक्षाणां साधनं च द्विजोत्तमाः।**

**श्रोतव्यं च सदा भक्त्या रामायणपरामृतम् ॥[२]”**

ग्रन्थगतविषयविवेचनं द्वारीकृत्य शोधप्रबन्धप्रवर्धनमावश्यकम् । विषय–बाहुल्याद् अत्र प्राधान्यं भजमानानां दिङ्मात्रेण निर्देशो दर्शितः । यथा–रामायणगतधर्मस्वरुपम्–मोक्षतत्त्वम्–दैवपुरुषवादौ–विज्ञानतत्त्वम्–यथार्थवादादर्श–वादौ–ईश्वरजीवप्रकृतिस्वरुपम्–दर्शनिकोयोगिजीवनसन्देशप्रभृतयः । विषयाङ्गतया च ग्रन्थकर्तृकृत्योरितिवृत्तोद्भवौ प्रपञ्चितौ । अधिरामायणं धर्मतत्त्वान्वेषणावसरे प्रसङ्गसङ्गत्या अन्यतत्त्वानाम्मर्षणमपि स्थानमपेक्षत इति धिया “ऋषिसहस्रदक्षिणे”ति भाष्योक्तन्यायेनादौ ग्रन्थगतकाव्यतत्त्व–व्याकरणतत्त्व–दार्शनिकतत्त्वप्रभृतीनां वर्णनमुपन्यस्तम् । तथा च शोधविषयमभिलक्ष्य धर्मतत्त्वविमर्शस्य बीजवपनमप्यकारि ।

शोधप्रबन्धस्यास्य शीर्षकघटकधर्मशब्दस्य कार्त्स्न्येन स्वरुपविवरणमति–दुष्करम् । उक्तञ्च–

---

[१]. वाल्मीकिरामयणम् १/२/३६

[२]. स्कन्दपुराणम् (उत्तरखण्डः १/२४)

**"सूक्ष्मा गतिर्हि धर्मस्य बहुशाखाह्यनन्तिका ।[१]"**

एतद्भावमेव द्विर्बद्धं कृतं श्रीमद्भगवद्गीतायाम्–**"धर्मस्य तत्त्वं निहितं गुहायाम्"**। धर्मशब्दस्य परिभाषा भेदोपभेदवर्णनन्नूनं सहायकृद्भवति धर्मतत्त्वावबोधाय । तत्र वर्णधर्मऽऽ–श्रमधर्मप्रभृतीनां प्रकीर्णधर्माणाञ्च विशदतया विवरणं निश्चप्रचं शोधशीर्षकं सरलीकरोति । विश्वेस्मिन् विश्वे धर्मस्य विविधस्वरुपेषु सर्वानुगता धर्मव्याख्या का ? इति प्रश्नजिज्ञासायां सर्वथा मौलिकतां भजमानः शोधांशः प्रबन्धमिदमलङ्करिष्यत इत्याशाषे ।

तत्रभवान् मुनिप्राचेतसः रामायणनिष्ठधर्मतत्त्वविमर्शेण सह वेदेषु–श्रुति–स्मृति–पुराणेतिहासप्रभृतिषु च धर्मतत्त्वं तत्स्वरुपं विविधभेदविवरणञ्च शोधप्रयत्नमुपकुरुते ।

धर्मशब्दः क्रियापरत्वाद् व्यापारप्रदेशमपेक्षते । अतः धर्मस्य विविधक्षेत्रेषु–कर्मविषयको धर्मः, क्रियापरको धर्मः, सामाजिको धर्मः, समसामायिको धर्मः उपनिबद्धः । उक्तञ्च–

**"लोकयात्रार्थमेवेह धर्मप्रवचनं कृतम् ।**

**अहिंसासाधुहिंसेति श्रेयान् धर्मपरिग्रहः ॥**(महाभारतम्)

अपरञ्च देवीभागवतेऽपि निगदितम्–

**"ग्रामधर्मा जातिधर्मा देशधर्माः कुलोद्भवाः ।**

---

[१]. वेदव्यास (महाभारतम्, वनपर्व, २०९/२)

**परिग्राह्या नृभिः सर्वै नैव तांल्लंघयेन्मुनेः ॥[१]"**

क्रिया–कर्म–सामाजिक–समसामायिकधर्माणां समालोचनेन धर्मार्थस्य परिधिः सुविस्तृता सुस्पष्टा च भवति । अधुना सकलशास्त्रगतधर्मस्वरुपं लाघवविस्तारेण वा परिचर्च्य प्राप्तावसरे धर्मस्वरुपस्य विशदवर्णनं करिष्ये । ऐहिकपारलौकिकतत्त्वानां सारं धर्म एव वरीवर्तते । महर्षिवाल्मीकिः प्राह–

**"धर्मादर्थः प्रभवति धर्मात् प्रभवते सुखम् ।**

**धर्मेण लभते सर्वं धर्मसारमिदं जगत् ॥[२]"**

अपि च जगाद–

**"धारणाद् धर्ममित्याहुर्धर्मेण विधृताः प्रजाः ।**

**यः स्यात् धारणसंयुक्तः स धर्म इति निश्चयः ॥[३]"**

धर्मविषये वैमत्यं यथा अधुना वर्तते तथा पूर्वकालेऽपि आसीत् । विषयेऽस्मिन् महर्षिवाल्मीकिना प्रदत्तः सङ्केतः विवादे दोषशमनहेतुः भवितुमर्हति, तेषां रहस्यमूलः श्लोको वर्तते यत्–

**"श्रुतिधर्म इति ह्येके नेत्याहुरपरे जनाः ।**

**न च तत्प्रत्यसूयमानो न हि सर्वं विधीयते ॥[१]"**

---

१. देवीभागवतम् ११/१/१७

२. वाल्मीकिरामायणम् ३/९/३०

३. महाभारतम् शान्ति० १०९/११

प्रबन्धेऽस्मिन् यथाशक्ति वर्णितधर्मसन्दर्भा अपि ग्रथिताः सन्ति । प्रान्ते वेदरामायणयोः धर्मतत्त्वे **"श्रुतिधर्म इति ह्येके....।"** इति श्लोकेन वेदगतसकलधर्मरहस्यस्य विधानराहित्यं सूचितम् । अनेन धर्मविषये महर्षिणा लोकव्यवहारनिर्वाणाय अन्यग्रन्थानाम् उपयोगिता प्रतिपादिता ।

अत्र प्रबन्धेऽस्मिन् यथाप्रयत्नं यथामति रामायणस्वरुपसमुद्रात् धर्मतत्त्वविमर्शणात्मकचिन्तनरत्नं भवतां पुरस्ताद् प्रस्तौतुं भृशमानान्दमनुभवामि ।

पूर्वोद्भासस्य समाप्तितः पूर्वमुपकर्तॄणां स्मरणं परमावश्यकम् । यतो हि अस्माकम् आर्यसंस्कृतौ अचेतनपदार्थस्यापि ऋणं प्रति धन्यवादान् प्रयच्छामः; तर्हि चेतनस्य तु का कथा ? महाकविभासस्य भणिति अवसरेऽस्मिन् प्रेरिका एव–

**"तिर्यग्योनयोऽप्युपकृतमवगच्छन्ति ।[२]"**

तत्र प्रथमं काशीस्थानां राष्ट्रपतिपुरस्कृतानां पाण्डित्यपरम्परासंवाहकानाम् अभिनवपाणिनिसदृशाणाञ्च पू.श्रीरामयत्न शुक्लमहाभागानाम् स्मरणं वन्दनं च व्याहरामि । येषां स्मरणमात्रेणैव काश्यारुदात्तपाण्डित्यपरम्परा स्मृतिपथे आयाति । मम बालसखा तथा प्राध्यापश्च योगेश त्रिवेदीमहोदयस्य कार्तज्ञ्यं बिभर्मि । येन सर्वदा ज्येष्ठभ्रातृवत् स्थाने– स्थाने परामर्शः प्रदत्तः । एतस्मिनवसरे पारुल आयुर्वेद महाविद्यालस्य प्राचार्या डॉ.लीना शुक्ला भगीनीनां विशेषाभारः । याः सर्वदा सहाय्यमकुर्वन् । तत्रत्येव डॉ.सतीष तथा डॉ.अमीतमहोदयौ

---

[१]. महा०शान्तिपर्व १०९/१३

[२]. स्वप्नवासवदत्ता ६/१८

विशेषधन्यवादार्हौ । एताभ्यां सङ्गणककार्ये सहायता प्रदत्ता । पित्रोश्च आशीर्वादास्तु सन्त्येव । शोधकार्येऽस्मिन् उत्साहवर्धनाय प्रेरणाप्रदात्र्याः मम धर्मपत्न्या अपि सहायता वरीवर्तते, यया गृहभारात् विमुक्तिः प्रदत्ता ।

एतेषाम् उपरिस्थानां कार्तज्ञ्यं ज्ञापितवान् परन्तु सदैव छात्राऽनुकूल्यमेव स्वानुकूल्यं मन्यमानानां संस्कृतानुकूलसंस्कृतिसंवाहकानां मम शोधकार्य–निर्देशकानां प.पू.डॉ.रामपाल शुक्लागुरुचरणानां नाऽक्षरैः शब्दैर्नवाऽन्यप्रकारैश्च कृतज्ञतां ज्ञापयितुं शक्नोमि । एतैः पदे–पदे च दिशानिर्देशः कृतः । एतेषां चिरजीवनाय प्रार्थनां करोमि । येन देववाण्याः संस्कृतेश्च संवर्धनं भवेत् ।

अन्ते च कायधर्मत्वात् शोधप्रबन्धेऽस्मिन् ये केचन दोषाः स्युस्ते क्षन्तव्याः सूचनीयाश्च ।

**गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।**

**हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥**

**विद्वच्चरणचञ्चरीकः**

**(जतीन पुरखा)**

# विषयानुक्रमः

(१) प्रथमोऽध्यायः (परिचयात्मकः)

१.१. संस्कृतवाङ्मये वाल्मीकिरामायणस्य महत्त्वम् ।

१.२. रामायणे वर्णितविषयाः ।

१.३. रामायणस्य कर्ता–उद्भवः–स्वरुपञ्च ।

(२) द्वितीयोऽध्यायः (तत्त्वविमर्शात्मकः)

२.१. वाल्मीकिरामायणे वर्णिततत्त्वानि ।

२.२. वाल्मीकिरामायणे वर्णितकाव्यतत्त्वम् ।

२.३. वाल्मीकिरामायणे वर्णितदार्शनिकतत्त्वम् ।

२.४. वाल्मीकिरामायणे वर्णितधर्मतत्त्वम् ।

(३) तृतीयोऽध्यायः (धर्मेतिहासवर्णनात्मकः)

३.१. धर्मशब्दस्य अभिप्रायः ।

३.२. धर्मस्य परिभाषा ।

३.३. धर्मस्य भेदोपभेदाः (वर्णधर्म–आश्रमधर्म–अन्यधर्माः)

३.४. धर्मस्य विविधस्वरुपाणि ।

(४) चतुर्थोऽध्यायः (धर्मतत्त्वविमर्शः)

४.१. वेदेषु धर्मतत्त्वम् ।

४.२. वेदोत्तरकाले धर्मस्य स्थितिः ।

४.३. स्मृतिग्रन्थेषु धर्मतत्त्वं, तत्स्वरुपञ्च ।

४.४. महापुराणेषु धर्मतत्त्वं, तत्स्वरुपं,विविधभेदाश्च ।

(५) पञ्चमोऽध्यायः (धर्ममीमांसात्मकः)

५.१. धर्मस्य विविधक्षेत्राणि ।

५.२. कर्मविषयको धर्मः ।

५.३. क्रियापरको धर्मः ।

५.४. सामाजिको धर्मः ।

५.५. समसामायिको धर्मः ।

एतेषां तुलनात्मकम् अध्ययनम् ।

(६) षष्ठोऽध्यायः (रामायणे धर्मतत्त्वाऽध्ययनात्मकः )

६.१. रामायणे धर्मस्वरुपम् ।

(क) वाल्मीकेः धर्मविषयिकी अवधारणा ।

(ख) रामायणे वर्णितधर्मसन्दर्भाः । (काण्डक्रमानुसारेण)

६.२. रामायणस्य धर्मतुलना ।

(क) वेदरामायणयोः धर्मः ।

(ख) स्मृतिरामायणयोः धर्मः ।

उपसंहारम्

परिशिष्टम्

सन्दर्भग्रन्थसूची

# सङ्केताक्षरसूची

| क्रमः | ग्रन्थसंकेतः | ग्रन्थनामानि |
|---|---|---|
| १ | वा०रा० | वाल्मीकियरामायणम् |
| २ | वा०वि | वाल्मीकिविमर्शः |
| ३ | रामा०मि० | रामायणमिमांसा |
| ४ | अष्टा०पु०प० | अष्टादशपुराणपरिचयः |
| ५ | सं०साहि० | संस्कृतसाहित्येतिहासः |
| ६ | श्रीमद्भाग० | श्रीमद्भागवत् महापुराणम् |
| ७ | सं०सा०वि० | संस्कृतसाहित्यविमर्शः |
| ८ | सा०द० | साहित्यदर्पणः |
| ९ | सं०वा०रा० | संक्षिप्तवाल्मीकिरामायणांकः |
| १० | रामा०का०सं० | रामायणकालीनसंस्कृति |
| ११ | वा०रामा०दार्श०वि० | वाल्मीकिरामायणका दार्शनिक विवेचन |
| १२ | राम०क० | रामकथा |
| १३ | सं०रामा० | संक्षेपरामायणम् |
| १४ | वा०के रा० | वाल्मीकि के राम |
| १५ | धर्मशा० का इति० | धर्मशास्त्र का इतिहास |
| १६ | सं०साहि०का इति० | संस्कृतसाहित्य का इतिहास |
| १७ | धर्मशा० | धर्मशास्त्रांक |
| १८ | पु०वि० | पुराणविमर्शः |
| १९ | वै०सं०का वि० | वैदिकसंस्कृति का विकास |
| २० | हि०ध०को० | हिन्दूधर्मकोश |
| २१ | ध०यु० | धर्मयुग |
| २२ | गौ०ध० | गौतमधर्मसूत्र |
| २३ | आ०ध० | आपस्तम्बधर्मसूत्र |
| २४ | व०ध० | वशिष्ठधर्मसूत्र |
| २५ | हा०ध० | हारीतधर्मसूत्र |
| २६ | बौ०ध० | बौधायनधर्मसूत्र |

| | | |
|---|---|---|
| २७ | सत्या०प्र० | सत्यार्थप्रकाश |
| २८ | मनु० | मनुस्मृति |
| २९ | याज्ञ० | याज्ञवल्क्यस्मृति |
| ३० | व्या० | व्यासस्मृति |
| ३१ | विष्णु० | विष्णुस्मृति |
| ३२ | आप० | आपस्तम्बस्मृति |
| ३३ | वशि० | वशिष्ठस्मृति |
| ३४ | परा० | पराशरस्मृति |
| ३५ | अत्रि० | अत्रिस्मृति |
| ३६ | शंख० | शंखस्मृति |
| ३७ | दक्ष० | दक्षस्मृति |
| ३८ | शाता० | शातातपस्मृति |
| ३९ | यम० | यमस्मृति |
| ४० | योग० | योगसूत्रम् |
| ४१ | श्वेता० | श्वेताश्वेतरोपनिषद् |
| ४२ | माण्डू० | माण्डूक्योपनिषद् |
| ४३ | तैति० | तैतिरीय उपनिषद् |
| ४४ | कठ० | कठोपनिषद् |
| ४५ | च०स० | चरकसंहिता |

# प्रथमोऽध्यायः

# (परिचयात्मकः)

१.१. संस्कृतवाङ्मये वाल्मीकिरामायणस्य महत्त्वम् । २–१९
१.२. रामायणे वर्णितविषयाः । २०–२५
१.३. रामायणस्य कर्ता, उद्भवः, स्वरूपञ्च । २६–४३

# (प्रथमोऽध्यायः)
# १.१. “संस्कृतवाङ्मये वाल्मीकिरामायणस्य महत्त्वम्”

### (प्रथमं संस्कृतवाङ्मयस्य परिचयः)

संस्कृतभाषा देवभाषा कथ्यते। संस्कृतभाषायां मानवसंस्कृतेरितिहासः सुरक्षितोऽस्ति। इयं संस्कृतभाषा सर्वाभ्यः भाषाभ्यः प्रकारे विस्तारे च महती, सौन्दर्ये विचारपवित्रतायां चान्यूना विद्यते। सत्यपि मन्दतमे विकासक्रमे क्रमोपनते च बाधासमुदये इतिहासारम्भसमयत एव् संस्कृतभाषा विश्वस्यान्यासां भाषाणां समतां कुर्वती समायाति। अन्याभिर्विश्वस्य भाषाभिरस्याः प्रतिस्पर्धा गुणगणकृतैव।भारते विविधानि सामाजिकपरिवर्तनानि, धार्मिकपतनोत्थानानि, वैदेशिकाक्रमणानि च अजायन्त तथापि संस्कृतं सर्वत्र सर्वदा समभावेन व्यवहारजगत्यवर्तत।"संस्कृतम्" इति पदं ‘सम्’ उपसर्गपूर्वकात् ‘कृ’धातुना ‘क्त’ प्रत्ययं योजयित्वा निर्माति सम्+कृ+क्त इति कृत्वा व्युत्पादितम्। भाषारुपार्थेऽस्य शब्दप्रयोगः प्रथमतो वाल्मीकिरामायणे एव प्राप्यते-

यदि वाचं प्रदास्यामि द्विजातिरेव संस्कृताम् ।[1]
रावणं मन्यमाना मां सीता भीता भविष्यति॥

संस्कृतभाषाया रुपद्वयम्, लौकिकं वैदिकञ्च। महाभारतकालात् पूर्वतनभाषा वैदिकभाषा, ततः प्रचारिता च लौकिकभाषा।

---

(१) वाल्मीकिरामायणम् (सुन्दरकाण्ड ५।१४)

# वेदाः

को नाम वेदः? का  परिभाषा ?

इत्यत्र विभिन्नैः आचार्यैः वेदस्य विभिन्नाः अर्थाः परिभाषाश्च कृता वर्तते

यथा - विद्यन्ते धर्मादयः पुरुषार्था यैस्ते वेदाः - (बृहत्प्रातिशाख्यम्)। [१]

अपौरुषेयं वाक्यं वेद - ( सायणाचार्यः) [२]

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।[३]**

**एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता॥**

(ऋग्वेद्भाष्यभूमिका)

संस्कृतसाहित्ये वेदानां स्थानं सर्वोपरि विद्यते। तद्यथा ऋग्यजुसामाथर्वणः। भारते धर्मव्यवस्था वेदायत्तेव। धर्मनिरुपणे वेदस्स्वतन्त्रभावेन प्रमाणम्, स्मृत्यादयस्तु तन्मूलकतया। श्रुतिस्मृत्योर्विरोधे श्रुतिरेव गरीयसी। वेदाः न केवलं धर्ममूलतयैव समादृताः अपि तु विश्वस्मिन् सर्वप्राचीनग्रन्थतयाऽपि। प्राचीनानि धर्मसमाज-व्यवहारप्रभृतीनि वस्तुजातानि बोधयितुं वेदा एव क्षमन्ते। प्रधानतया वेदो द्विविधः मन्त्ररुपो ब्राह्मणरुपश्च। मन्त्रसमुदाय एव संहिताशब्देन व्यवहृतः। ब्राह्मणरुपो वेदभागस्तु संहिताभागस्य व्याख्यारुपैव।

ब्राह्मणग्रन्थो त्रिधा विभक्तो भवति – ब्राह्मणम्-आरण्यकम्- उपनिषदश्च। यज्ञस्वरुपप्रतिपादको ब्राह्मणभागः। अरण्ये पठिताः यज्ञस्याध्यात्मिकं रुपम् विवेचयन्तो

वेदभागा आरण्यकानि। उपनिषदो ब्रह्मबोधिकाः मोक्षसाधनानि, अयमेव भागो वेदस्यान्तरुपतया वेदान्त इत्युच्यते। ब्राह्मणभागो गृहस्थानामुपयोगी, आरण्यकभागो वानप्रस्थमाश्रितानाम्, उपनिषद्भागश्च सन्यस्तानामुपयोगीत्यपि कथयितुं शक्यते।

## उपनिषत्परिचयः

वेदान्ता उपनिषद इत्यभिधीयन्ते। उपनिषच्छब्दस्य रहस्यमर्थो भवति, अध्यात्मविद्यारहस्यप्रतिपादका वेदभागा उपनिषदः कथ्यन्ते। उपनिषदां संख्या १०८ कथिता। तासु दशोपनिषदः प्रसिद्धाः-ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तैतिरीय-ऐतरेय-छान्दोग्य-बृहदारण्यकोपनिषदः। उपनिषदो भारतीयाध्यात्मिकविद्याया ज्वलन्ति रत्नानि। महर्षयो यानि आध्यात्मिकतत्त्वानि ज्ञानदृशा साक्षाद् अकुर्वन् तानि सर्वाणि तत्त्वानि उपनिषत्सु वर्णितानि सन्ति।

## वेदाङ्गानि

वेदस्य षड् अङ्गानि, यथोक्तम् पणिनिना स्वशिक्षायाम् -

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥**
**शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥**[1]

(१) पाणिनीयशिक्षा -४१/४२

# शिक्षा

शिक्षा नाम तच्छास्त्रं येन वेदमन्त्राणामुच्चारणं शुद्धं सम्पाद्येत। वेदे स्वरस्य प्राधान्यं सर्वविदितम्, स्वरज्ञानं च शिक्षाऽऽयत्तम्, अत एवेदं शिक्षाशास्त्रं वेदाङ्गम्।

# छन्दः

मन्त्राणां छ्न्दोवद्धतया छन्दसां ज्ञानं विना वेदमन्त्राः साधु उच्चारयितुं न शक्यते, अतश्छन्दोऽपि वेदाङ्गमवश्यं ज्ञेयम्।

# कल्पः

ब्राह्मणकाले यागस्य तावान् प्रचारो जातो यत्तेषां यथावज्ज्ञानाय पूर्णपरिचयप्रदायकग्रन्थानामावश्यक्ताऽनुभूयते स्म। तामेवावश्यक्तां स्वल्पशब्दैः पूरयितुं कल्पसूत्राणि विरचितानि। कल्पसूत्राणि द्विविधानि श्रौतसूत्राणि स्मार्तसूत्राणि च। श्रुतियुक्त यागविधिप्रकाशकानि श्रौतसूत्राणि। स्मार्तसूत्राण्यपि द्विधा-गृह्यसूत्राणि धर्मसूत्राणि च।

# निरुक्तम्

निरुच्यते निःशेषेणोपदिश्यते निर्वचनतया तत्तदर्थबोधनाय पदजातं यत्र तन्निरुक्तम्। निर्वचनमुखेन पदानामर्थावगमो यद्यपि व्याकरणेनापि सिद्ध्यति तथापि निरुक्तानुसारेणैव अर्था निर्वक्तव्या इत्यर्थं शास्त्रं पृथक् निर्मितम्। सम्प्रति उपलभ्यमानो ग्रन्थो यास्कस्य कृतिः।

---

१) संस्कृतसाहित्येतिहासः - आचार्य रामचन्द्र मिश्र

# व्याकरणम्

भाषया लौकिकव्यवहारः चाल्यते, यदि भाषा न स्यात्, इदञ्जगत् घनान्धकारे मज्जेत्, यथोक्तं दण्डिना-

इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् ।[१]
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥

भाषायाः शुद्धये व्याकरणावश्यकता भवत्येव। त्रिमुनिकल्पतरुकृतस्तु नव-व्याकरणानि स्मरन्ति-

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।[२]
सारस्वतं चापिशलं शाकलं पाणिनीयकम् ॥

सर्वेष्वपि व्याकरणेषु पाणिनीयव्याकरणस्य प्राधान्यमस्ति।

# ज्योतिषम्

इदं काल विज्ञापकं शास्त्रम्। मुहूर्तं विचार्य क्रियमाणा यज्ञादिक्रियाविशेषाः फलाय कल्पन्ते, नान्यथा, तन्मुहूर्तज्ञानञ्च ज्यौतिषायत्तम्तोऽस्य ज्यौतिषशास्त्रस्य वेदाङ्गमङ्गीकृतम्।

वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञा
तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद यज्ञान्॥[३]

---

(१) श्री दण्डिः (२) लघुत्रिमुनिकल्पतरुः (३) आर्चज्यौतिषम् -३६

# पुराणानि

पुराणानां महत्त्वं धार्मिकदृष्ट्याऽधिकमस्ति। वेदविहितधर्माणां सरलसुबोधवाण्यां वर्णनाय पुराणानि व्यरचयन् महर्षिर्वेदव्यासः।

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति॥[१]

पुराणानां नामानि तत्प्रमाणञ्च -

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।
अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते॥[२]

श्लोकोऽयं पुराणानां नामानि संगृह्णाति।

यथा – मत्स्यपुराणम् मार्कण्डेयपुराणम् भविष्यपुराणम् भागवत्पुराणम् ब्रह्माण्डपुराणम्
ब्राह्मपुराणम् ब्रह्मवैवर्तपुराणम् वामनपुराणम् वराहपुराणम् विष्णुपुराणम्
वायुपुराणम् अग्निपुराणम् नारदपुराणम् पद्मपुराणम् लिङ्गपुराणम् गरुडपुराणम्
कूर्मपुराणम् स्कन्दपुराणम् इत्यष्टादशत्वं सर्वविदिसिद्धम्।

---

(१) महाभारतम् (आदिपर्व)

(२) अग्निपुराणम्

# “वाल्मीकीय–रामायणम्”

संस्कृतसाहित्ये रामायणपदेन वाल्मीकिविरचितं रामायणमेव **प्रसिद्धम्**। भारतीयै रामायणमादिकाव्यं वाल्मीकिश्च तत्कर्तृतयाऽऽदिकविरभिधीयते। रामायणात् प्राचीनः संस्कृतभाषानिबद्धः काव्यलक्षणोपपन्नः कोऽपि ग्रन्थो न श्रूयते, दृश्यते इति कथैव का?

यद्यपि संस्कृतसाहित्यादिस्रोतसि भगवति वेद एव सर्वतः प्राक्कवि-काव्य-शब्दयोश्च समुल्लेखः समुपलभ्यते "कविर्मनीषी परिभूः स्वयम्भूः"इति , तथापि

वेदवेद्ये परे पुंसि जाते दशरथात्मजे।
वेदः प्राचेतसादासीत् साक्षाद् रामायणात्मना॥

इत्यनेनास्तिकानां चिरकालमतानुसारं वेदः यं परमात्मनं वर्णयति सो वेदवेद्यपरमपुरुषोत्तमदशरथनन्दनश्रीरामरुपेणावतीर्णस्तथा साक्षाद्वेदो हि प्रकटितो वाल्मीकिमुखाद् अत रामायणं वेदवद् प्रतिष्ठात्वमगमः। किं बहूना नात्र कस्यचित् सन्देहो यत् आदिकवि वाल्मिकिः सर्वज्ञ आसीत्, तस्य मुखात् निःसृतम् एकैकमक्षरं नालीकम्।

वस्तुतो वाल्मीकिना स्वामरवाण्यां अस्माकं पुरतः श्रीरामस्य तादृशं आदर्शमयं चरित्रं चित्रितमस्ति येन अस्मिन् कलिकाले जीवोऽपि अगम–भवार्णवं रामायणनौकया पारं यातुं शक्नोति । स्वयं श्रीमुख–वाण्या–

**सकृदेव प्रपन्नाय तवास्मीति च याचते ।**
**अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥**[१]

स ‘भूतभ्यो मे प्रतिज्ञाऽस्ति यत् यदि कोऽपि जीवः एकवारमपि मौखिकतया मम शरणमाव्रजति तर्हि अहं तस्मै जीवाय सदा–सर्वथा निर्भयत्वं प्रददामि ।’

---

१. श्रीमद्भगवद्गीता

*'आवृतिरसकृदुपदेशात्' इति वेदान्तसिद्धान्तानुसारं शरणागते आवृत्या आवश्यक्ता न भवति' | इत्थं भगवतः प्रतिज्ञा अन्यथा न भवति; कारणं ' रामो द्विर्नाभिभाषते '- रामो वारद्वयं न वदति । ग्रन्थोऽयं सार्ववर्णिकत्वेनापि महत्त्वं विदधाति यथा–*

***पठन् द्विजो वागृषभत्वमीयात्***
***स्यात् क्षत्रियो भूमिपतित्वमीयात् ।***
***वणिग्जनः पण्यफलत्वमीया–***
***ज्जनश्च शूद्रोऽपि महत्त्वमीयात् ॥[१]***

*अर्थात् इदं रामचरित्रं यदि ब्राह्मणः पठति तर्हि विद्वत्सु सर्वोच्चस्थानं प्राप्नोति । यदि क्षत्रियः पठति तर्हि राज्यं प्राप्नोति । यदि वैश्यः पठति तर्हि वाणिज्ये साफल्यं प्राप्नोति तथा शूद्रः स्ववर्गे उच्चासनं प्राप्नोति ।*

*वाल्मीकिमुनिरलौकिकतपसा परब्रह्मणोऽनुकम्पया च श्रुतीनां याथात्म्यं विज्ञाय तत्प्रचारावश्यकतामनुभूय सुबोधसरलसुरुचिपूर्णशैल्यां रामायणं व्यरचत् कारणं सामान्यजना अधिककालं गुरुगृहे स्थातुं वेदार्थञ्चावगन्तुं सब्रह्मचर्यं कठिनं परिश्रमं कर्तुं न*

---

*१. वा०रा०बा०१/९९*

प्रभवन्ति, अतः तादृग्जनेभ्यः आदिमहाकविमहर्षिवाल्मीकिः कमनीयकाव्यकलाज्ञानालङ्कृतं रामायणाख्यमतिमहनीयं महाकाव्यं जुगुम्फ।

संस्कृतसाहित्ये महर्षिवाल्मीकिकृतं रामायणम् "आदिकाव्यं" मन्यन्ते तथाऽदिकविर्वाल्मीकिरिति निःसंशयम्। कथा प्रसिद्धाऽस्ति यत् व्याघ्रबाणात्विक्षतक्रौञ्चाय विलपन्त्या क्रौञ्च्या करुणशब्दाः श्रुता ऋषिणा तदा अनायासं श्लोकमिदं निसृतम् –

**मा निषाद प्रतिष्ठात्वमगमः शाश्वतीः समाः।**
**यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥** (बाल०२/१५)

महर्षेः कल्याणमयीं वाणीं श्रुत्वा धाता समुपस्थितस्तत्र आज्ञापितश्च महर्षिः रामचरित्रं लेखनाय। रामायणस्य रचना अस्यैव प्रेरणाफलमस्ति। महर्षिवाल्मीकि अनुष्टुप्छन्दस्याविष्कारकः। उपनिषत्स्वप्यनुष्टुप् छन्दोऽस्ति किन्तु लौकिकसंस्कृते व्यवह्रियमाणस्य समाक्षरयुक्तस्य अनुष्टुप् छन्दस्य प्रथमप्रयोगस्तु वाल्मीकिना एव कृतः यत्र लघुगुरू सनियमौ सन्निविष्टौ।

आदिकविभगवतो वाल्मीकेः सरस्वती–निष्यन्दश्रीमद्रामायणं अखिलभूमण्डले आद्यकाव्यत्वेन विराजते। वेदानां वार्तास्तु भिन्ना, किन्तु लोके छन्द(पद्य)स्य निर्माणं तु प्रथमत्वेन वाल्मीकिना एव आरब्धम् । ऋषेः रचना तु आर्षरचना कथ्यते तथाऽपि "संहिता" पदं न अपितु "काव्यम्" इति पदं समलङ्कृतं रामायणेन। रसभावपूर्णता, मधुरता, चमत्कार–सारताऽऽदि ये ये गुणाः काव्यस्य उत्तमतायै आवश्यकाः भवन्ति ते सर्वेऽपि अस्मिन् महाकाव्ये विद्यमानाः।

काव्यरचनाया उत्तरोत्तरविकासपथे कालिदासादिकवीनां कृतिसु याः याः विशेषताः प्रकटिताः ताः सर्वाः अत्र सन्ति। वस्तुतः कविभिर्विकसिताः याः विशेषताः सन्ति तासां मूलस्रोतः इदम्महाकाव्यमेव, एतदेवास्य वैशिष्ट्यम्।

वाल्मीकिरामायणम् ऋषिणा रचितं तथाऽपि "संहिता" इति नोच्यते अपितु काव्यमुच्यते। संहितायां इतिहासस्य आख्यायिकायाः वंशादिकस्य च अनुकीर्तनं भवति, किन्तु अस्मिन् महाकाव्ये एकस्यैव नायकस्य चरीत्रं आद्योपान्तं तथा वर्णितमस्ति यस्य तुलना अस्मिन भूमण्डले अशक्यैव। अद्यत्वे आलोचकाः काव्यस्य परीक्षा चरीत्र–चित्रणेन कुर्वन्ति। अनया दृष्ट्या श्रीरामायणं काव्यमेव न, अपितु जगत आदर्शकाव्यमस्ति। अस्मिन महाकाव्ये यत् यत् चरीत्राणां वर्णनमस्ति, तत्सर्वम् स्वस्वस्थाने सर्वजनाय आदर्शं सञ्जातम्। महानायकभगवतः श्रीरामचन्द्रस्य चरीत्रं प्रजापालने, धर्ममर्यादायां, शासनव्यवस्थायां च कियत् आदर्शं परिगण्यते इत्यत्र विस्तारः नापेक्षते। ते स्वयं प्रजायै कथयति –

**स्नेहं दया च सौख्यं च यदि वा जानकीमपि ।**
**आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ॥**

'अहं लोकस्य प्रसन्नतायै न केवलं स्नेहदयासमस्तस्वसुखान्येव, अपितु स्वप्राणप्रियां जानकीमपि त्यक्तुं व्यथितो न भविष्यामि ।' इत्थं कथयितारः राजानः अस्मिन् संसारे कति? श्रीरामस्य अनेनैव आदर्शेन प्रभाविता प्रजा अपि कथयति–

**न हि तद्भविता राष्ट्रं यत्र रामो न भूपतिः ।**
**तद्वनं भविता राष्ट्रं यत्र रामो निवत्स्यति ॥**

*'यत्र रामः राजा नास्ति, तत् राष्ट्रं भवितुं नार्हति ; किञ्च तत् वनमपि राष्ट्रं भविता , यत्र राजा रामः निवासं करिष्यति ।'*

*श्रीरामायणस्य अपूर्वता न केवलं भारतखण्डे मन्यन्ते, अपितु कस्मिनपि भाषासाहित्ये रामकथायाः द्वितीयत्वं न दृश्यते। अस्यैव प्रभावः यत् समस्तजगति न कापि भाषा, यत्र रामकथायाः सम्पूर्णं वा अंशत अनुवादः न जातः स्यात्। अद्यत्वे 'वैश्विक–साहित्य' स्य चर्चा बहु श्रूयते। रामकथा हि वैश्विक–साहित्यमस्ति, यमधिकृत्य कवयः स्वकविताया आधारनिर्माणं कुर्वन्ति। कवीनां विषये उच्यते–*

***'पादोपजीवी पदकोपजीवी छायोपजीवी सकलोपजीव्यः।'***

*कश्चन कविः अन्यकवेः चरणमेकं , कश्चन पदमेकम् एवं कश्चन छायामेव स्वीकृत्य कविर्भवति; किञ्च एतादृशोऽपि कवि भवति यः 'सकलोपजिव्य' स्यात्, अर्थात् यस्य अर्थान् आधारीकृत्य समस्त कवयः स्व–स्वरचनाः सुशोभयन्ति। तादृशः 'सकलोपजिव्य' कवि अस्मिन् जगति महर्षिवाल्मीकी एव।*

*महतामन्वेषकाणामयं मतमिदं यत् रामकथाऽऽधारेण यावन्तः ग्रन्थाः निर्मिताः, तावन्तः अन्यकथानकऽधारेण न । अद्भुतरामायणं–अभिनन्दकीरामायणं–बालरामायणमादि नैकानि रामयणानि सन्ति। अपरम् अनर्घराघवः–प्रसन्नराघवः–उन्मत्तराघवः–उत्तररामचरित्रं–महावीरचरित्रं–रामायणचम्पू–रघुवंशमाद्यनेकानि दृश्यश्राव्यकाव्यानि निर्मितानि, तथा अधुनाऽपि 'रामायणी कथा'दि निर्मीयते। कस्यचित वैदेशिकसमालोचकस्य व्यङ्ग्यं यत् भारतीयकवयः रामातिरिक्तं नायकम् एव न पश्यन्ति । किन्तु स न जानाति यत् तस्योत्तरं पूर्वमेव प्रदत्तमस्ति–*

*स्वसूक्तीनां पात्रं रघुतिलकमेकं कलयतां*

*कवीनां को दोषः स तु गुणगणानामवगुणः ।*

*यदेतैर्निःशेषैरपरगुणलुब्धैरिव जग–*

*त्यसावेकश्चक्रे सततसुखसंवासवसति ॥*

*'अत्र को दोषः कवीनां यत् स्वसूक्तीसु विषयरुपेण ते केवलं कोसल–राजकुमारमेव स्थापयन्ति; दोषस्तु तेषां गुणगणानाम्, यैः एकस्मिनेव स्थाने परस्परं मेलनलोभात् केवलं श्रीराममेव स्वसुखनिवासस्थानं निर्मितम्।'*

*किञ्च ओजस्वी तथोदात्तजीवननिर्माणाय रामायणे ये केऽपि आदर्शाः प्रस्तुताः वाल्मीकिना ते न केवलं भारतवर्षे एव मान्याः वाऽदरणिया, अपि तु समग्रविश्वस्य मानवसमाजाय प्रेरणादायकाश्च सन्ति। रामायणं महाकाव्यं शाश्वतवादस्य उज्वलमुदाहरणमस्ति । आसंसारे रामायणमेव धार्मिकं लोकभोग्यं महाकाव्यमस्ति। किञ्च सनातनधर्मस्य सर्वचरित्रग्रन्थेषु प्रधानतया रामायणमेव।*

*संसारे किमपि काव्यं लोकप्रियतायां रामायणस्य समतां कर्तुं न क्षमते, अत एव चास्य संस्कृतवाङ्मये सर्वाधिकमहत्त्वमस्ति। निर्माणकालादेव खल्वेतद् रामायणं काव्यरुपकादिनिर्माणप्रवृत्तानाम् विदुषां हृदयान्याचकर्ष ।*

*पठ रामायणं व्यास काव्यबीजं सनातानम्।*

*यत्र रामचरित्रं स्यात् तदहं तत्र शक्तिमान्॥*

महाभारते तृतीयपर्वणि रामकथा रामायणाऽधारेण वर्णिता। अग्निविष्णुगरुडभागवतब्रह्माण्डपुराणेषु च रामायणानुसारेण रामस्य चरितं न्यबध्यत । भासकालिदासादयः प्राचीनाः कवयो रामायणस्याधमर्ण्यं स्वीकृतवन्तः। अश्वघोषप्रभृतयो बौद्धकवयोऽपि स्वकाव्यानि रामायणानुकृतिवारिभिरसिञ्चन्। जैनकविना विमलसूरिणा रामायणमुपजीव्य "प उ म चरिआ" नामको ग्रन्थो रचितः। बौद्धग्रन्थेष्वपि रामस्य वीर्याणि वर्णितानि वर्णितानि सन्ति। यव-मलद्वीपयोः साहित्येषु रामस्य चरितं दृश्यमानं भवति। भारतीयाधुनिकभाषासु सर्वप्रथमं रामायणं तामिलभाषायामनूदितम्। तुलसीदासेनापि वाल्मीकिरामायणमेवाश्रितमस्ति। संस्कृतवाङ्मयमेव किं भारतस्य काप्येतादृशी भाषा नास्ति यत्र रामायणस्यानुवादो न जातो स्यात्। रामायणस्यानुवादेन वैदेशीक्या भाषा अपि आत्मानं धन्यं गण्यन्ते। किञ्च रामायणस्य महत्त्वे इदमपि प्रमाणं यदत्र वर्णिता विजयादशमी भारतवर्षे पर्वतां प्राप्ता, एवमेव रामायणवर्णिता दीपावली अपि सर्वत्र समादृता। तदित्थं रामायणस्य महत्त्वे तदीया लोकप्रियता प्रतीयते।

भारतीय समाजे अद्यापि यदि आचरणाय कस्यचित उदाहरणं दीयते तर्हि रामस्य एव कारणं तस्य जीवनं मानवसमाजाय प्रेरणास्पदं वर्तते ।

वाल्मीकिरामायणं जीवन–सभ्यता–संस्कृति–धर्म–आदर्श–चारित्र्य–नीति–व्यवहार–पवित्रता–दर्शन–शासन–मानवता–विचारपद्धति–मनोवृत्ति–गार्हस्थ्य–

*दाम्पत्यभाव–गौरव–स्वाभिमान–कर्तव्यादीनामनुपमविचारस्रोत अस्ति । प्रत्युत अस्मिन् महाकाव्ये इतोऽप्यधिकमस्ति ।*

*एतदेवकारणमस्ति यत् अस्य आदिकाव्यस्योपरि अनादिकालादेव प्राच्यभाषातत्त्वविदः, काव्यमर्मज्ञः, मनोविज्ञानशास्त्रिणः, दार्शनिकाः, वैज्ञानिकाः, कला–विशारदास्तथा योगिनः मुग्धाः सन्ति । वाल्मीकेः सुन्दररचनोपरि मुग्धः सन् प्रोफेसर ग्रिफ़िथमहोदयः स्व आङ्ग्ल–अनुवादस्य भूमिकायां कथयति–*

***“(१) संसार मे काव्यग्रन्थों की कमी नहीं; परन्तु आचरणकी पवित्रताका वाल्मीकि–रामायणमें जिस दृढता, मनोहरता और रसिकतासे निर्वाह हुआ है, वैसा अन्यत्र सुलभ नहीं ।***

***(२) काव्यसंसारमें यही एक ऐसा ग्रन्थ है, जो मानव–हृदयमें सौन्दर्य–पूर्णशैलीसे सत्यप्रेम उत्पन्न करने की शक्ति रखता है ।***

***(३) इसके अध्ययनसे हमे यह मालूम होने लगता है कि हमारे अन्दर उच्च विचार प्रविष्ट हो रहे हैं और हम कुछ–से–कुछ बनते जा रहे हैं ।***

***(४) सच तो यह है कि इसके पाठसे मानवता और श्रेष्ठताको समलङ्कृत करनेवाली सम्पूर्ण गुण–राशि हमारे सामने आ खडी होती है ।***

***(५) प्रभावोत्पादक शैलीमें मानव–समाजको धार्मिकशिक्षा प्रदान करना तो रामायणका मुख्य उद्देश्य है ।”[१]***

***(६) आदर्श मनुष्य–जीवनकी अलभ्य तस्वीर भी इसके अंदर हमें राम और सीताके चित्रणमें मिलती है ।***

---

*१. श्री रामनिवास शर्मा, (वाल्मीकिरामायणकी अद्वितीयता) वाल्मीकीय–रामायणाङ्क, गीताप्रेस–गोरखपुर*

***(७) मानव–जीवनके प्रत्येक पहलूपर कविने प्रकाश डाला है–वह भी बडी मनमोहक शैलीसे ।***

***(८) सारांश यह कि रामायण प्रत्येक समय, देश, व्यक्ति और विद्याकी वस्तु है ।***

*इत्थं न केवलं ग्रिफ़िथमहोदय एव रामायणोपरि मुग्ध अपितु युरोपखण्डस्य अन्यान्यविद्वांसोऽपि मोहिताः सन्ति । तेषां केचन उद्गाराः यथा–*

***१. इसकि टक्करका दूसरा ग्रन्थ साहित्य–संसारमें अबतक किसीने नहिं देखा ।***

***२. वाल्मीकि–रामायणको पढकर ही होमरने अपने काव्यग्रन्थ लिखे हैं ।***

***३. काव्य और नैतिकताका इतना मनमोहक समन्वय अन्यत्र नहीं पाया जाता ।***

***४. मानवीय कृतियोंमें इसका आसन बहुत ऊंचा है ।***

*सर मोनियर विलियम्स तथा ए.ली.ली. द्वयोः महोदयोः क्रमशः सीतारामविषयकविचारान् पश्यामः । यथा–*

***(अ) शस्त्रास्त्र–सुसज्जित राम संसारके इतिहासमें अपना प्रतियोगी नहीं रखते ।***

***(आ) सीता वह सुललित चरित्र–चित्रण थी, जिसने कभी मानव अथवा देव–ह्रदयमें पैठकर कल्पना को जाग्रत किया था ।***

*अपरैकग्रन्थकारमतानुसारम्–**"आदिकवि महर्षि वाल्मीकिने अपने देश और कालको अपना काव्यरूपि कण्ठ दिया था । रामायण उसीका अमर सन्देश है ।"***

*रविन्द्रनाथमहोदयेन एकस्मिन् स्थाने कथितं यत्–*

***"वाल्मीकि–रामायण आरती उतारने की वस्तु है, वह आलोचना–प्रत्यालोचनासे ऊपरकी चीज है ।"***

*नैतावदेव अपितु, वाल्मीकिरामायणं लोक–विस्मयकारकं क्षात्रधर्मस्य अन्यतमं जीवितं वाङ्मयमस्ति । तत्र क्षत्रियोचितं कार्यं, वीरोचिता स्पर्द्धा, सैनिकोचिता सफलता तथा मनुष्योचिता चिकिर्षा च दरीदृश्यते ।*

*एकेव रामः चतुर्दशसहस्रराक्षसान् हन्ति । संसारस्य महापराक्रमी रावणं तथा तस्य राक्षसीसाम्राज्यं नाशयति । वालिसदृशबलवन्तं नाशयित्वा तस्य दुर्धर्षाधिनायकतायाः प्रभावं समाप्तं करोति ।*

*लक्ष्मणस्तु कर्मवादस्य तथा वीरतायाश्च मूर्त्येवाऽस्ति ।*

*वाल्मीकीयरामायणं भारतीयवाङ्मयस्य आदिकाव्यमस्तीति तु सर्वे विद्वांसः मुक्तकण्ठैः स्वीकुर्वन्ति । रामायणस्य निर्माणं महाकाव्यस्य आदर्शान् सम्मुखिकृत्य नाऽभवत्, किन्तु स्वयं काव्यमिदं काव्यस्य आदर्शान् अजीजनत् । रामायणात् पूर्वं काव्यं वा तदादर्शं विषयिकी चर्चा न श्रूयते स्म । यद्यपि वेदेषु छन्दोबद्धमन्त्राणामुपलब्धिर्भवति, तत्र नैकप्रकारकालङ्काराः दृश्यन्ते, तथाऽपि तस्य काव्यत्वेन प्रसिद्धिर्नास्ति । वैदिककाले 'कवि' शब्दः त्रिकालदर्शी–ज्ञानी–सर्वज्ञाद्यर्थेष्वेव प्रचलित आसीत् । अद्यापि तेऽर्थाः अग्राह्याः न जाताः; तथापि रचनावैशिष्ट्येन कविकाव्ययोः यो विशिष्टार्थः हृदयङ्गमो भवति; सो वाल्मीकिरामायणपश्चादेवाऽभवत् । एतदेव प्रेक्ष्य साहित्यरीतिकाराः वक्तुं समर्थाः जाताः यत् अल्पबुद्धिमनुष्याय अपि सुगमतापूर्वकं पुरुषार्थचतुष्टयस्य प्राप्तिकारकं यदि किमपि साधनमस्ति तर्हि तत् काव्यमेवाऽस्ति । यथा–*

**"चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि । काव्यादेव...........।[१]"**

*अस्मिन् जगति बहवः तादृशाः जनाः सन्ति ये दर्शनशास्त्रस्य जटिलविषयान् अवगन्तुम् असमर्थाः भवन्ति । ते 'तत्' 'त्वं' पदार्थयोरेक्यं कर्तुं अशक्ताः । 'जहल्लक्षणा' 'अजहल्लक्षणा' इत्यनयोः नाम श्रुत्वैव तेषां मस्तिष्के चक्रं भ्रमति । अन्तः करणस्य अशुद्धत्वात् श्रम–साध्यसाधनेषु तेषां प्रवृतिः न भवति । तादृशानां मनुष्याणाङ्कृते संसार–समुद्रं पारयितुमुपायोऽस्ति–भगवच्चिन्तनं, संतमहापुरुषचरित्राध्ययनञ्च । उक्तञ्च–*

**"यः पठेद् रामचरितं सर्वपापैः प्रमुच्यते ।"**

*''कविन्दुं नौमि वाल्मीकिं यस्य रामायणी कथाम्।*

*चन्द्रिकामिव चिन्वन्ति चकोरा इव साधवः॥[१]*

*''राम तुम्हारा चरित स्वयं ही काव्य है।*

*कोई कवि बन जाय सहज संभाव्य है॥[२]*

**"शताब्दियों पर शताब्दियां बीतती जाती हैं, परन्तु रामायण और महाभारत का पवित्र स्रोत नाममात्र को नहीं सूखता ।"** *(रवीन्द्रनाथ)*

---

*१. ( साहित्यदर्पण १ परि० )*

*(१) शार्ङ्गधरसंग्रहः*

*(२) साकेत - कवि मैथिलीशरण गुप्त*

# १.२. "रामायणे वर्णितविषयाः"

## (रामायणे काव्यज्यौतिषतन्त्रादिविषयाः)

केषाञ्चित्तु दण्ड्यादिभिर्कविभिर्काव्यपरिभाषा रामायणलक्षणाऽधारिता वर्णिताः। [१] त्र्यम्बकराज मखानी महोदयेन तु सुन्दरकाण्डव्याख्यां प्राय सर्वे श्लोका रसालङ्कारयुक्तं मत्वा काण्डनाम्न सार्थकता प्रदर्शिताऽस्ति। महदाश्चर्यं यत् आदिकविना प्राक्तनकाव्यग्रन्थमदृष्ट्वैव साहाय्यमस्वीकृत्य च सर्वोत्तमं काव्यं निर्मितम्। रामायणे प्राकृतिकचित्रणं तु सुन्दरमस्त्यैव, संवादः सर्वाधिकः सुन्दरः। हनुमतो वार्तालापकुशलता सर्वत्र दृश्यमाना भवति। श्रीरामस्य प्रतिपादनशैली, दशरथस्य संभाषणपद्धति, किमधिकं कुत्रचित्तु रावणस्य कथनमपि अतिसुन्दरं प्रतीयते। अत्र ज्यौतिषशास्त्रस्य परमप्रमाणमङ्गीकृतमस्ति यथा त्रिजटायाः स्वप्नं, श्रीरामस्य यात्राकालिकमूहुर्तविचारः,विभीषणद्वारा लङ्कायां अपशकुनानां प्रतिपादनादि ज्योतिर्विज्ञानं ज्ञापयति समर्थयति च। श्री रामो यदा अयोध्यातः सम्पद्यते तदा नवग्रहा समवेत भवन्ति-

'दारुणाः सोममभ्येत्य ग्रहाः सर्वे व्यवस्थिताः ।'[२]

तदनन्तरं लङ्कायुद्धं भवति।

---

(१) त्र्यम्बकराज मखानी (सुन्दरकाण्डव्याख्या)

(२) वाल्मीकिरामायणम् (अयोध्याकाण्ड ४१-११)

दशरथः श्रीरामं ज्यौतिर्विद्सूचितस्वानिष्टफलादेशं वर्णयति-

**अवष्टब्धं च मे राम नक्षत्रं दारुणग्रहैः ।**[1]

**आवेदयन्ति दैवज्ञाः सुर्याङ्गारकराहुभिः॥**

*युद्धकाण्डे रावणमृत्युसमयस्य ग्रहस्थितिरपि ध्यातव्याऽऽस्ति। युद्धकाण्डैव एकनवतितमे सर्गे आयुर्विज्ञानस्य तथा अष्टादशतमे सर्गे राजनीतेः एवञ्च त्रिसप्ततितमे सर्गे तन्त्रशास्त्रस्यमद्भूतं वर्णनं प्राप्यते। अत्र रावणमेघनादौ महातान्त्रिकौ प्रदर्शितौ स्तः। मेघनादस्य सर्वविजयः तन्त्रमूलकोऽस्ति। यदा मेघनादो जीवितकृष्णछागस्य बलिमर्पयति तदा तप्तकाञ्चवदग्नेर्दक्षिणावर्तशिखाः तद्विजयं सूचयति - "प्रदक्षिणावर्तशिखस्तप्तकाञ्चनसन्निभः।"* ***(६/७३/२३)***

*दशाननोऽपि महातान्त्रिकोऽस्ति, तस्य ध्वजोपरि नरशिरकपालस्य (तान्त्रिकं) चिह्नमासीत्, किन्तु रावणपराभवादिद्वारा ऋषिभिर्वाममार्गस्य बलिमांससुरादिक्रियाणामसमीचीनता प्रदश्यर्ते। गौस्वामि तुलसीदासेनापि "तजि श्रुति पंथ बाम मग चलहीं, (अयोध्या-१६८-७/८), "कौल कामबस कृपन बिमूढा"(लङ्का) आदिभिर्वाममार्गस्य खण्डनं कृतमास्ति। इत्थं रामायणे ज्यौतिषतन्त्रायुर्वेदशकुनादिनां प्राचीनता ज्ञायते। वस्तुतः परमास्तिकस्येयमेव दृष्टिर्भवति। धर्मशास्त्राय तु ग्रन्थोऽयं परमप्रमाणमस्त्यैव, अन्यैतिहासिकविषयाः अपि प्रचुरतायां सन्ति। अर्थशास्त्रस्य, व्यवहाराचारस्य तथा कुशलमार्गस्यापि प्रदर्शनमस्ति।*

---

*(१) वाल्मीकिरामायणम् (अयोध्याकाण्ड ४-१८)*

*(२) वाल्मीकिरामायणम् (अयोध्याकाण्ड १६८ - ७/८)*

# रामायणे दार्शनिकत्वम्

महर्षिवाल्मीकेरद्भूतमहाकाव्ये अन्यान्यमाहात्म्ये च तस्य तपस्यैव हेतुरस्ति। "तपः स्वाध्यायनिरतं तपस्वी वाग्विदां वरम्" इति "तप"शब्देनैव आदिकाव्यस्य शुभारम्भो भवति तथा प्रथमार्द्धे ही द्विवारं "तप"शब्दो दृष्टिपथमायाति। वस्तुतः"तपस्वी" शब्देन महर्षिणा एकदृष्ट्या **स्वजी**वनवृत्तं प्रकटितमस्ति। महर्षिणा तपसैव ब्रह्मणः साक्षात्कारः कृतः, रामायणदिव्यकाव्यत्वस्य आशीर्वादः प्राप्तस्तथा रामचरीत्रस्य दर्शनमपि कृतम् । अनन्तरं विश्वामित्रस्य विचित्रतपवर्णनम्, गङ्गाऽवतरणे भगीरथस्याद्भूततपस्या,चूलीऋषितपस्या, भृगुऋषितपस्याऽऽदीनां वर्णनं प्राप्यते। एतेषां मतानुसारं स्वर्गादिसर्वसुखभोगादीनां मुलं तप एवास्ति। किमधिकं , रावणादीनां राज्यसुखशक्त्यादीनां मूलमपि तपः। श्रीरामस्तु शुद्धतपस्वीरस्ति। तपस्वीनामाश्रमं प्रविश्य श्रीरामस्तत्र वैखानसबालखिल्यसम्प्रक्षालमरीचिप-पत्राहारीउन्मज्जकपञ्चाग्निसेवीवायुभक्षिजलभक्षीस्थण्डिलशायीआकाशनिलयी-ऊर्ध्ववासीतपस्वीः पश्यति। एते सर्वे जपे लीनाः। सम्भवतः एषाम्मुनीनां जपः "श्रीराम"मन्त्र स्यात्, कारणं मुनिष्वेतेषु अधिकांशः श्रीरामं दृष्ट्वैव स्वशरीरं योगाग्निषु परित्यजन्ति। वस्तुतः काव्यविधिना कान्तासम्मितमधुरवाण्या च महर्षिवाल्मीकेरयमेव दार्शनिकोपदेशोऽस्ति। तन्मूलतत्त्वं इत्थं पवित्रतपूर्वकतपोनुष्ठानेन ईश्वराराधना तथा धर्माचरणमेवास्ति।

# रामायणे भौगोलिकत्वम्

रामायणस्य भुगोलसम्बन्धिनि बहून्यनुसन्धानानि जातानि। कल्याणस्य रामायणाङ्क, कनिङ्गमस्य एन्शेन्ट डिक्श्नरी, श्री देः ज्योग्राफिकल डिक्शनरी आदिषु बह्वनुसन्धामभवत्। बहुभिः स्वतन्त्रलेखाः लिखितास्सन्ति। लन्दनदेशस्य "एशियाटिक सोसायटी जर्नल" मध्येऽपि एकः लेखः प्रकाशितः। पं.गिरीशचन्द्रस्यवेद धरातलेऽपि काचितुत्तमा सामग्री लभ्यते। लङ्काविषयेबहवः प्रबन्धा सन्ति। सर्वेश्वरस्य एकस्मिन् लेखाङ्के "मालद्वीपम्" लङ्कारुपेणोद्घोषितमस्ति। धर्मारण्यम् अद्यत्वे गया नाम्ना विख्यातः। कुशनाभस्य कन्याकुब्जत्वात् महोदयनगरं कान्यकुब्जेन प्रसिद्धं जातम्। ग्रन्थेऽस्मिनन्यान्यपि बहूनि विवरणानि प्राप्यन्ते । **द्वितीयोऽध्याये रामायणे वर्णितभौगोलिकतत्त्वम् विशदं विवेचयिष्ये ।**

# रामायणे राजनीति, मनोविज्ञानञ्च

रामायणानुशिलनेन वाल्मिकेः उच्चराजनीतिपरिचयो भवति। तत्पुरतो अन्यराजनीतिकविचाराः तुच्छफलप्रदाः प्रतीयन्ते। वातात्मजस्तु साक्षान्नीतिमूर्तिरेव। विभीषणस्य आगमनावसरे श्रीरामः सर्वानुमतिं स्वीकर्तुं प्रयतते, तदा सुग्रीवः सशङ्कः परिभाषते यदयं शत्रुर्भ्राताविभीषणः न जाने कथं इदानीमस्माकं सेनायां प्रविष्टुमिच्छति। सम्भवेद्यदवसरं प्राप्य यथा उलुकः काकान् विनिहन्ति तथैवास्मानपि हन्येत्। प्रकृत्या राक्षसोऽस्ति, अस्य को विश्वासः? शत्रुप्राप्तसहायता सर्वदा शङ्कनीया स्यात्। अङ्गदेनापि प्रायः इत्थमेवोक्तम्।

*जाम्बवन्तेनापि अदेशकाले आगतं विक्ष्य शङ्का प्रकटिता। शरभेन गदितं यत् एनं परितः गुप्तचराः भवेयुः। अश्विपुत्रमैन्दनेन भणितं यत् प्रश्न-प्रतिप्रश्नौत्तरैः भावज्ञानं भवेदस्य। किन्तु हनुमता एतादृशं खण्डनं कृतम् यत् अद्यापि अभूतपूर्वमस्ति।*

*श्रीरामस्य नीतिमत्ता,साधुता,सद्गुणसम्पन्नता च सर्वोपर्यस्ति किन्तु लक्ष्मणोऽपि न न्युनः। स पूर्वमेव मारीचं राक्षसं घोषयित्वा सावधानं करोति। सीतां नैकवारं कथयति यत् श्रीरामोपरि नास्ति सङ्कटं किन्तु भवत्युपरि एव सङ्कटं दृश्यते। सर्वमिदं राक्षसीमायाऽऽवृत्तमित्यादि। इत्थमेव विभीषणस्यापि वचनानि ध्यातव्यानि प्रतीयन्ते।*

# रामायणे रामचरित्रस्यादर्शता

महर्षिवाल्मीकिना स्वकाव्यकलायाः प्रदर्शनाय यत्पात्रमाधारीकृतम् तस्य रामस्य चरित्रमेव तादृशं यत्तदाधारीकृत्य कोऽपि कविः साफल्यमासादयेत्, यथोक्तं साकेते-

**राम ! भवच्चरित्रं स्वयमेव काव्यमस्ति।**[1]

**कोऽपि कवि भवेत् सहजसम्भाव्यमस्ति॥**

वाल्मीकिरामायणं नितान्तहृद्यं सातिशयशिक्षाप्रदं च भूत्वा रसास्वादसुखपिण्डप्रदानद्वारेण विनेयान्विनयति। श्रीराम आदर्शभ्राता आदर्शपतिः आदर्शपुत्रः आदर्शशासकः आदर्शमनुष्यश्चासीदिति समर्थयितुमेव रामायणं निरमीयत, तत्रसफलमप्यभूत्। रामो वनं गत्वाऽपि भरतोपरि सन्देहं न चकार, लक्ष्मणोपरि विपदुपनिपाते स्वप्राणाँस्तृणाय मेने इत्यादिना तदादर्शभ्रातृता, सीतां परित्यज्यापि तदनुरागाग्नौ तिलशः स्वमजुहोदिति तदादर्शपतित्वं, पितुराज्ञयोपनतं प्रकृतिभिरनुमोदितमपि राज्यं तत्याजेदिति तदादर्शपुत्रता, रामराज्यमधुनाऽपि आदर्शराज्यपर्यायतामापन्नमिति तदादर्शशासकता व्यवहारमात्रेण च तदादर्शमनुष्यता प्रतीतेति सर्वथा विस्मयावहं चरित्रं श्रीरामस्य।

---

[1] कवि मैथिलीशरण गुप्त

# १.३."रामायणस्य कर्ता–उद्भवः–स्वरुपम्"

## रामायणस्य कर्ता

संस्कृतवाङ्मयस्य साहित्यं हि अतिविस्तीर्णं महनीयञ्चास्ति।संस्कृतभाषाया साहित्यं विश्वस्य शीर्षस्थभाषासाहित्येषु स्वकीयं विशिष्टं स्थानं अलञ्चकार। अकारणमेव नोपलब्धं स्थानमिदं संस्कृतभाषायै, अपि तु भारतदेशज्ञानमनीषीणामेकान्तज्ञानजिज्ञासाकारणात् फलस्वरुपमिदमुच्चासनं प्राप्तम्; एते ते महर्षयः ये स्वगृहधनमोहमेव न वरन् आत्मनाम,आत्मकीर्तिञ्च विहाय निरवारण्येषु आजीवनं महत्कृतिनिर्माणायैव यापितवन्तः, कारणेनेनैव अद्यत्वे तेषां ज्ञानप्रवणात्मानां दैहिकव्यक्तित्वं यद्यपि कालस्य अपरिमितावलिभिरावृत्तम्, किन्तु तेषामुज्वलयशोगाथा भूम्याकाशाभ्यां सह सदाशयरुपत्वेन वर्तमानमेव न परञ्च भविष्यं यावत् अक्षुण्णा भविष्यतीति निस्सन्देहम्। येषां वास्तविक नाम्नाऽपि वयमनभिज्ञास्तेषां व्यक्तित्वबोधसङ्केतनामेवावशिष्टमधुना तादृश आसीत् स वाल्मीकिमुनिस्तथा तादृश्यैव तदमरकृती रामायणम्। रामायणस्य अस्तित्वं बहुप्राचीनमस्ति। वेदब्राह्मणारण्यकोपनिषदादिषु भारतीयसाहित्यस्यप्राचीनग्रन्थेषु च सर्वत्र रामायणस्य व्यापकता वर्तते।

स्वार्थलिप्साभोगादीच्छानां प्रत्यौदासिन्यं तथा फलमनिच्छन् सत्कर्मे प्रवृत्तिरेव मानवीयश्रेष्ठतायाः प्रतिकमस्ति । एतादृशमनुष्यो धनं तु अनिच्छत्येव यशसप्युपेक्षते । तादृशमहाविभूतिषु महाकविवाल्मीकिरस्ति । महर्षिवाल्मीकिना राम

*कालीनभारतवर्षस्य सम्पूर्णं चित्रं स्वकृत्यां चित्रितमस्ति । महर्षिवाल्मीकिः देशस्य विभिन्नराज्यानां विषये, तत्कालीनस्थितिर्विषये , प्राणिनां विषये , विभिन्नजातीनां सभ्यतासंस्कृतिराजनीत्यादिविषयानां च विवेचनं कृतवान् किन्तु स्वविषये वा*

*स्वकालकुलव्यक्तित्वादिविषये संकेतमात्रमपि न दत्तवानस्ति । स्वविषयिकीनिर्लिप्ततायाः कारणेन महर्षिः महानादर्शस्त्वस्त्येव किन्तु तेषां जीवनवृत्तान्तमस्माकं कृते अद्यावधि शोधविषयत्वेनैव तिष्ठति । तथापि मम विषयः रामायणावलम्ब्यस्त्यतः तस्य रचयिता महर्षिवाल्मीकेः जीवनकालसम्बन्धिविचारः प्रस्तूयते । महर्षिवाल्मीकिकालस्य संस्कृतेः, सभ्यतायाः, आर्थिकसामाजिकधार्मिकस्थितेश्च परिज्ञानाय न तत्कालिनः कश्चनशिलालेखः वाऽन्या काचित् साहित्यसामग्री प्राप्यते नैवेतिहासोऽपि । वाल्मीकिरामायणमेवैकमात्रप्रामाणिकग्रन्थो विद्यते परिशिलनाय । अस्तु, रामायणे निर्दिष्टसामग्री एवम् आलचकैः प्रस्तुतप्रमाणानुसारमादिकविवाल्मीकेः कालस्तथा जीवनविषयकविचारं प्रस्तौतुमुत्सहे ।*

*वाल्मीकेः रामायणे तत्कालस्तथाजीवनसम्बन्धितानि संकेतानि निम्नलिखितानि प्राप्यन्ते –*

*(१) बालकाण्डे प्रथमसर्गे उल्लेखोऽस्ति यत् स्वकालीन सर्वश्रेष्ठ गुणोपेत नरस्य विषये मुनिवरो वाल्मीकिः नारदम् अपृच्छत् –*

***एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ।***

***महर्षे त्वं समर्थोऽसि ज्ञातुमेवंविधं नरम् ॥***[१]

[१]. वा०रा० १/१/१–५

*हे महर्षे ! अहं श्रोतुमिच्छामि, एतदर्थं मे बहूत्सुकताऽस्ति । भवान् तादृग्नरं ज्ञातुं समर्थः अतः मां बोधय ।*

***(२) नारदो वाल्मीकिं कथयति यत् राजारामः श्रेष्ठगुणोपेतस्तथेदानिं राज्यारुढोऽस्ति –***

***"इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः ।***
***नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी ॥[१]"***

*इक्ष्वाकुवंशोत्पन्नः एकः तादृश पुरुषोऽस्ति यो जनेषु 'रामे'ति नाम्ना विख्यातः अस्ति । सैव जितमनः, महाबलः , धैर्यधरः , जितेन्द्रियश्च ।*

***(३) नारदस्य कथनमस्ति यत् रामः कोव्यधिकगवां दानं कृत्वा ब्रह्मलोकं गमिष्यति –***

***गवां कोव्ययुतं दत्त्वा ब्रह्मलोकं प्रयास्यति ।[२]***

*महायशस्वीरामः कोव्ययुतं गवां ब्राह्मणेभ्यः दत्त्वा ब्रह्मलोकं गमिष्यति ।*

***(४) नारदस्य देवलोकप्रस्थानानन्तरं वाल्मीकिः तमसातटं प्राप्नोति यत्तटं गङ्गासमीपमासीत् –***

***स मुहूर्तं गते तस्मिन् देवलोकं मुनिस्तदा ।***

---

*१. वा०रा० १/१/१–८*
*२. वा०रा० १/१/९५*
*३. वा०रा० १/२/३*

**जगाम तमसातीरं जाह्नव्यास्त्वविदुरतः ॥[१]"**

नारदस्य देवलोकगमनानन्तरं किञ्चित्काले एव महर्षिवाल्मीकिः गङ्गायाः समीपस्थं तमसातटं प्राप्तवान् ।

रामायणस्य श्रवणं नवाह्ना करणीयमित्यर्थे नारदस्य वचनं ध्यातव्यं भवति यत् –

**"श्रृणु रामायणं विप्र यद् वाल्मीकिमुखोद्गतम् ।**

**नवाह्ना खलु श्रोतव्यं रामायणकथामृतम् ॥[२]"**

वस्तुतः वाल्मीकिना मानवसमाजस्य पुरतः तादृशं धर्मचरित्रं संस्थापितमस्ति येन समाजस्य सदा दिग्दर्शनं भविष्यति । आदिकविना श्रेष्ठसमाजनिर्माणाय कृतिरियं प्रस्तुता अस्माकं पुरतः । उक्तञ्च–

**"वरं वरेण्यं वरदं तु काव्यं**

**संतारयत्याशु च सर्वलोकम् ।**

**संकल्पितार्थप्रदमादिकाव्यं**

**श्रुत्वा च रामस्य पदं प्रयाति ॥[३]**

(५) **ब्रह्मणः प्रेरणया वाल्मीकिना रामचरित्रस्य रचनां चकार –**

**रामस्य चरितं कृत्स्नं कुरु त्वमृषिसत्तमः ।**

**धर्मात्मनो भगवतो लोके रामस्य धीमतः ॥**

---

[१]. वाल्मीकिरामायणम् १/२/३

[२]. वाल्मीकिरामायणस्य माहात्म्यम् २/२८

[३]. वाल्मीकिरामायणस्य माहत्म्यम् १/२८

***वृत्तं कथय धीरस्य यथा ते नारदाच्छ्रुतम् ।*** [1]

*मुनिश्रेष्ठ ! त्वं श्रीरामस्य सम्पूर्णं चरित्रं वर्णय । बुद्धिमतां वरिष्ठः भगवान् श्रीरामः जगत्यस्मिन् उत्कृष्टधर्मात्मा धीरपुरुषश्चास्ति । त्वया नारदमुखात् यत् श्रुतं तदनुसारं तच्चरित्रं वर्णय ।*

***(६) वनवाससमये सीतासहितरामलक्ष्मणौ वाल्मीकेः आश्रमं अगच्छताम् । तत्र वाल्मीकिना तेषां बहुमानं विदितम् –***

***इति सीता च रामश्च लक्ष्मणश्च कृताञ्जलिः ।***

***अभिगम्याश्रमं सर्वे वाल्मीकिमभिवादयन् ॥***

***तान् महर्षिः प्रमुदितः पूजयामास धर्मवित् ।***

***आस्यतामिति चोवाच स्वागतं तं निवेद्य च ॥*** [2]

*सीतासहितरामलक्ष्मणौ प्रणम्य महर्षिवाल्मीकेः आश्रमं प्रविष्टवन्तौ । सर्वे तच्चरणारविन्देषु नताः । धर्मज्ञः महर्षिः तेषामागमनेन प्रसन्नमनसा सर्वेषामादरसत्कारं चकार ।*

---

*१. वा०रा० १/२/३२–३३*

*२. वा०रा० २/५६/१६–१७*

(७) रामायणस्य उत्तरकाण्डे वाल्मीकेः निवासस्थानस्य निर्देशोऽस्ति । महर्षिः गङ्गापारे तमसातटसमीपस्थाश्रमे निवसति स्म –

गङ्गायास्तु परे पारे वाल्मीकेस्तु महात्मनः ।
आश्रमो दिव्यसंकाशस्तमसातीरमाश्रितः ॥[१]

(८) वाल्मीकिः राजादशरथस्य सखेति विख्यातः –

राज्ञो दशरथस्येष्टः पितुर्मे मुनिपुङ्गवः ।
सखा परमको विप्रो वाल्मीकिस्समहायशाः ॥[२]

(९) रामेण परित्यक्ता सीता वाल्मीके आश्रमं प्राप्ता –

आश्रमान्तेषु च मया त्यक्तव्या त्वं भविष्यसि ।
राज्ञः शासनमादाय तथैव किल दौह्रदम् ॥[३]

महाराजस्य आज्ञया भवत्या अपि इच्छां मत्वा अहमाश्रमं भवतीम् त्यक्ष्यामि इत्यवदत् लक्ष्मणः ।

(१०) शत्रुघ्नः वाल्मीकिआश्रमं प्रस्थितवान् –

स गत्वा गणितान् वासान् सप्ताष्टौ रघुनन्दनः ।
वाल्मीकाश्रममागत्य वासं चक्रे महायशाः ॥[४]

महायशस्वी रघुकुलनन्दनः शत्रुघ्नः यात्रां सम्पाद्य मार्गे सप्ताष्टौ

---

१. वा०रा०७/४५/१७
२. वा०रा०७/९७/१६
३. वा०रा०७/४७/१४
४. वा०रा०७/७१/३

*परिगणितस्थानेषु विश्राम्य वाल्मीकिमुने आश्रमं प्राप्तवान् रात्रौ स्थितवान् च ।*

***(११) वाल्मीकेराश्रमे संरक्षणे च सीता स्वपुत्रान् अजीजनत् । सीतापुत्रौ कुशिलवौ वाल्मीकिः रामचरितं अशिक्षयत् तथा रामसभायां सीतां प्रति रामस्य विश्वासं समुत्पादितवान् –***

***इयं दाशरथे सीता सुव्रता सुव्रता धर्मचारिणी ।***

***अपवादात् परित्यक्ता ममाश्रमसमीपतः ॥[१]***

*हे दशरथनन्दन ! सीतेयमुत्तमव्रतपालनकर्त्री धर्मपरायणा चास्ति । भवद्भिर्लोकोपवादभयात् ममाश्रमसमीपं परित्यक्ता ।*

***(१२) वाल्मीकिः प्राचेतस (वरुणस्य पुत्रः)आसीत् –***

***प्रचेतसोऽहं दशमः पुत्रो राघवनन्दन ।***

***न स्मराम्यनृतं वाक्यमिमौ तु तव पुत्रकौ ॥[२]***

*रघुकुलनन्दन ! प्रचेतायाः दशमपुत्रोऽहं न जाने कदाऽनृतं मे मुखान्निसृतम् । सत्यं वच्म्यहम् उभाविमौ तव सुतौ स्तः ।*

***(१३) वाल्मीकिः बृगुवंशीय आसीत् –***

***संनिबद्धं हि श्लोकानां चतुर्विंशत्सहस्रकम् ।***

---

*[१]. वा०रा०७/९६/१६*

*[२]. वा०रा०७/९६/१९*

**उपाख्यानशतं चैव भार्गवेण तपस्विना ॥**[१]

तेन तपस्वीकविना (भार्गवेण) निर्मिते  महाकाव्ये एकशतमुपाख्यानेन सहितचतुर्विंशतिसहस्राणि श्लोकानि सन्ति ।

इत्थं वाल्मीकिविषये विदूषां वैमत्यमपि दृश्यते । तेषां जीवने यद् परिवर्तनं जातं तदेव समाजस्य कृते प्रेरणास्पदं आशास्पदं च वर्तते । यदि कश्चन पुराकाले कुमार्गगामी अपि ईश्वरसानिध्यात् स्वजीवनसार्थक्यं प्राप्नोति तर्हि वयमपि अस्माकं जीवनं सार्थकं कर्तुं शक्नुमः । अयमेव सन्देशः वाल्मीकिवृत्तस्य ।

---

१. वा०रा०७/९४/२६

# रामायणस्य उद्भवः

ॐ तपः स्वाध्यायनिरतं तपस्वी वाग्विदां वरम्।[१]
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम्॥

महर्षिवाल्मीकिः कष्टप्रदसमाधिना परमपुण्यराशिमर्जितवान्, तया पुण्यराशिणा परमात्मा प्रसन्नोऽभूत्। परमात्मना देवर्षिनारदः वाल्मीकिनिकटगमनाय प्रेषितः। भगवदाज्ञया स्वसंनिधिमागतदेवर्षिं सविधिं समर्च्य वाल्मीकिमहर्षिरपृच्छत्-

को न्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान्।[२]
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः॥
चारित्रेण च को युक्तः सर्वभूतेषु को हितः।[३]
विद्वान् कः कः समर्थश्च कश्चैक प्रियदर्शनः॥
आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः।
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे॥[४]
एतदिच्छाम्यहं श्रोतुं परं कौतुहलं हि मे।
महर्षे त्वं समर्थोऽसि ज्ञातुमेवंविधं नरम्॥[५]

---

(१) वा.रा. बाल. १-१/२/३/४/५

*देवर्षे ! साम्प्रतेऽस्मिन् मर्त्यलोके को गुणवान्, वीर्यवान्, धर्मज्ञः, कृतज्ञः, सत्यवक्ता, दृढव्रती, अनिन्द्यः सर्वस्पृहणीयः, चरीत्रसम्पन्नः, प्रजारञ्जनसमर्थः, सकलजीवहितैषी, महाविद्वान्, मदनादपि सुन्दरः, स्वाधीनमना, क्रोधादिविहीनः, यस्य देहकान्तिं द्रुष्टुम् सकलजीवा उत्कण्ठाः स्युः, रणाङ्गणे क्रुद्धे सति यस्य सम्मुखं न कोऽपि देवस्तिष्ठेत् तादृशः को पुरुषः? तं महापुरुषं विदितुं महतीच्छाऽस्ति मे। हे देवर्षे ! भवान् तादृशपुरुषरत्नं विज्ञातुं नितरां सक्षमः। महर्षिवाल्मीकेः प्रश्नानुसन्धाने देवर्षिणा सम्पूर्णरामगुणस्तथाऽत्यन्त- संक्षिप्तरामचरित्रं प्रसन्नतया श्रावितम्। महर्षिणा पूजितः सत्कृतश्च देवर्षि व्योमपथा देवलोकं प्रस्थितवान्। देवर्षेः गमनानन्तरं महर्षिः मुहूर्तमेकं स्वकीयाश्रमे स्थित्वा स्नानादिकमाध्याह्निककृत्यर्थं स्वशिष्यभरद्वाजेन सह तमसानदीमव्रजत्। तत्र महर्षिणा प्रसन्नावस्थायां दम्पतीरुपं विचर्यमाणं क्रौञ्चयुगलं दृष्टम्। तस्मिनेको नरक्रौञ्चः पापात्मना व्याधेन हतः। सरुधिरं लुण्ठितं भूमिस्थञ्च नरक्रौञ्चं मृतं दृष्ट्वा क्रौञ्ची करुणया क्रन्दनं कृतवती। क्रोञ्चेः करुणक्रन्दनं श्रुत्वा मुनेः करुणाहृदि महती शोकानुभूतिरभवत्। सैव करुणरसमयशोकरुपश्लोकः महर्षेः मुखारविन्दात् संस्कृतसाहित्यस्यप्रथमश्लोकत्वेन लोककल्याणार्थ प्रादुर्भूतः।*

*मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।*<br>
*यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥*[1]

*अन्तर्यामिप्रेरणया श्लोकमुच्चरन् महर्षिहृदि चिन्ता प्रकटिता यत् पक्षीशोकोद्विग्नेन मया किम्वुक्तमेतद्!, अयश्करमिदमभूत्। इत्थं विचार्य महर्षिणा सत्यसङ्कल्पकारणात् श्लोकवाक्यं शिष्यमश्रावयत्।*

*(१) महाभारतवर्णितस्य कस्यापि पात्रस्य रामायणे नाम नोपलभ्यते, महाभारते तु*

---

*1- वा.रा.बा. २–१५*

रामकथा वर्णिता लभ्यते। महाभारतस्य सप्तमपर्वणि लङ्काकाण्डगतं पद्यद्वयं प्राप्यते, अतो महाभारतात् प्राचीनं रामायणम्।

(२) रामायणीया रामकथा कियता परिवर्तनेन दशरथजातकनाम्ना जातकग्रन्थाङ्गभावं गता यस्मिन् पालिभाषयानूदितं रामायणं रामायणीयं पद्यं प्राप्यते।

(३) दशरथेन मृगयायां श्रवणकुमारोऽन्धतापससूनुर्हत इति रामायणकथा सामजातके वर्ण्यते।

(४) बौद्धसाहित्यविशेषज्ञः सिल्वाँलेवि महोदयः स्पष्टमभिप्रैति यत् सद्धर्मस्मृत्युपस्थाननाम्नो बौद्धग्रन्थविशेषस्य मूलेन रामायणेनावश्यं भवितव्यम्।

(५) याकोबिमहोदयो भाषाविज्ञानद्वारा रामायणस्य बौद्धकालपूर्वत्वमाह।

एभिः सर्वैरपि प्रमाणै रामायणस्य बुद्धपूर्वकालिकता सिद्धयति।

(६) रामायणे द्वयोरेव स्थलयोर्यवनपद श्रूयते, तयोरेवोपलब्ध्या बेबरमहाशयो यद्रामायणस्य यवनसकाशाद् गृहीतकथामूलकत्वमुक्तवाँस्तद्यवनपदघटितयोस्तयोः पद्ययोः प्रक्षिप्ततां समर्थयमानेन याकोबिमहोदयेन निपुणं दूषितमेव।

(७) रामायणे कोसलराजधानी अयोध्या आख्यायते। बौद्धजनैः यवनैः पतञ्जलिना चापि कोसलराजधानी साकेत इत्युच्यते, अतः सिद्धयति यत् अयोध्याया अभ्युदये वर्तमाने साकेतेति नामकरणात् पूर्वमेव रामायणं व्यरच्यत।

(८) जैनकविना विमलसूरिणा प्राकृतभाषानिबद्धे स्वीये "प उ म चरिआ" नामके ग्रन्थे "रामचरितं" वर्णितम्। "प उ म चरिआ" ६२ ई० समयेऽरच्यतातो रामयणं ततः प्राचीनम्।

(९) पाटलिपुत्रस्य प्रतिष्ठापनमजातशत्रुणा ५०० ई०पू० समये कृतम्, रामायणे शोनगङ्गासङ्गममतिक्रम्य पुरः सत्यपि रामे पाटलिपुत्रस्य नामापि न श्रूयते, तेन स्पष्टम्

*प्रतीयते यद् रामायणं ५०० ई०पू० समयतः पूर्वकालिकम्।*

***(१०)** बालकाण्डे विशाला मिथिला च इति द्वे नगर्यौ पृथक् पृथक् राजद्वयाधिकृते वर्ण्येते। ऐतिहासिकाः वदन्ति यत् उभे प्रागुक्ते नगर्यौ बुद्धकालात् प्रागेव वैशालीति नाम्ना एकनगरीत्वं गते, अतोऽप्यस्य रामायणस्य बुद्धपूर्वकालिकत्वमायातम्।*

***(११)** रामायणे भारतस्य नानानरपतिशासितानेकलघुराज्यविभक्तत्वं वर्ण्यते इयं च दशा भारतस्य बुद्धपूर्वकाल एतावर्त्ततातोऽपि रामायणस्य बुद्धपूर्वकालिकता समायाता।*

***(१२)** रामायणस्य सम्बन्धे बेलफुर नामा पाश्चात्यपण्डितः- "Cyclopaedia of India" Vol. III नामके ग्रन्थे लिखति – Rama of the Solar line of Hindu Chronology is, however, placed by Brahmins 867 – 102 B.C., between the silver and brazen ages. But he has been variously supposed to have lived 2022 B.C. Jones, 950 Hamilton and 1100 Todd, and according to Bently he was one year old in 960 B.C. born in sixth April 961 B.C Ram preceded Krishna but as their historians Valmiki and Vyasa, who wrote events they witnessed, they were contemporaries, it could not have been many years."*

*एभिः सर्वैरपि प्रमाणैरिदं सिद्धं यद्रामायणं खीष्टपूर्वपञ्चमशतकात्पूर्वमेव कदाचित् प्रणीतं न तु ततोऽर्वाक्। पाणिनीकृतव्याकरणलक्षणहीनभाषाघटिततत्त्वमपि रामायणस्य सिद्धान्तमिमं पोषयति।*

# “रामायणस्य स्वरुपम्”

महर्षिवाल्मीकी रामायणे षडाधिकैककाण्डपञ्चशतसर्गेषु चतुर्विंशतिसहस्राणि श्लोकानि व्यरचत्। रामायणे चतुर्विंशतिः सहस्राणि श्लोकानामिति तत् चतुर्विंशतिसाहस्रीसंहितापदेनभिधीयते।

चतुर्विंशत्सहस्राणि श्लोकानामुक्तवानृषिः।
तथा सर्गशतान्पञ्च षट्काण्डानि तथोत्तरम्॥[१]

यावन्ति अक्षराणि गायत्रीमन्त्रे तावत्सहस्रपरिमाणं रामायणमिति दृढम्। इदमपि प्रत्यक्षसिद्धं यत् प्रतिसहस्रतमश्लोकादौ गायत्रीमन्त्रस्य एकैकमक्षरं प्राप्यते। एतच्च पाठभेदादिकं नापतेदिति बुद्धया कृतं स्यादिति सम्भाव्यते।

सप्तैतानि काण्डानि यथा -

बालकाण्डं

अयोध्याकाण्डं

अरण्यकाण्डं

किष्किन्धाकाण्डं

सुन्दरकाण्डं

युद्धकाण्डं तथोत्तरकाण्डञ्च।

---

१. वाल्मीकिरामायणम् (बालकाण्ड– ४/५)

अत्र कोश्ठकमाध्यमेनवाल्मीकिरामायणस्य काण्डसर्गयोः विवरणं दीयते ।

| काण्डनाम | सर्गसङ्ख्या |
|---|---|
| १. बालकाण्डम् | ७७ |
| २. अयोध्याकाण्डम् | ११९ |
| ३. अरण्यकाण्डम् | ७५ |
| ४.किष्किन्धाकाण्डम् | ६७ |
| ५. सुन्दरकाण्डम् | ६८ |
| ६. युद्धकाण्डम् | १२८ |
| ७. उत्तरकाण्डम् | १११ |

बहवो विद्वांसः उत्तरकाण्डं बालकाण्डस्य कियन्तमंशं च प्रक्षिप्तं मन्यन्ते। बालकाण्डस्य प्रथमे तृतीये च सर्गे या विषयसूची वर्तते तत्रोत्तरकाण्डवर्णिता बालकाण्डगततदंशवर्णिताश्च विषया नायान्तीति च तेषां तादृशोक्तौ हेतुरुच्यते "याकोबि"महोदयस्तु अयोध्याकाण्डमारभ्य युद्धकाण्डान्तं काण्डपञ्चकमेव वाल्मीकिकृतं मन्यते। लङ्काकाण्डस्यान्ते ग्रन्थः समाप्त इव प्रतिभाति। उत्तरकाण्डवर्णितार्थानां सूचना च प्राक्तनकाण्डेषु नायातीति "जैकोबी" महोदयस्य कथानके मूलम्। अथापि उत्तरकाण्ड तृतीय ई०पू० शतकात् प्राक्तनमेव सम्भवति, यतोऽत्रत्य एकः श्लोकः ई०पू० तृतीयशतकनिर्मिते दशरथजातके पालिभाषयानूदितं प्राप्यते।

रामायणस्य अनेकानि संस्करणानि प्राप्यन्ते-

(१) बम्बईतः प्रकाशितं देवनागरी संस्करणम्, उत्तरभारते विशेषतः प्रचरितम्।

(२) बङ्गीयं संस्करणम्, लोकनाथटीकासहितम्, जी०गोरेसीयो-महाशयः संस्करणमिदं प्रकाशितवान्, इटालियनभाषायां रामायणस्यानुवादं च कृतवान्। समयः-१८४८-१८६७ ई०।

(३) काश्मीर संस्करणम्, डी०ए०वी कालेज-लाहोरस्यानुसन्धानकार्यालयात् प्रकाशितम्। अस्य प्रचारो भारतस्य पश्चिमोत्तरभागे विशिष्य वर्तते।

(४) दक्षिणभारतसंस्करणम्, इदं संस्करणम् देवनागरीसंस्करणेन सह मिलतीव।

प्रथमसंस्करणत्रये पर्याप्तभेदो लभ्यते, तत्र कतमं संस्करणं मूलरामायणानुकूलमिति कथयितुं न शक्यते।

# *रामायणस्य टीकाकाराः*

*वाल्मीकीय रामायणस्य महत्त्वं न केवलं काव्यदृष्ट्यैव अपि तु विभिन्नवैष्णवसंप्रदायेषु उपास्यत्वेनापि ग्रन्थोऽयं महत्त्वपूर्णः। अतः रामायणमाश्रित्य अनेके व्याख्याग्रन्थानां रचना भिन्न–भिन्नयुगेषु कृताऽस्ति विद्वद्भिः। मध्ययुगे रामायणस्य लोकप्रियता एतावत्यधिकाऽसीत् यत् तस्मिन् युगे न्यूनातिन्यूनदशटीकाः विरचिताः, याः व्याख्यादृष्ट्या विशेषगुणोपेताः सन्ति । आसां टीकानां संक्षिप्तपरिचयः प्रदीयते –*

## *(१) रामानुजीय–*

*प्राचीनव्याख्यासु रामानुजस्य व्याख्या नितान्त –प्रसिद्धाऽस्ति। अयं वाधूलगोत्रीयः, वरदार्यस्य पुत्र आसीत् । रचनाकालः १४०० ईस्वी समीपम्।*

## *(२) सर्वार्थसार–*

*व्याख्येयं हारीतगोत्रीय वेंकट कृष्णाध्वरेः– (वेंकटेषयज्वनः) अस्ति। रचनाकालः १४७५ ईस्वी समीपम्।*

## *(३) रामायण–दीपिका–*

*वैद्यनाथदीक्षितस्येयं विख्यातव्याख्याऽस्ति । अयं "स्मृतिमुक्ताफल" नाम्नो धर्मग्रन्थस्यापि रचयिता। अनेन स्वव्याख्यायां सर्वार्थसारटीकाया अप्युद्धरणं कृतमस्ति। अतः अस्याः रचनाकालः १५०० ईस्वीयान्ते मन्यन्ते ।*

## *(४) बृहद्विवरण - लघु–विवरण–*

*ईश्वर दीक्षितेन प्रणिते इमौ टीके रामायणोपरि । प्रथमव्याख्याकालः १५१८,द्वितीयव्याख्याकालः१५२५ ।*

## (५) तीर्थीय वा रामायणतत्त्वदीपिका–

टीकेयं महेश्वर तीर्थस्य नाम्नानुसारं "तीर्थीय" अभिधीयते। व्याख्येयं पाठस्य संशोधने तथा पदानां व्याख्यार्थकरणे महाप्रामाणिका मन्यन्ते। अस्या रचनाकालः १७०० ईस्वी समीपम्।

## (६) रामायण–भूषण–

रचयितुः स्वनामगोविन्दराजस्यानुसारं व्याख्येयं "गोविन्दराजीय" नाम्नाऽपि प्रसिद्धा । प्रत्येककाण्डाय व्याख्याकारेण भिन्न–भिन्न नामानि प्रदत्तानि। काण्डक्रमानुसारं यथा–मणिमञ्जीर, पीताम्बर, रत्नमेखल, मुक्ताहार, श्रृङ्गारतिलक, मणिमुकुट, तथा रत्नकिरीट । इयं टीका प्रामाणिका पाण्डित्यपूर्णा चास्ति ।

## (७) वाल्मीकिहृदय–

इयमत्रिगोत्री अहोबलविरचिता टीका। यस्यां गोविन्दराजस्य मतम् अनेकेषु स्थानेषु उद्धृतमस्ति। रचनाकालः १५७५ ईस्वी तः १६२५ ईस्वी समीपम् ।

## (८) अमृतकतक वा कतक–

अस्याः प्रसिद्धटीकायाः रचयिता माधवयोगी । अयं गोविन्दराजस्य पश्चाद्वर्ती टीकाकारः। कतकटीकायां रामायणस्य विषमस्थलानां विवेचनाऽस्ति। अस्य टीकाकारस्य पाण्डित्यं परं श्लाघनीयमस्ति। रचनाकालः १६५० ईस्वी तः १७२५ ईस्वी समीपम्।

## (९) रामायणतिलक–

सर्वाधिकलोकप्रिया व्याख्याऽस्तीयम्। श्रृङ्गेरपुरस्य विसेनवंशीय राजा रामवर्मा एव अस्या प्रणेता। अनेन अध्यात्मरामायणोपर्यपि व्याख्या कृताऽस्ति। समयः १८०० ईस्वी उत्तरार्धः।

*(१०) रामायण–शिरोमणि*

*रामायणस्य टीकेयं वंशीधरस्य तथा शिवसहायस्य सम्मिलिता रचना। इयं प्रयागस्य त्रिवेणितटे विरचिता व्याख्या। रचनाकालः १९२१ ईस्वी समीपम् ।*

*(११) मनोहरा–*

*बङ्गदेशीयः लोकनाथ चक्रवर्ती अस्या रचयिता। पाठसंशोधनं महती विशेषता। रचनाकालः १८६५ ईस्वी मन्यते।*

*(१२) धर्माकूतम्–*

*इयं रामायणस्य आलोचनात्मकव्याख्याऽस्ति, यस्यां टीकाकारेण बहूभिः प्रमाणैः प्रतिपादितं यत् रामायणं वेदस्य तथा धर्मशास्त्रीयशिक्षोपदेशानां प्रतिपादकं ग्रन्थरत्नम्। अस्याः रचयिता त्र्यम्बक मखी अस्ति। रचनाकालः १७०० ईस्वी उत्तरार्धः।*

*इतः परं रामायणोपरि बहव्यः लघ्व्यः टीकाः वर्तन्ते। याः प्रसङ्गावलम्बिन्यः वा पद्यावलम्बिन्यः। इत्थं रामायणस्य व्याख्यानानुशीलनानां दीर्घा परम्परा, या रामायणस्य महत्त्वं प्रभावञ्च बोधयति।*

# द्वितीयोऽध्यायः

## (तत्त्वविमर्शात्मकः)

२.१.  वाल्मीकिरामायणे वर्णिततत्त्वानि ।  ४५–४६

२.२.  वाल्मीकिरामायणे वर्णितकाव्यतत्त्वम् ।  ४७–९६

२.३.  वाल्मीकिरामायणे वर्णितदार्शनिकतत्त्वम् ।  ९७–१२७

२.४.  वाल्मीकिरामायणे वर्णितधर्मतत्त्वम् ।  १२८–१६१

# (द्वितीयोऽध्यायः)
# २.१. वाल्मीकिरामायणे वर्णिततत्त्वानि

*श्रीमद्वाल्मीकीयरामायणं भूतलस्थमादिकाव्यमिति सर्वविदितं पूज्यञ्चेति। आदिकाव्यमिदं विविधतत्त्वनिहितमस्ति– यथा काव्यतत्वं, श्रृङ्गारतत्त्वं, सौन्दर्यतत्त्वं, दर्शनतत्त्वं, ऐतिहासिकतत्त्वं, भौगोलिकतत्त्वं, राजनीतितत्त्वं, मनोविज्ञानतत्त्वं, पर्यावरणतत्त्वं, रसतत्त्वं, निसर्गतत्त्वं, उपजीव्यतत्त्वं,परब्रह्मतत्त्वं, धर्मतत्त्वादिनि विविधतत्त्वानि सन्ति। उपर्युक्तसर्वगुणोपेतं महाकाव्यमिदं सर्वाधिकं लोकप्रियं कल्याणकरञ्चास्ति। उक्तञ्च–*

***न ते वागनृता काव्ये काचिदत्र भविष्यति।***

***यावत् स्थास्यन्ति गिरयः सरितश्च महीतले॥***

***तावद् रामायणकथा लोकेषु प्रचरिष्यति।***[१]

*वाल्मीकिरामायणं सर्वगुणोपेतमेकं महाकाव्यमादिकाव्यं चाऽस्ति । काव्येऽस्मिन् मानवीयजीवनसम्बन्धितसर्वतत्त्वानि समाविष्टानि सन्ति महर्षिणा । नैतावदेव अपितु काव्यदृष्ट्या वाल्मीकिरारामायणम् उत्तरवर्त्तीनाम् काव्यानाम् उपजीव्यं वर्तते । अस्मिन् महाकाव्ये धर्मतत्त्वं, श्रृङ्गारतत्त्वं, ज्यौतिषतत्त्वं, दर्शनतत्त्वं, काव्यतत्त्वं, भौगोलिकतत्त्वं, राजनैतिकतत्त्वं, मनोवैज्ञानिकादिनि तत्त्वानि*

---

*१. बाल०२/३५/३६/३७*

*च सन्ति । काव्यमिदं शिरोमणिः संस्कृतकाव्यपरम्परायाः । मूर्धन्यः धर्मग्रन्थानाम्। अस्मिन् अध्याये मुख्यतत्त्वानां विवेचनं करिष्यामि ।*

प्रथमन्तु रामायणस्य भूमिकापरिज्ञानाय वाल्मीकेः प्राक् धर्मसम्प्रदायानां दर्शनानां काव्यरचनायाश्च का प्रवृत्तयः परम्पराश्च इदम्प्रथमं विचारणीयं स्यात् । वेदसंहिता ब्राह्मणग्रन्थाः मुख्याश्चोपनिषदः रामायणात् पूर्वं रचिताः, तेषामध्ययनमपि सर्वत्र प्राचलत्। वेदाङ्गान्यपि तदानिं पाठ्यन्ते स्म। रामायणे दशरथस्य राजप्रासादे तथैव लङ्कायां रावणस्य संसदि वेदोच्चारणं भवति स्म। तदानीं धर्मशास्त्राण्यपि संवर्धितानि, यतो हि रामायणे राम आह–

**धर्मशास्त्रेषु मुख्येषु विद्यमानेषु दुर्बुधाः।**

**बुद्धिमान्वीक्षिकीं प्राप्य निरर्थं प्रवदन्ति ते ॥**[1]

वाल्मीकेः समयः प्रश्नानुकूलित आसीत् ।

**को न्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान्।**[2]

**धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥**

**चारित्रेण च को युक्तः सर्वभूतेषु को हितः।**[3]

**विद्वान् कः कः समर्थश्च कश्चैक प्रियदर्शनः॥**

**आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः।**

**कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे॥**[4]

---

१– वा०रामायणम् अ०/१००/३९

२– वा.रा. बाल. १-१/२/३/४

## २.२.“ वाल्मीकिरामायणे वर्णितकाव्यतत्त्वम् ”

*काव्यस्य भाषा यावत् साहजिकतां न त्यजति, तावत् सा भावाभिव्यञ्जने अतीव शोभना, सुविशदा, सहजसौन्दर्यसमुल्लासिनी, सहृदयावर्जने च समर्था भवति । यदा भाषा साहजिकतां जहाति तदा दुःखदायिनी, गतिशून्या, सौन्दर्यबोधे परमसमर्था भवति । अत्र साहजिकताया अभिप्रायो गुणेन न अपितु संस्काराद् मन्तव्यः; कारणं च्युतसंस्कारा भाषा स्व–अर्थ–समभिव्यञ्जने असमर्था, दुर्बोधा, कदाचित् विपरितबोधा च भवति । अत एव महर्षिवाल्मिकिः हनुमता; सुग्रीवाय, श्रीरामम् अनुकूलयितुं, यः प्रसङ्गः कृतस्तद्वर्णनकाले भाषाविषयकं स्वमभिप्रायं वर्णयन् कथयति :–*

***“संस्कारक्रमसंपन्नामद्रूतामविलम्बिताम् ।***

***उच्चारयति कल्याणीं वाचं हृदयहारिणीम् ॥”[१]***

*अनेनेदं स्पष्टीकृतं यत् संस्कारसम्पन्ना भाषा एव कल्याणी तथा परचित्तावर्जनि च भवतीति ।* ***महाकविः कालिदासोऽपि प्रोवाच–***

***“ संस्कारवत्येव गिरा मनीषी, तया स पूतश्च विभूषितश्च ॥”[२]***

*अर्थात् स मनीषी अभिधीयते , यः खलु संस्कारवतीं भाषां प्रयुज्यादिति । संस्कारविहीनायाः भाषाया दुर्बोधतां प्रति प्राचेतस अयमभिप्रायः–*

---

[१]. वा०रा० ४/३/३३

[२]. कुमारसंभवम्, प्रथमसर्गः

***"दुःखेन बुबुधे सीतां हनुमाननलङ्कृताम् ।***

***<u>संस्कारेण</u> यथा हीनां वाचमर्थान्तरं गतान् ॥"[१]***

*अर्थात् रामसेवको हनुमान् महता कष्टेन अलंकाररहितां सीतां बुबुधे, यथा संस्काराहिता वाक्  न केवलं दुर्बोधा एव अपितु स्व अर्थम् विहाय अर्थान्तरमपि अवगमयतीति ।*

*महर्षिवाल्मीके भाषा रामायणे सर्वत्र प्रसादमयी, प्रवाहमयी, सुबोधा, संस्कारयुक्ता, उदारवृत्ताऽर्थपदमञ्जुला, अलंकारसन्निहिता, सहृदयहृदयावर्जन–समर्था च । महनीयकाव्यकलाया औदात्त्यस्य च आदर्शत्वेन रामायणमहाकाव्यं काव्यमर्मज्ञानाम् आचार्याणां परं सम्मतम्  । ध्वनिप्रस्थानस्य* ***आचार्यआनन्दवर्धनो*** *रामायणादिमहाकाव्यानि* ***सिद्धरसप्रख्यानि*** *अकथयत्–*

***"सन्ति सिद्धरसप्रख्या ये च रामायणादयः ॥"[२]***

*रामायणे* ***कलापक्षो भावपक्षश्चा****वुभावपि शक्तिमत्तरौ उपलक्षितौ । तस्योदाहरणमेकं पश्यामः–*

***" ततः स मध्यंगतमशुमन्तं, ज्योत्स्नावितानं मुहुरुद्वमन्तम् ।***

***ददर्श धीमान् भुवि भानुमन्तं, गोष्ठे वृषं मत्तमिव भ्रमन्तम् ॥"[३]***

*तद्वदेव–*

---

*१. वा०रा० ५/१५/३९*

*२. ध्वन्यावलोकः, तृतीयोद्द्योतः*

*३. वा०रा० ५/५/१*

***“शिलातलं प्राप्य यथा मृगेन्द्रो, महारणं प्राप्य यथा गजेन्द्रः ।***

***राज्यं समासाद्य यथा नरेन्द्रः, तथा प्रकाशो विरराज चन्द्रः ॥”[१]***

*काव्ये रसप्राधान्यस्वीकुर्वद्भिः सर्वैरप्यलङ्कारशास्त्रिभिः काव्यशोभाधायकत्वेन गुणानाम् अलङ्काराणाञ्च सन्निवेशो आवश्यकोऽङ्गीकृतः । तत्र गुणास्तावत् काव्यात्मनो रसोत्कर्षहेतुत्वेन वर्णितास्तथाऽलङ्काराः काव्यशरीरशोभाधायकत्वेन च वर्णिताः । आचार्यमम्मटो* ***गुणालङ्कारयोः*** *भेदं वर्णयन् कथयति–*

***“ आत्मन एव हि यथा शौर्यादयो, नाऽकारस्य, तथा रसस्यैव माधुर्यादयो गुणा, न वर्णानाम् ।.....ये वाच्य–वाचक–लक्षणाङ्गातिशयमुखेन मुख्यरसं सम्भाविनमुपर्वन्ति, ते कण्ठाद्यङ्गानामुत्कर्षाधानद्वारेण शरीरिणोप्युपकारका हारादय इवालङ्काराः ॥[२]***

***“रसस्याङ्गित्वमाप्तस्य धर्माश्शौर्यादयो यथा ।***

***गुणा माधुर्यमोजोऽथ प्रसाद इति ते गुणाः ॥[३]***

*अतः प्रथमं संक्षिप्तरुपेणमाधुर्यौजःप्रसादरुपगुणानां स्थितिं विवर्ण्य, तदनन्तरं शब्दार्थसौन्दर्यधायकानाम् अलङ्काराणां विवेचनं करिष्यामि । तत्र माधुर्यस्य लक्षणं स्थितिं च निरुपयन् विश्वनाथकविराजः लिखति–*

---

*१. वा.रा०.५/५/७*

*२. काव्यप्रकाशोऽष्टमल्लासः*

*३. साहित्यदर्पणः, अष्टमपरिच्छेदः*

**" चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते ।**

**संभोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ॥"[१]**

माधुर्याभिव्यञ्जननिमित्तानि उपपादयन् साहित्यदर्पणकारो लिखति– **" मूर्ध्नि वर्गान्त्यवर्णेन युक्ता ष्ट, ट, ड, ढान् विना । रणौ लघु च तद्‌व्यक्तौ वर्णाः कारणतां गताः । आवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा ॥"[२]** इति । तत्र प्रथमं 'प्रसाद' गुणस्य कानिचिद्युदाहरणानि प्रस्तौमि–

**"दीपयन्तीव मे कामं विविधा मुदिता द्विजाः ।**

**श्यामाञ्चन्द्रमुखीं स्मृत्वा प्रियां पद्मनिभेक्षणाम्॥**

**मधुरा मधुरालापा किमाह मम भामिनी ।**

**मद्विहीना वरारोहा हनुमन् कथयस्व मे ॥**

**यद् यत् पश्यामि ते गात्रं शीतांशुसदृशानने ।**

**तस्मिंस्तास्मिन् पृथुश्रोणि चक्षुर्मम निबद्ध्यते ॥**

**चारुस्मिते चारुदति चारुनेत्रे विलासिनि ।**

**मनो हरसि मे भूयः सुपर्णः पन्नगं यथा ॥"**

---

[१]. साहित्यदर्पणः ८/२

[२]. साहित्यदर्पणः ८/३

साहित्यदर्पणे ओजसो लक्षणमुक्तं यथा –

**"ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते ।**

**वीरबीभत्सरौद्रेषु क्रमेणाधिक्यमस्य तु ॥**

**प्रसादस्य लक्षणं हेतवश्च** । यथा–

**"चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः ।**

**स प्रसादस्समस्तेषु रसेषु रचनासुच ॥"**

**"शब्दास्तद्व्यञ्जका अर्थबोधकाः श्रुतिमात्रतः ॥"[१]**

वाल्मीकिरामायणे यथा –

**" अनुरक्तोऽस्मि भावेन भ्रातरं देवि तत्त्वतः ।**

**सत्येन धनुषाचैव दत्तेनेष्टेन ते शपे ॥**

**दीप्तमग्निमरण्यं वा यदि रामः प्रवेक्ष्यति ।**

**प्रविष्टं तत्र मां देवि त्वं पूर्वमवधारय ॥"[२]**

---

१. साहित्यदर्पणः,अष्टमपरिच्छेदः

२. वा०रा० २/२१/१६–१७

अस्मिनेव क्रमे शब्दार्थरूपाणां काव्यस्य शोभावर्धकानाम् अलङ्काराणामपि विचार आवश्यकः । अलङ्कारास्तु शब्दार्थयोरुभयोरपि चारुत्वमापादयन्ति । कवीनां तत् तत् अर्थाभिव्यञ्जने परं सहायकाश्च भवन्ति । यद्यपि साहित्याचार्यैरलङ्काराणां स्थितिः काव्ये स्वीकृताः, किन्तु तेषां दुरुपयोगः नाङ्गीकृतः । भवतु, प्रथमं स्थालीपुलाकन्यायेन अर्थाभिव्यञ्जनाय महर्षिवाल्मीकिना रामायणे यदर्थालङ्कारं कृतं तन्निरुपणमावश्यकम् । सादृश्यमूलकानां सर्वेषामर्थालङ्काराणां बीजभूतत्वेन प्रथमम् उपमाऽलङ्कारस्योदाहरणानि प्रस्तूयन्ते ।

" उपमैवाऽनेकप्रकार वैचित्र्येणाऽनेकालङ्कार बीजभूतेति ।" **(अलंकारसर्वस्वम्)**

विश्वामित्रस्य अयोध्याम् आगमनेन दशरथस्य योऽव्यक्तो हर्षः समुत्पन्नस्तद् अभिव्यञ्जनाय प्राचेतसा उपमानां मालैव प्रयुञ्जिता। **(मालोपमा)** –

**" यथाऽमृतस्य संप्राप्तिर्यथा वर्षमनुदके ।**

**यथा सदृशदारेषु पुत्रजन्माऽप्रजस्यवै ॥**

**प्रणष्टस्य यथा लाभो यथा हर्षो महोदयः ।**

**तथैवाऽगमनं मन्ये स्वागतं ते महामुने ॥**[१]

(अत्राऽव्यक्तहर्षोत्पत्तिरुपस्य साधारणधर्मस्याऽप्रयोगाद्धर्लुप्ता मालोपमा )

जगन्नाथस्य श्रीरामचन्द्रस्य जननेन , कौशल्या देव्याः या अन्यादृशीशोभा, अन्यादृशं च गौरवं, तत्संवेदनाय आदिकविना **पूर्णोपमा** प्रयुक्ता । यथा–

---

[१]. वा०रा०१/१८/५१–५२

*(पूर्णोपमा)*

***"कौशल्या शुशुभे तेन पुत्रेणामिततेजसा ।***

***यथा वरेण देवानामदितिर्वज्रपाणिना ॥"[1]***

*श्रीविश्वामित्रं यागसंरक्षणार्थम् अनुगच्छतो रामलक्ष्मणयोः बलपराक्रमयोः शारीरस्य च सौन्दर्यस्य संवेदनार्थम् उपमाम् आयोजयति । यथा–*

***" कलापिनौ धनुष्पाणी शोभयानौ दिशो दश ।***

***विश्वामित्रं महात्मानं त्रिशीर्षाविव पन्नगौ ॥***

***अनुजग्मतु रक्षुद्रौ पितामहमिवाऽश्विनौ ।***

***स्थाणुं देवमिवाऽचिन्त्यं कुमाराविव पावकी ॥[2]***

*श्रीविश्वामित्राद् बलातिबलनाम्नयोः विद्ययोः ग्रहणानन्तरं विद्याकृतश्शोभातिशयरामं द्योतयितुं वाल्मीकिना परं सादृश्यं दत्तं तद्यथा–*

***" विद्यासमुदितो रामश्शुशुभे भीमविक्रमः ।***

***सहस्ररश्मिर्भगवाञ्छरदीव दिवाकरः ॥***

*इत्थमेव भगवाञ्छ्रीरामस्य सर्वसंसारानुरञ्जकत्वरूपं धर्मं संवेदयितुं रामायणकविना उपमानमिदं दतं* ***" इष्टस्सर्वस्य लोकस्य शशांक इव निर्मलः ॥"*** *इति ।*

---

*१. वा०रा० १/८१/११*

*२. वा०रा०बालकाण्डम्*

*कुशनाभस्य उद्यानभूमिं भ्रमणार्थमागतानां रुपयौवनसंपन्नानामलङ्कृतानां कन्यानां यन्निरुपमं सौन्दर्यं, तत् प्रतिबोधनाय प्रयुक्ता* ***चारुतरोपमा*** *। यथा–*

***" तास्तु यौवनशालिन्यौ रुपवत्यस्स्वलङ्कृता ।***

***उद्यानभूमिमागत्य प्रावृषीव शतह्रदा ॥***[1]

*कामलोलुपस्य यौवतेन सह स्वच्छन्दं रमित्वा श्रान्तस्याऽन्तःपुरे सुप्तस्य रावणस्य लंपटतां प्रदर्शयितुं वाल्मीकिना प्रदत्ता* ***उपमापरम्परा*** *। यथा–*

***" स राक्षसेन्द्रश्शुशुभे ताभिः परिवृतस्स्वयम् ।***

***करेणुभिर्यथाऽरण्ये परिकीर्णो महाद्विपः ॥"***

***" गोष्ठे महति मुख्यानां गवां मध्ये वृषो यथा ।"*** *इति ।*

*अथ शुभ्रवर्णानां स्त्रीणां मध्ये प्रसुप्तस्य नीलवर्णस्य दशाननस्य यो वर्णविरोधः तं बोधयितुं महर्षिणा प्रयुक्तोपमा, यथा–*

***" माषराशिप्रतीकाशं निःश्वसन्तं भुजङ्गवत् ।***

***गाङ्गे महति तोयान्ते प्रसुप्तमिव कुञ्जरम् ॥"***[2]

*अथ राक्षसेन्द्रस्याऽन्तःपुरे स्थितानां सौन्दर्यज्ज्वालानां वनितानां प्रतिबोधार्थं वाल्मीकिना प्रयुक्ता चारुतरोपमा । यथा–*

---

[1]. *वा०रा० १/३२/११*

[2]. *वा०रा० ५/११/२८*

***" सा तस्य शुशुभे शाला ताभिस्स्त्रिभिर्विराजिता ।***

***शारदीव प्रसन्ना द्यौस्ताराभिरभिसंवृता ॥"[१]***

*व्योमे परिव्याप्तानां ताराणां मध्ये स्थितस्य कुमुदस्य सौन्दर्यं व्यञ्जयितुं, गोष्ठे स्थितानां धेन्वां मध्ये स्थितेन वृषभेण सह चन्द्रो यथा उपमितः, तत् तु निश्चयं, प्रभावतीव्रताया दृष्ट्या परं मनोहरम् । अथ ज्योत्सनया परिगतस्य सुधांशुसौन्दर्यम् अभिव्यञ्जनाय; राजपतञ्जरे स्थितस्य हंसस्य; श्वेतपर्वतकंदरस्थसिंहस्य; मत्तवारणारुढस्य हस्तिपकस्य च चित्राणि प्रस्तूय वाल्मीकिना वर्ण्यगताः सौन्दर्यदर्परुपोज्ज्वलादयो गुणाः संवेदनयोग्याः कृताः । हरिणरुपश्रृङ्गसहितस्य पूर्णचन्द्रस्य सौन्दर्यबोधनाय तिक्ष्णशृङ्गस्य वृषस्य, ऊर्ध्वशृङ्गस्य हिमवतः; जाबूनदबद्धदन्तस्य हस्तिनश्च चित्राणि यथा प्रस्तुतानि; तन्नूनं मनोहरम् । खगे स्वसम्पूर्णकलाभिः द्योतमानस्य चन्द्रस्य यः शोभातिशयः, तं संवेदनयोग्यं कर्तुं, स्वच्छन्दगह्वरगुहायां बहिः शिलाखण्ड उपविष्टस्य सिंहस्य, युद्धक्षेत्रे स्थितस्य मत्तवारणस्य, राज्यश्रिया जुष्टस्य नरेन्द्रस्य च यथाचित्राणि प्रस्तुतानि, तानि अत्यन्तमद्भूतानि वर्तन्ते ।*

*श्रीरामचन्द्रमरण्यं प्रस्थितं दृष्ट्वा पौराङ्गनानां यच्च दुःखं, यो महान् मानसिकसंक्षोभश्चाऽभवत्, तत् प्रतिबोधयितुं रामायणकविना प्रस्तुता अद्भूतोपमा । यथा–**" सुश्राव नयनैस्स्त्रीणामस्रमायाससम्भवम् ।***

***मिनासंक्षोभचलितैस्सलिलं पङ्कजैरिव ॥"** (वाल्मीकिरामायण २/४०/३५)*

---

*१. वा०रा० ५/९/४०*

*मूर्तगतधर्मद्योतनायाऽमूर्तोपमानग्रहणपरम्परायाः प्रवर्तको भगवान् वाल्मीकिरेव। निगमागमपुराणेतिहासकोविदस्य वाल्मीकेः तत्सन्दर्भेषु प्रसिद्धानि उपमानानि सन्ति। यथा–*

***"अहं प्रस्रणवस्थाय राघवायऽद्य मैथिलि ।***

***प्रापयिष्यामि शक्राय हव्यं हुतमिवानलः ॥"[1]***

***" स वृत्र इव वज्रेण (निहतः)।[2] अग्नि–मारुतकल्पौ तौ भ्रातरौ॥[3]***

***" भूषयन्ताविमं देशं चन्द्रसूर्याविवाम्बरम् ॥ (अश्विनाविव रुपेण)***

***"अनुरक्ता हि वैदेही रामे सर्वात्मना शुभा ।***

***अनन्याचित्ता रामेण पौलोमिव पुरन्दरे ॥[4]***

***" शशीव गतनीहारः पुनर्वसु समन्वितः ॥[5]*** *इत्यादयः ।*

***(पुराणेतिहासविश्रुतानि उपमानानि)–***

***" तं नित्यमनुरक्तास्मि यथा सूर्यं सुवर्चला।***

***<u>लोपामुद्रा</u> यथाऽ<u>गस्त्यं</u> <u>सुकन्या</u> <u>च्यवनं</u> यथा ॥[6]***

---

१. वा०रा० ५/३७/२३
२. वा०रा० ३/३०/२८
३. वा०रा० ५/३९/५३
४. वा०रा० ५/५१/२४
५. वा०रा० १/२९/२५

**" सौदासं दमयन्तीव केशिनी सगरं यथा ।**

**नैषधं दमयन्तीव भैमी पतिमनुव्रता ॥"** *(इत्यादयः)*

*भगवता वाल्मीकिना रामायणे पदे–पदे वर्ण्यगतधर्माणां संवेदनाय उपमाया बहुलः प्रयोगः कृतः । वक्तुं शक्यते यत् कालिदासं विहाय नान्येन कविवरेण कृतः स्यात् । रामायणमहाकाव्ये 'रूपकस्यालङ्कारस्य' यो मनोहरः प्रयोगो दृश्यते ।*

*रामायणकविना वर्षासु पंपातीरारण्येषु प्रवृत्तं प्राकृतिकसंगीतं सौन्दर्यं च द्योतनाय सांगरूपकस्य साहाय्येन यत्सुन्दरं चित्रं प्रस्तुतं, तद्यथा–*

**" षट्पादतंत्री मधुराभिधानं प्लवंगमोदीरितकण्ठतालं ।**

**आविष्कृतं मेघमृदङ्गनादैर्वनेषु संगीतमिव प्रवृत्तम् ॥"**

**" क्वचित् प्रनृतैः क्वचिदुन्नदद्भिः क्वचिच्च वृक्षाग्रनिषण्णकायैः ।**

**व्यालंबबर्हाभरणैर्मयुरैर्वनेषु संगीतमिव प्रवृत्तम् ॥"**[१]

*वने प्रवृत्तमिदमातोद्यकसंगीतं केषां सहृदयानां मनांसि न रञ्जयितुमर्हेत् ? अस्मिन् प्राकृतिके संगीते केचन मयुराः गायकाः, केचिन्नर्तकाः, केचिच्च दर्शकाः । अस्य संगीतस्य झंकाररूपेण वीणावादनेन भ्रमराः स्वरारारूपकण्ठतालैः गुञ्जारवं, स्वगर्जितरुपैः मृदङ्गनादैः मेघाश्च सहकारम् कुर्वन्ति । किञ्च कवेः सौन्दर्यस्य संगितानुरागिता सुक्ष्मेक्षिका च ।*

---

*१. वा०रा० ४/२८/३६–३७*

*महर्षिवाल्मिकिना न केवलं सुकुमारसंगीतस्य चित्रं प्रस्तुतं, अपितु भीषणरणरंगस्य लोमहर्षस्य साम्परायिकस्य संगीतस्याऽपि चित्रं प्रस्तुतं , यथा–*

***" मम चापमयीं वीणां शरकोणैः प्रनादिताय ।***

***ज्याशब्दतुमुलां घोरामार्तभितमहास्वहाम् ॥***

***नाराचतलसंनादां नदिमहितवाहिनीम् ।***

***अवगाह्यमहारंगं वादयिष्याम्यहं रणे ॥***[१]

*( निश्चयमेतद् रावणस्य वीणावादनं भयमुत्पादयति लोमहर्षं च जनयति )*

*अथ विरहिणाम् अग्नितुल्यसंतापकरस्य वसन्ताग्नेः भयजनकं चित्रम्–*

***"अशोकस्तबकांगारषट्पदस्वननिःसृतः ।***

***मां हि पल्लवताम्रार्चिर्वसंताग्निः प्रधक्ष्यति ॥***[२]

*रामायणकविना प्रफुल्ल–बाण–असन–पुष्पाण्यैव कामस्य बाणासनानि अर्थात् धनुरुपाणि प्रोक्तानि , यथा–*

***" प्रफुल्लबाणासनचित्रितेषु प्रहृष्टषट्पादनिकुजितेषु ।***

***गृहीतचापोद्यतदंडचंडः प्रचण्डचापोऽद्य वनेषु कामः ॥"***

---

*१. वा०रा० ६/२४/४५/४६*

*२. वा०रा० ४/१/२६*

सांगरुपकस्य साहाय्येन कामाग्निना क्रियमाणस्य वियोगिनां दाहस्य यच्चित्रं प्रस्तुतं, तदपि दर्शनीयम्–

**" तद्वियोगेन्धनवता तच्चिंताविमलार्चिषा ।**

**रात्रिं–दिवं शरीरं मे दह्यते मदनाग्निना ॥"**

महर्षिवाल्मीकिना कापुरुषदुस्तारायाः रणनद्यास्सांगरुपकस्य साहाय्येन यद् रोमांचजनकं चित्रं प्रस्तुतम्–

**" हतवीरौधवप्रातुं भग्नायुधमहाद्रुमाम् ।**

**शोणितौघमहातोयां यमसागरगामिनीम् ॥**

**यकृत्प्लीहमहापंकां विनिकिर्णां च शैवलाम् ।**

**भिन्नकायशिरोमिनामङ्गावयवशाद्वलाम् ॥**

**गृध्रहंसवराकीर्णां कंकसारससेविताम् ।**

**मेदःफेनसमकिर्णां आवर्तस्वरनिःस्वनाम् ॥**

**"..................तां कापुरुषदुस्तारां युद्धभूमिमयाम् नदीम् ॥"[१]**

---

१. वा०रा० ६/५८/२९ –३०–३१–३२

*महर्षिवाल्मीकिना रुपकानुप्राणितोपमायाः सांगरुपकस्य च साहाय्येन यानि कलामयानि चित्राणि प्रस्तुतानि, तानि परिगणितुं न शक्यम् । अतः तेषां दिग्दर्शनमेवाऽत्र कृतमस्ति । अस्तु, इतः परं रामायणकवेः कानिचित् उत्प्रेक्षाया मनोहराण्युदाहरणानि पश्यामः ।*

***( उत्प्रेक्षायाः मनोहराण्युदाहरणानि )–***

***" मेघकृष्णाजिनधरा धारायज्ञोपवीतिनः । मारुतापूरितगुहाः प्राधीता इव पर्वताः ॥***

***" नीलमेघाश्रिता विद्युत् स्फुरन्ति प्रतिभाति मे ।***

***स्फुरन्ति रावणस्यांके वैदेहीव तपस्विनी ॥"[१]***

***" विद्युत्पताकास्सबलाकमालाश्शैलेन्द्रकूटाकृतिसंनिकाशाः ।***

***गर्जन्ति मेघास्समुदिर्णनादा मत्ता गजेन्द्रा इव संयुगस्थाः ॥[२]***

***सचक्रवाकानि सशैवलानि काशैर्दुकूलैरिव संवृतानि ।***

***सपत्रलेखानि सरोचनानि वधूमुखानीव नदीमुखानि ॥[३]***

***मारुतोद्धूतशिखरैः प्रनृत इव पर्वतः।***

***पादपैः पुष्पपत्राणि सृजद्भिरभितो नदीम् ॥[४]***

---

१. वा०रा० ४/२९/१०–११

२. वा०रा० ४/२८/२०

३. वा०रा० ४/३०/५५

४. वा०रा० २/९/५८

उपरोक्तेषु सर्वेषु छन्दःसु रूपकानुप्राणिता, सिद्धविषया वाच्या वस्तूत्प्रेक्षा । किन्तु प्रथमेषु त्रिषु छन्दःसु वर्षाकालिकं मनोरमम् आरण्यं, रमणीयं प्रकृतिचित्रं, आदिकविना संभावनाबलात् प्रस्तुतम् ।

**( सिद्धविषयाया हेतूत्प्रेक्षा )–**

**" ह्रीयमाणां तु वैदेहीं दृष्ट्वा दीनो दिवाकरः ।**

**प्रविध्वस्तप्रभः श्रीमानासीत्पाण्डुरमण्डलः ॥"[१]**

अत्र सायंकाले सहजमेव प्रभया विरहिते पाण्डुरमण्डले अस्तंगते सूर्ये सिताहरणनिमित्तस्य दैन्यस्याऽसम्भवे ; अहेतुभूतस्य सितापहरणनिमित्तस्य दैन्यस्य, तद्विकारणां च तस्य प्रविध्वस्तप्रभवत्वस्य दैन्यस्य पाण्डुरमण्डलत्वस्य च, हेतुभूतत्वेन वर्णनाद् उक्तविषया हेतूत्प्रेक्षा ।

**( निदर्शनाया उदाहरणानि )–**

**" या हि वैश्रवणे लक्ष्मीर्याचन्द्रे हरिवाहने ।**

**सा रावणगृहे रम्या नित्यमेवाऽनपायिनी ॥"[२]**

वैश्रवणे स्थिरायाः चन्द्रे कृतवसत्याश्च लक्ष्म्या रावणगृहे स्थिताया लक्ष्याश्च वस्तुतो भिन्नत्वेऽपि, तयोरैक्यस्य सैवेयमितिनिरूपणाद् अत्र वाक्यार्थवृत्तिरूपा निदर्शना ।

---

१. वा०रा० ३/५२/३८

२. वा०रा० ५/९/८

" या भाति लक्ष्मीर्भुवि मंदरस्था यथा प्रदोषेषु च सागरस्था ।

तथैव तोयेषु च पुष्करस्था रराज सा चारुनिशाकरस्था ॥"[1]

(समासोक्ते उदाहरणानि)–

" दर्शयन्ति शरन्नद्यः पुलिनानि शनैश्शनैः ।

नवसंगमसव्रीडाजघनानीव योषीतः ॥[2]

अत्र प्रस्तुतनदीवर्णनद्वारा अप्रस्तुताया नवसंगमव्रीडाया नायिकायाः स्फुरणात् समासोक्तिः ।

अन्यान्युदाहरणानि–

"नवमासंधृतं गर्भे भास्करस्य गभस्तिभिः ।

पीत्वा रसं समुद्राणां द्यौः प्रसूते रसायनम् ॥"[3]

"चञ्चच्चन्द्रकरस्पर्शहर्षोन्मीलिततारकाः ।

अहो रागवतो सन्ध्या जहाति स्वयमम्बरम् ॥"[4]

( अत्र समेन कार्येण प्रस्तुतेऽप्रस्तुतव्यवहारसमारोपात्समासोक्तिः)

---

१. वा०रा० ५/५/३

२. वाल्मीकिरामायणम्

३. वाल्मीकिरामायणम्

४. वाल्मीकिरामायणम्

( दीपकप्रयोगः )–

“ निद्रा शनैः केशवमभ्युपैति द्रुतं नदी सागरमभ्युपैति ।

हृष्टा बलाका धनमभ्युपैति कान्तासकामा प्रियमभ्युपैति ॥

(अत्र एकस्यैव क्रियापदस्य नैककारकैः सह प्रयोगेण क्रियावृत्तिदीपकम्)

( तुल्ययोगित्वम् )–

मात्रप्रस्तुतानां वा अप्रस्तुतानाम् एकधर्माभिसंबन्धरुपस्य तुल्ययोगित्वस्य प्रयोगो यथा–

“वृत्ता यात्रा नरेन्द्राणां सेना पथैव वर्तते ।वैराणिचैव मार्गाश्च सलिलेन समीकृताः॥

शोभयिष्यन्ति काकुत्स्थमटव्यो रम्यकानानाः।आपगाश्च महानूपास्सानुमंतश्च पर्वताः॥

घनानां वारणानां च मयुराणां च लक्ष्मण ।नादःप्रस्रवणानां च प्रशान्तस्सहसानघ ॥

शाखासु सप्तच्छद पादायानां प्रभासुतारार्क निशाकराणाम् ।

लीलासु चैवोत्तमवारनानां श्रियं विभज्याऽद्य शरत्प्रवृत्ता ॥

त्रयाणामेव भूतानां सागरस्येह लंघने। शक्तिस्स्याद्वैनतेयस्य तव वा मारुतस्य वा ॥

(अत्र वेगादिरुपेणोत्कृष्टाभ्यां मारुतवैनतेयाभ्यां तुल्यतया हनुमतो वर्णनात् गुणोत्कृष्टैस्समीकृत्य कथनरुपा तुल्ययोगिताऽस्ति ।

"गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगितेति"[1] तल्लक्षणात् ।

(काव्यार्थापत्ते उदाहरणम्)–

"अपकुर्वन्हि रामस्य साक्षादपि पुरन्दरः ।

न सुखं प्राप्नुयादन्यः किं पुनस्तद्विधो जनः ॥

न हि शक्यं क्वचित् स्थातुमविज्ञातेन राक्षसैः ।

अपि राक्षसरूपेण किमुताऽन्येन केनचित् ॥"

( कैमुत्यार्त्रसंश्रयाद् अत्र काव्यार्थापत्तिः)

(अर्थान्तरन्यासस्य उदाहरणम्)–

" कथञ्च धर्मार्थविनीतबुद्धि परावरप्रत्यय निश्चितार्थः ।

भवद्विधः कोपवशे हि तिष्ठेत्कोपं नियच्छंति हि सत्त्ववंतः ॥

अपगच्छतु ते दुःखं मा भूर्बाष्पपरिप्लुतः ।

न हि क्षुभ्यति दुर्धर्षस्समुद्रस्सरितां पतिः ॥"

( अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः )

(दृष्टान्तो यथा)–

---

[1]. चन्द्रालोकः

“सर्पमाशीविषं बद्ध्वा वस्त्रान्ते नावबुद्ध्यसे ।

ग्रीवायां प्रतिमुक्तञ्च कालपाशं न पश्यसि ॥

स भारसौम्य भर्तव्यो यो नरं ताऽवसादयेत् ।

तदन्नपि भोक्तव्यं जीर्यते यदनामयम् ॥”

( विशेषोक्तिः)–

“आयसं हृदयं नूनं राममातुरसंशयम् । यद्देवगर्भप्रतिमे वनं याति न भिद्यते ॥[१]

योजनानां शतं धीमान् तीर्त्वाप्युत्तमविक्रमः ।

अनिःश्वसन् कपिस्तत्र न ग्लानिमधिगच्छति ॥

न वनं गन्तुकामस्य त्यजतश्च वसुंधराम् ।

सर्वलोकातिगस्येव लक्ष्यते चित्त विक्रिया ॥

( कार्याऽजनि विशेषोक्तिः सति पुष्कलकारणे इति विशेषोक्तेर्लक्षणम् । )

( परिकरस्योदाहरणम् )–

“ ऊनषोडशवर्षो मे रामो राजीवलोचनः ।

न युद्धयोग्यतामस्य पश्यामि सह राक्षसैः ॥

१. वा०रा० २/४०/२१

(अस्मिन् श्लोके **'राजीवलोचन'** इत्यस्य विशेषणस्य अभिप्रायत्वेन सह परिकरः । यथा राजीवः रजन्यां प्रवृत्तायां मुकुलितो भवति । तथैव रामोऽपि राजीवलोचनत्वेन रात्र्यां प्रवृत्तायामेव स्वपिति, अतो निशाचरैस्सह युद्धं कर्तुं न प्रभवतीत्यभिप्रायः ।)

**( एकावलीप्रयोगः )–**

**" महीकृता पर्वतराजिपूर्णा शैलाः कृता वृक्षवितानपूर्णा ।**

**वृक्षाः कृता पुष्पवितानपूर्णाः पुष्पं कृतं केसरपत्रपूर्णम् ॥[१]**

( पुर्वंपूर्वस्य परं–परं यत्र विशेषणतया स्थाप्यते वा उपोह्यते तत्रैकावली ।)

**( अतिशयोक्तिः )–**

**"यो भिद्याद् गगनं बाणैः पर्वतानामपि दारयेत् ।**

**यस्य मृत्योरिव क्रोधश्शक्रस्येव पराक्रमः ॥**

**उद्वहेयं भुजाभ्यां तु मेदिनीमम्बरे स्थितः ।**

**आपिबेयं समुद्रं च मृत्युं हन्यां रणे स्थितः ॥**

**अर्कं तुद्यां शरैस्तीक्ष्णैर्विभिद्यां हि महीतलम् ।**

**कामरुपिणमुन्मत्ते पश्य मां कामदं पतिम् ॥"**

( अत्र अयोगे योगरुपा अतिशयोक्तेः प्रयोगोऽस्ति )

---

१. वा०रा० ५/७/९

**(विरोधाभासः)–**

रामायणकविना स्वकाव्यमञ्जुषायां विरोधाभासस्याऽपि प्रयोगः कृतो वर्तते । यथा–

**“अमृतं विषसंपृक्तं त्वया वानरभाषितम् ।**

**यच्च नान्यमना रामो यच्च शोकपरायणः ॥”[१]**

( यद् अमृतनिभं भवति तद् विषसंपृक्तं भवितुं न अर्हतीति विरोधः । रामस्य योऽसह्यो वियोगः स सीतायां तस्य यद् अन्यत् प्रेम तद्द्योतकत्वेन तद्वर्णनपरं कथितं सीताया अमृतसदृशं; किन्तु रामस्य विरहजनिका या अशांतिः सा तु सीतायाः कृते विषसमा परं दुःखदायिनीति वाल्मीकेरभिप्रायः । इति विरोधाभास–परिहारश्च ।

**(परिणामः)–**

**“ स मंदराग्रस्थ इवांशुमाली विवृद्धकोपो बलवीर्यसंयुतः ।**

**कुमारमक्षं सबलं सवाहनं ददाह नेत्राग्निमरीचिभिस्तदा ॥”**

( दाहकत्व असिद्धये वर्ण्ये नेत्रेऽविषयिणोग्नेरारोपात् परिणामः )

---

१. वा०रा० ५/३७/२

( उपमेयोपमा )–

“सागरं चाम्बरप्रख्यमम्बरं सागरोपमम् ।

सागरं चाम्बरं चेति निर्विशेषमदृश्यत ॥[1]

संपृक्तं नभसाऽप्यंभस्संपृक्तञ्च नभोऽम्भसा ।

तद्रूपे स्म दृश्येते तारारत्नसमाकुले॥[2]

(उपमेयोपमानयोः पर्यायेण उपमानोपमेयत्वरूपेण वर्णनं यत्र भवति तत्र उपमेयोपमा)

( अनन्वयः )–

“ गगनं गगनाकारं सागरस्सागरोपमः ।

राम–रावणयोर्युद्धं रामरावणयोरिव ॥[3]

( उल्लेखः )–

“आदित्य इव तेजस्वी लोककान्तश्शशी यथा ।

राजा सर्वस्य लोकस्य देवो वैश्रवणो यथा ॥

विक्रमेणोपपन्नश्च यथा विष्णुर्महायशाः ।

सत्यवादी मधुरवाग् देवो वाचस्पतिर्यथा ॥

रूपवाञ्छुभगश्श्रीमान् कन्दर्प इव मूर्तिमान् ।”

---

[1]. वा०रा० ६/४/११९

[2]. वा०रा० ६/४/१२०

[3]. वा०रा० ६/१०८/५२

*(अपह्नुतिः)–*

**“न वानरोऽयं स्वयमेव कालः ॥[1]”**

*(हनुमति कालत्वं समारोपाय वानरत्वापह्नवादत्रापह्नुतिः)*

***(यथासंख्यम्)–***

***“ वहन्ति वर्षन्ति नदन्ति भान्ति ध्यायन्ति नृत्यन्ति समाश्वसन्ति ।***

***नद्यो घना मत्तगजा वनान्ताः प्रियाविहीनाश्शिखिनः प्लवंगमाः ॥[2]”***

*श्लोकोऽयं रामायणकवेः प्रतिभां प्रदर्शयति । अत्र विभिन्नाः धातवः यथासङ्ख्यं लटि प्रयुक्ताः सुनियोजिताश्च सन्ति । यथा वह्–वर्ष्–नद–भा–नृतादयो धातवः प्रयुञ्जिताः ।*

***(स्वभावोक्तिः)–***

***“ आस्फोटयामास चुचुम्ब पुच्छं ननंद चिक्रीड जगौ जगाम ।***

***स्तंभानरोहन्निपपात भूमौ निदर्शयानः प्रकृतिं कपीनाम् ॥***

*वस्तुतः महर्षेरेतदेव वैशिष्ट्यं यत् साहित्यस्यैकमपि बिन्दुं न त्यजति । तेषां पाण्डित्यस्य का कथा ?*

---

*[1]. वा०रा० ५/५४/३५*

*[2]. वा०रा० ४/२८/२७*

**मधुपानमत्तानां कपीनां** चेष्टाविषयकं कवेरिदं चित्रं दृष्टव्यमेव–

*ततश्चानुमतास्सर्वे सुसंहृष्टा वनौकसः । मुदिताश्च ततस्तेच प्रनृत्यन्ति ततस्ततः ॥*

*गायन्ति केचित् प्रहसन्ति केचिन्*

*नृत्यन्ति केचित्प्रणमन्ति केचित् ।*

*पतन्ति केचित् प्रचरन्ति केचित्*

*प्लवन्ति केचित् प्रलपन्ति केचित् ॥*[१]

***(समाधिः)–***

*समाधिः कार्यसौकर्यं कारणान्तरसन्निधेः ॥*

*तताप न हि तं सूर्यः प्लवन्तं वानरेश्वरम् । सिषेवेच तदा वायु रामकार्यार्थसिद्धये ॥*

***(सम्भावना)–***

*शरैस्तु संकुलां कृत्वा लंकां परबलार्दनः ।*

*आनयेद्यदिकाकुत्स्थस्तत्तस्य सदृशं भवेत् ॥*

वैदेह्या रामकर्तृकलंकाशरनिबिडीकरणपूर्वकस्वीयानयनस्य रामोचितकर्मसिद्ध्यर्थ–त्वेनोहितत्वात् अन्यसिद्ध्यर्थोहरुपा सम्भावना ।

---

१. वा०रा० ५/६१/१७

***(अत्युक्तिः)*** – *चन्द्रालोकग्रन्थेऽत्युक्तिलक्षणमित्थं वर्णितमस्ति यत्*–

***"अत्युक्तिरद्भूततातथ्य शौर्यौदार्यादिवर्णनम् ।"*** *रामायणस्योदाहरणं यथा*–

***"यदि वा त्रिदिवे सीतां न द्रक्ष्यामि कृतश्रमः ।***

***बद्ध्वा राक्षसराजानमानयिष्यामि रावणम् ॥"***

***"आनयिष्यामि वा लङ्कां समुत्पाव्य सरावणाम् ॥"***

*यदि अहं त्रिदिवे सीतां न द्रक्ष्यामि तर्हि राक्षसराजानं रावणं बद्ध्वा आनयिष्यामि ।*

***(लोकोक्तिः)***–

***यूयमेवाऽभिजानित योऽयं यद्वा करिष्यति ।***

***अतिरेवह्यहेः पादान् विजानाति न संशयः ॥***

***"गतोदके सेतुबन्धो न कल्याणि विधीयते ॥"***

*अस्मिन् श्लोके लोकप्रवादरुपलोकोक्तेः प्रयोगो विद्यते ।*

***(भाविकालङ्कारः)***–

***आरुह्य पुष्पकं दिव्यं विमानं सुर्यसन्निभम् ।***

***उत्तरां दिशमालोक्य जगाम पुरुषोत्तमः ॥***

*(अत्र भाव्यर्थसाक्षात्कारवर्णनरुपो भाविकालङ्कारोऽस्ति ।)*

*(समालङ्कारः)–*

**अहमौपयिकी भार्या तस्यैव च धरापतेः ।**

**व्रतस्नातस्य विद्येव विप्रस्य विदितात्मनः ॥**

**राघवोऽर्हति वैदेहीं तंचेयमसितेक्षणा ॥”[१]**

*(अस्मिन् श्लोके अनुरुपयोः सितारामयोर्वर्णनादनुरुपवस्तुद्वयवर्णनात्मकः समालङ्कारः ।)*

*(विषमः)–*

**“अतुष्टं स्वेषु दारेषु चलितं चपलेन्द्रियम् ।**

**नयन्ति निकृतप्रज्ञं परदाराः पराभवम् ॥** *(पराभवम्)*

*(अत्र इष्टानवाप्तिपूर्वकाऽनिष्टलब्धिवर्णनाद् विषमः ।)*

*(अनुमानम्)–*

**“ विलीयमानैर्विहगैर्निमिलद्भिश्च पङ्कजैः।**

**विकसंत्या च मालत्या गतोऽस्तं ज्ञायते रविः॥”[२]**

---

१. वा०रा० ५/२१/१७

२. वा०रा० ४/२८/५२

*(ससंदेहः)–*

*"शङ्काहतात्मा दध्यौ स कपीन्द्रं तेजसा वृतम् ।*

*किमेष भगवान्नंदी भवेत्साक्षादिहागतः ॥"*

*"का त्वं काञ्चनवर्णाङ्गि पीतकौशेयवासिनि ।*

*कमलानां शुभां मालां पद्मिनीमिव बिभ्रति ॥"*

*"ह्रीः श्रीः कीर्तिश्शुभा लक्ष्मीरप्सरा वा शुभानने ।*

*भूतिर्वा त्वं वरारोहे रतिर्वा स्वैरचारिणी ?"*

*( शङ्काहतात्मेत्यत्र तेजोऽतिशयवत्त्वाद्यप्रकृतसादृश्यात् प्रकृत हनुमदाश्रयानवधारण–ज्ञानवत्वात्संदेहालङ्कारः )*

*(असंभवालङ्कारः)–*

*"क्षुधितस्य च सिंहस्य मृगशत्रोस्तरस्विनः।*

*आशीविषस्य वदनाद् दंष्ट्रामादातुमिच्छसि ॥"*

*"मन्दरं पर्वतश्रेष्ठं पाणिना हर्तुमिच्छसि ।*

*कालकूटं विषं पीत्वा स्वस्तिमान् गन्तुमिच्छसि ॥"*

*( उपरोक्तदत्तेषु छन्दःसु अर्थनिष्पत्तेः असम्भाव्यत्वात् वर्णनरुपोऽसम्भवालङ्कारः ।)*

***(शब्दालङ्कारः)–***

***यानि त्वत्तीरवासीनि दैवतानि च सन्ति हि ।***

***तानि सर्वाणि यक्ष्यामि तीर्थान्यायततानि च ॥***

***पश्यद्रोणप्रमाणानि लम्बमानानि लक्ष्मणः ।***

***मधुनि मधुकारीभिस्संभृतानि नगे–नगे ॥***

*(अनयोः छन्दसो नकारस्थाऽसकृदवृत्याऽत्रानुप्रासः)*

***(अन्त्यानुप्रास )–***

***“विद्युत्पताकास्सनलाकमालाः शैलेन्द्रकूटाकृतिसंनिकाशाः ।***

***गर्जन्ति मेघास्समुदीर्णनादाः मत्ता गजेन्द्रा इव संयुगस्थाः ॥”***

***(छेकानुप्रासः)–***

***“वृक्षाद् वृक्षं प्रधावन् स गिरींश्चापि नदीनदम् ।***

***अस्ति कच्चित्त्वया दृष्टा बिल्व ! बिल्वोपमस्तनी ॥”***

*( श्लोकेस्मिन् व्यञ्जनानां सकृद् आवृत्या छेकानुप्रासः)*

*(वृत्यनुप्रासः)–*

***“मयि लल ललने यथासुखं त्वं त्वयि च समेत्य ललन्तु बान्धवास्ते ।”***

***“स लिलङ्घयिषु भीमं सलिलं सलिलार्णवम् ।***

***कल्लोलास्फालवेलान्तमुत्पात नभो हरिः ॥”***

*एवमेव–*

***“ ततो रावणनीतायास्सीतायाश्शत्रुकर्षणः।***

***इयेष पदमन्वेष्टुं चारणाचरिते पथि ॥***

*(श्रुत्यनुप्रासः)–*

***“परिष्वज्य दशग्रीवमिदं वचनमब्रवीत् ।***

***मया क्रीड महाराज सितया किं तवाऽनया ॥”***

*( श्लोकेऽस्मिन् तालव्यानां जकार–यकार–शकाराणां तथा दन्त्यानां दकार–तकार–नकारांणाम् आवर्तनेनाऽयं श्रुत्यनुप्रासः ।)*

*(यमकालङ्कारः)–*

*“ततः स मध्यंगतमंशुमन्तं ज्योत्सनावितानं मुहुरुद्वमन्तम् ।*

*ददर्श धीमान् भुवि भानुमन्तं गोष्ठे वृषं मत्तमिवभ्रमन्तम् ॥”*

( छन्दस्यस्मिन् अनर्थकभिन्नार्थकसार्थकानर्थकान्यतमवर्णानां च आवृतिरुपोऽयं यमकालङ्कारः )

**( वक्रोक्ति )–**

**कौशल्यां च सुमित्रां च मां च पुत्रैस्त्रिभिस्सह ।**

**प्रक्षिप्य नरके सा त्वं कैकेयि! सुखिता भव ॥"[1]**

**( पुनरुक्तवदामासः )–**

**"विभीषणस्तु रामस्य दृष्ट्वा गात्रं शरैश्चितम् ।**

**शोकसंपीडितमना रुरोद विललाप च ॥[2]**

( यद्यपि रोदन–विलापौ समानार्थकौ प्रतीयेते, परन्तु 'रोदनं' तावत्केवलं ध्वनिमात्रं भवति, यत्रतु विलापः नष्टद्रव्यविषयकगुणस्मरणानुवादपूर्वकरोदनाभिव्यञ्जक इति तयोर्भेदः )

**( छेकोक्तिः )– अर्थान्तरगर्भिताया** लोकोक्तेः कथनमेव छेकोक्तिरुच्यते ।

**रक्षसां कामरुपाणां विज्ञाने का गतिर्मम । यूयमेवाऽस्य जानीत योऽयं यद्वा करिष्यति॥**

---

१. वा०रा० २/१२/९१

२. वा०रा० ६/५०/१४

***अहिरेवह्यहेः पादान् विजानाति न संशयः ॥***[१]

*अयं रामायणमहार्णवो अनंतालङ्काररत्ननिधिः । अतोऽत्र स्थितानां सर्वेषाम् अलङ्काराणां निरूपणन्तु दुश्शक्यमेव । अतः मयाऽत्र तेषां स्वल्पप्रयास एव विहितः।*

# ***व्याकरणतत्त्वम्***

*भगवता वाल्मीकिना रामायणे यत्र तत्र परस्मैपदिनो आत्मनेपदे; आत्मनेपदिनो परस्मैपदे च प्रयोगाः कृताः । कृत् प्रत्यया अपि तदनुगुणमेव प्रयुक्ताः । अतः स्थालीपुलाकान्यायेन अत्र तादृशप्रयोगाः संक्षेपेण प्रस्तूयते :–*

***(१) “प्रच्छ” धातुः परस्मैपदी, तस्य आत्मनेपदप्रयोगः यथा :–***

*“ जनकस्त्वां* ***पृच्छते ।”***[२] *“ कैकेयीं* ***पर्यपृच्छत ।”***[३] *“यन्मां त्वां* ***परिपृच्छसे ।”***[४] ***इत्यादयः ।***

*१. वा०रा० ५/४२/९*
*२. वा०रा० १/६८/६*
*३. वा०रा० २/१०/११*
*४. वा०रा० ५/३/२५*

***(२) "दृशिर्" धातुः परस्मैपदी, तस्य आत्मनेपदप्रयोगः यथा :–***

*" न च **पश्यामहेऽश्वं ते** " " नाद्य **पश्यामहे** " " न च **पश्यामहे** लोके " "**द्रक्ष्यन्ते** वसुधाधिपम् " " किं **पश्यसे** समाधानम् " " दिशागज**मपश्यत** " इत्यादयः ।*

***(३) " चल् " धातोरात्मनेपदप्रयोगः यथा :– " यस्मिन्न चलते धर्मः "[१] " खेदाच्चालयते शीर्षम् "**[२] इत्यादयः ।*

***(४) " गम्लृ " धातोरात्मनेपदप्रयोगः "लोकं पापात्मनामेते गच्छन्ते"[३] "अद्य गच्छामहे"[४] "अभिगच्छामहे सर्वे"[५] " पुरीं गच्छामहे "[६]** इत्यादयः ।*

*एतादृशाः प्रयोगाः रामायणमहाकाव्ये बहूत्रोपलक्षिताः । अनेनेदं ज्ञायते यत् वाल्मीकिना येषां परस्मैपदिनां धातूनां आत्मनेपदप्रयोगः, आत्मनेपदिनां च परस्मैपदप्रयोगः धातुपाठम् अनुसृत्य कृतो दृश्यते । कदाचित् ते धातवः*

---

[१]. वा०रा० ६/२८/११

[२]. वा०रा० १/४०/१५

[३]. वा०रा० ४/२७/३५

[४]. वा०रा० १/२१/२४–१/२३/१७

[५]. वा०रा० १/२३/१६

[६]. वा०रा० १/६८/१७

वाल्मीकिकाले उभयपदिनो भवेयुः , अन्यथा प्राचेतसेन एतादृशः प्रयोगः न कृतो भवेत् । वर्तमानधातुपाठानुसारेण केचन असाधव इव प्रतीयमानाः तादृशा कृत्प्रयोगा अत्र प्रस्तूयन्ते :–

| असाधुः | साधुः | असाधुः | साधुः |
|---|---|---|---|
| **जिज्ञासन्तः**(१/३१/१०) | **जिज्ञासमानाः**; | **क्रीडमाणस्य**(१/३६/९) | **क्रीडतः** |
| **विवर्धन्तीं**(१/२५/८) | **विवर्धमानाम्**; | **तप्यन्तीं**(१/४८/३) | **तपन्तीं** |

" **शक्ता** " इत्यस्य स्थाने " **शकिता**" इति प्रयोगः " **पुनर्न शकिता नेतुं** ।" (१/४४/११)

रामायणे **'पत्या'** इत्यस्य स्थाने **'पतिना'** इति प्रयोगः कृतः ।"[१] अकारान्तस्य **'धर्म'** शब्दस्य नकारान्तत्वेन प्रयोगः यथा–**'संयुक्तः काल धर्मणा ।'**[२] इत्यादयः।

## कारकप्रयोगाः :–

अपादानकारकस्य स्थाने षष्ठ्याः प्रयोगः यथा–**'सर्वे चण्डस्य बिभ्यति ॥'** अत्र **"भीत्रार्थानां भयहेतुः"** इत्यनेन सुत्रेण **'चण्डात्'** इति प्रयोगः कर्तव्यः स्यात्। 'विभीषणस्य मन्त्रोऽयं **मम रोचते ।'**[३] **'एतद्धि मम रोचते ।'**[४] इत्यत्र **'मह्यम्'**

**'मह्यम्'**

इत्यस्य स्थाने षष्ठ्याः प्रयोगः ।

१. वा०रा० २/१०१/११
२. वा०रा० ६/९२/८
३. वा०रा० ६/१९/३६
४. वा०रा० ६/२०/३२

*वस्तुतः सूक्ष्मपरीक्षणं कृत्वा पाणिनीयव्याकरणासङ्गताः प्रयोगाः दर्शयितुं शक्यते । किन्तु, मम दृढविश्वासः यत् पाणिनीयव्याकरणस्य नियमाननुसृत्य वाल्मीकिविरचितरामायणस्य परीक्षणं अयोग्यम्, यतो हि पाणिनेस्तदतिप्राचीनं विद्यते ।*

***रामायणे लोकोक्तिनां प्रयोगाः –***

***"रत्नं हि भगवन्नेतद्रत्नहारी च पार्थिवः ॥[१]***

***"ऐश्वर्यमदमत्तो हि सर्वोहमिति मन्यते ॥[२]***

***"असत्यानि च युद्धानि" "भूताश्चार्था विरुद्ध्यन्ति देशकालविरोधिता ॥" "स निरर्थं गतजले सेतुं बंधितुमिच्छति ।[३]" "रज्जुस्नेहेन किं तस्य त्यजतः कुञ्जरोत्तमम् ॥[४]" "अन्तकाले हि भूतानि मुह्यन्ति" "तदिदं काकतालीयम्"[५] "सोत्साहस्य लोके हि न किञ्चिदपि दुर्लभम्"[६] "सन्तश्चारित्रभूषणाः ।[७]"*** *इत्यादयः ।*

---

*१. वा०रा० १/५३/१०*
*२. वा०रा० सुन्दरकाण्डम्*
*३. वा०रा० २/१७/१६*
*४. वा०रा० ३/३७/२*
*५. वा०रा० ३/४१/६*
*६. वा०रा० ४/१/१२३*
*७. वा०रा० ६/११३/४३*

अन्ततोगत्वा अयमेव निष्कर्षः, यत् वाल्मीकिरामायणे सर्वत्र संस्कृतायाः सुबोधायाः प्रसादगुणयुक्तायाः भावाभिव्यञ्जनसमर्थाया मनोज्ञाया उदारशब्दयुक्ताया दीर्घसमासरहितायाश्च भाषाया मनोरमो प्रयोगो दृश्यते । प्राचेतसेन विविधानां शैलीनां रामायणमहाकाव्ये प्रयोगः सम्पादितः । रामायणस्य भाषातत्त्वस्य प्रथमं लक्षणम् अतिदीर्घसमासराहित्यम्सुबोधत्वं, दुरान्वयक्लेशराहित्यञ्च । यथा–

**"एतदेव हि मे रत्नमेतदेव हि धनम्।**

**एतदेव हि सर्वस्वमेतदेव हि जीवितम्॥[१]**

**रामायणे प्रयुक्तासंवादशैल्या एकमुदाहरणम्–**

**"जटीतापसवेषेण सभार्यश्शरचापधृक् ।**

**आगतस्त्वमिमं देशं कथं राक्षससेवितम् ?**

**रामस्य उत्तरम्–**

**"आसीद्दशरथो नाम राजा त्रिदशविक्रमः।**

**तस्याऽमग्रजः पुत्रो 'रामो' नाम जनैः श्रुतः ॥**

---

१. वा०रा० १/५३/२४

*काव्यात्मिकस्य दिग्दर्शनानन्तरम् अवगम्य निष्कर्षो भवति यत् सर्वत्र रामायणस्य भाषा प्रसादमधुरा, उदारशब्दार्थयुक्ता, संस्कारसम्पन्ना, सुबोधा, दूरान्वय, क्लिष्टान्वयरहिता, अतिदीर्घसमासरहिता च अस्तीत्यलं विस्तारभयात् । लौकिक्यां*

*संस्कृतभाषायां रामायणस्य आद्यकाव्यत्वेऽपि काव्यधर्मैः समुल्लसितं परिपूर्णञ्चेदं रामायणमहाकाव्यं न केवलं भारतीयवाङ्मय एव अपि तु समस्तविश्ववाङ्मय एव प्रथमं स्थानमलङ्करोतीति निर्बाधसत्यम् । महाकविना उत्तरवर्तीनां कवीनां कृते परमोपकारः कृतः । वाल्मीकेः वचनं असत्यं न भवति । उक्तञ्च–*

***"न ते वागनृता काचिदत्र भविष्यति ।"***

*वस्तुतः वाल्मीकिरामायणं सर्वेषां काव्यानां उपजीव्यं महाकाव्यं विद्यते । केचन कवय पादोपजीविनः केचन पदकोपजीविनः भवन्ति केचन छायोपजीविनः भवन्ति किन्तु केवलं वाक्मीकिरेव सकलोपजीव्यः अस्ति । यथा–*

***"पादोपजीविपदकोपजीवि–***

***छायोपजीविसकलोपजीव्यः ।***

आदिकवेः परमपावनं मननीयं माननीयञ्चाऽस्त्यादिकाव्यं रामायणं यत् कविकाव्ययोः विशुद्धरुपा परीक्षा एव । कवेर्पदं ऋषितुल्यं भवति । ऋषेरर्थः भवति–द्रष्टा । वस्तुनां विचित्रभावान् धर्मं तथा तत्त्वञ्च सम्यक् अवगमयति स एव ऋषेः महनीयपदस्य वाच्यः। कवयः क्रान्तदर्शिनो भवन्ति–नेत्रव्यापारात् दूरस्थः भूतभाविपदार्थयथार्थरुपद्रष्टा पुण्यात्मापुरुषः । किञ्च तत्र भेदः। वस्तु–तत्त्वदर्शनात् ऋषित्वं प्राप्यते; अपितु यावत् स स्वानुभूतवस्तु–तत्त्वं शब्दैः न वदति तावत् कविः भवितुं नार्हति । कवेः कल्पनासु दर्शनेन सह वर्णनाया अपि मनोरमसामञ्जस्यं निबद्धं वर्तते अस्याः जनकः स्वयं वाल्मीकिरेवास्ति ।

वाल्मीकेः वस्तुदर्शनं नित्यरुपमासीत्; परञ्च यावत् वर्णना नोदिता तावत् तस्य काव्यमप्रकटितम् । ‘ मा निषाद ’पद्योच्चारिते सति स्वयं चतुराननः समुपस्थाय अब्रवीत्– महर्षे ! तवार्षचक्षोरुन्मेषः जातः। त्वमाद्यकविरसि । किञ्च भवभूतिरपि आह–

ऋषे प्रबुद्धोऽसि वागात्मनि ब्रह्मणि । तद् ब्रूहि रामचरितम् । अव्याहतज्योतिरार्षं ते चक्षुः प्रतिभाति । आद्यः कविरसि ।

प्रसिद्धसमालोचकशिरोमणिभट्टतौतेनाऽपि कवेः यथार्थरुपं वाल्मीकेः दृष्टान्तद्वारा अस्मिन् पद्ये सुन्दरतया बोधितम्–

***दर्शनाद् वर्णनाच्चाथ रुढा लोके कविश्रुतिः ।***

***तथा हि दर्शने स्वच्छे नित्येऽप्यादिकवेर्मुनेः ॥***

***नोदिता कविता लोके यावज्जाता न वर्णना ॥***

*संस्कृतकाव्यधारायाः दिशा तु तस्मिनेवासरे निर्णिता, यदा स्नेहपरायणसहचरस्य आकस्मिकवियोगात् सन्तप्तक्रौञ्च्याः करुणस्वरं श्रुत्वा वाल्मीकेः हृदयस्य शोकः श्लोकत्वेन प्रस्फुटः। काव्यस्य जीवनं रसोऽस्ति, काव्यस्य आत्माऽपि रसोऽस्ति– एतत् साहित्यजगत् तदैव अशिक्षिष्ट यदा आदिकवेः आदिकाव्यरसामृतं अपात् । भूरि–भूरिप्रियमाणास्तथा नितान्तविस्मिताः शिष्याः सकौतुहलशब्देषु रहस्यभूततत्त्वमेतत् अजानन्–*

***समाक्षरैश्चतुर्भियः पादैर्गीतो महर्षिणा ।***

***सोऽनुव्याहरणाद् भूयः शोकः श्लोकत्वमागतः॥*** *(बाल०/२/४०)*

*महाकविकालिदासः तथ्यमिदं इत्थं वदति–*

***तामभ्यगच्छद् रुदितानुसारी कविः कुशेध्माहरणाय यातः ।***

***निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः ॥***

***(रघुवंश १४/७०)***

*सूत्रमिदमाधारीकृत्य आनन्दवर्धनेनाऽपि काव्यस्यात्मा रस एवेति स्वीकृतम्–*

***काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।***

***क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥*** *(ध्वन्यावलोक १/५)*

आदिकविः समग्रकाव्यमेव कवितायाः सत्स्वरूपं प्रकटयति । वाल्मीकिय–रामायणं मनोरमोपमाभिस्तथा उत्प्रेक्षाभिश्चावलितो विशालः भव्यः प्रासादोऽस्ति ।

वस्तुतः रस–पैशल वर्णनमस्ति रामायणस्य हृदयम् । अत्रैव विद्यमानं काव्यगतव्यापकमौचित्यमपि । वाल्मीकिय–रामायणमेव प्रथमं तथा च भव्यं

निदर्शनं वर्तते महाकाव्यस्य । आलङ्कारिकाः रामायणमेव विश्लेष्य महाकाव्यस्य लक्षणानि प्रस्तुवन्ति ।

'सर्गबन्धो महाकाव्यम्' इति लक्षणस्य प्रथमं सर्वाधिकसुन्दरञ्च लक्ष्यमस्ति रामायणम् । दण्डिनः प्रसिद्धमिदं लक्षणं 'रामायण'मेव आदर्शं मत्वा लिखितं जातमस्ति–

**अलङ्कृतमसंक्षिप्तं रसभावनिरन्तरम् ।**
**सर्गैरनतिविस्तीर्णैः श्राव्यवृतैः सुसन्धिभिः ॥**
**सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जनम् ।**
**काव्यं कल्पान्तरस्थायि जायते सदलङ्कृति ॥**

आननदवर्धनेन स्पष्टतया ' करुणरस' एव रामायणस्य मुख्यरसत्वेन निगदितः । रामायणस्यारम्भस्तथाऽन्तः करुणेन भवति–

**रामायणे हि करुणो रसः स्वयमादिकविना सूचितः 'शोकः श्लोकत्वमागतः' इत्येवंवादिना । निर्व्यूढश्च स एव सीतात्यन्तवियोगपर्यन्तमेव स्वप्रबन्धमुपरचयता ।**

**(ध्वन्यावलोक पृ०२३७)**

वाल्मीकिः समग्रकवि–समाजस्य उपजीव्योऽस्ति–विशेषतः कालिदासस्य भवभूतेश्च । इमौ द्वौ महाकवी रामायणस्य प्रगाढान्वेषणं चक्रतुस्तथा अनयोः

*काव्यात् यो रसः प्राप्यते तत्र रामायणस्य भूमिरेव सहायभूता । यतो हि कालिदासस्य श्रृङ्गाररसः सर्वश्रेष्ठः मन्यते तथाऽपि तस्य करुणरसोऽपि नाऽल्प–प्रभावं जनयति –* ***'अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु '***

*कालिदासस्य करुणवचनानि मानवह्रदये प्रभावमुत्पादयन्ति, तथाऽपि भवभूते उत्तररामचरिते त्वयं करुणरसः पराकाष्ठां उल्लङ्घयति ,किञ्च केवलं भवभूतिरेव सीतावियोगे रुदन्तं रामं पश्यन् पाषाणमपि रोदयति वज्रमपि च विदीर्णयति–*

***' अपि ग्रावा रोदित्यपि दलति वज्रस्य ह्रदयम् ।'***

*आसां करुणोक्तीनां प्रहारेण क्षुब्ध्वा गोवर्धनाचार्येण भवभूतेः भारती 'भूधरस्य कन्या' इत्याख्यायिता ।*

***भवभूतेः सम्बन्धाद् भधरभुरेव भारती भाति ।***

***एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा ॥***

*भवभूतिः करुणं ' एको रसः'–मुख्यो रसं ब्रूते , अर्थात् करूणरसं समस्तरसाणां प्रकृतिर्मन्यते तथाऽन्यरसान् विकृतिः। 'एको रसः करुण एव निमित्तभेदात्' इत्यस्य कथनमूलं रामायणेऽन्वेष्टव्यम् ।*

*महाकाव्यं प्रधानतया वीर–रसप्रधानं भवति, यत्र युद्धघोषः दुन्दुकाभिर्गर्जनं तथा सैनिकानां तर्जनं मनुष्याणां ह्रदये स्फुर्तिरुत्साहञ्च जनयति , अपितु रामायणस्य माहात्म्यं वीर–रसप्रदर्शनाय नास्ति, तथैव नास्ति रामायणस्य गौरवं देव–चरित्रवर्णने । किं तर्हि?*

*आदिकवेरादर्शगुणमण्डितव्यक्तेः परिचय पृष्टे सति नारदेन एको*

नरोऽगुणवनगुणोपेतः भणितः– तर्पुतः श्रूयतां नरः ।

***चतुर्विंशतिसहस्राणि श्लोकानामुक्तवानृषिः।***
***तथा सर्गशतान् पञ्च षट्काण्डानि तथोत्तरम्॥*** *(बाल० ४/२)*

*रामायणरचनाकाले तु कथाख्यान–नाटक–प्रभृत्यभिनवनव–काव्यविधानां विपुला सामग्री व्यवर्धत। तद्यथाऽऽदिकविना रामायण एव स्थाने इमे विविधाः काव्यप्रकाराः सूचिताः–*

***श्रूयतामिदमाख्यानमनयोर्देववचसोः ।***
***विचित्रार्थपदं सम्यग् गायकौ समचोदयत्॥***

***नाराजके जनपदे सिद्धार्था व्यवहारिणः ।***
***कथाभिरभिरज्यन्ते कथाशीलाः कथाप्रियैः ॥***
***तप्यमानं तमाज्ञाय वयस्याः प्रियवादिनः ।***
***आयासं विनयिष्यन्तः सभायां चक्रिरे कथाः ॥***
***वन्दिभिर्वन्दितः काले बहुभिः सूतमागधैः ।***
***गाथाभिरनुरुपाभिः स्तुतिभिश्च परन्तपः ॥***
***ऋषेः कण्वस्य पुत्रेण कण्डुना परमर्षिणा ।***
***शृणु गाथा पुरा गीता धर्मिष्ठा सत्यवादिना ॥***
***आश्चर्यमिदमाख्यानं मुनिना सम्प्रकीर्तितम् ।***
***श्लोक एवास्त्वयं बद्धो नात्र कार्या विचारणा ॥***
***नाटकान्यपरे प्राहुर्हास्यानि विविधानि च ॥***
***कल्याणि बत गाथेयं लौकिकी प्रतिभातिमे ॥***

*रामायण इव महाभारतेऽपि एतादृश–नाना–काव्यानां तदानीं काले प्रचारः लक्ष्यते ।*

*यस्य बुद्धिः परिनयेत् तनितानि सानियेत् ।*

*चित्रार्थैः पूर्वराज्ञां कथाश्रयैः....................॥ (१/१४८/७४)*

*ऊचुर्वेदविदः सर्वे गाथां यां तां निबोध मे ।*

*अत्र गाथा मयोद्गीताः कीर्तयन्ति पुराविदः ॥*

*गाथा अप्यत्र गायन्ति ये पुराणविदो जनाः।*

*रामे निबद्धतत्त्वार्था माहात्म्यं तस्य धीमतः॥ ( हरिवंशपुराण १३/४५/७)*

## *“विविधोपमाः”*

*आदिकविना विशालकल्पनासौन्दर्यं यथा वर्णितं तथा प्रत्यक्षं दृष्टिगोचरमपि भवति । विषयेऽस्मिन् रामायण एवोक्तम्–*

***चिरनिर्वृत्तमप्येतत् प्रत्यक्षमिव दर्शितम्।’ इति ।***

*(वा०रा०१/४/१६)*

*वाल्मीकेर्विषयवस्तुवर्णनान्युदात्तस्वभाववचनैरलङ्कारभूषितानि भवन्ति। यथा अयोध्या–किष्किन्धालङ्कादिपुरीणां वर्णनेन तासामैश्वर्यं वैशिष्ट्यं चारित्र्यं चित्रेषु तद् तद् स्थाने चित्रितम्। वाल्मीकिना वृतान्तविपर्ययेण इमां नगर्यं कथं विपरिवर्तन्त इत्यपि विशदं विवेचितम्। हनुमान् सीतान्वेषणाय यदा लङ्कां व्रजति तदानींतन लङ्काया अवस्था अपरं पुच्छदाहेन दग्धायाः लङ्काया विपरीताऽवस्था एवमेव रावणादीनां नाशावसरे भिन्नैव। किञ्च रामाभिषेकावसरे अयोध्याया अन्यैव शोभा, अरण्यगमनावसरे तद्विपरीतैव । आदिकवि एवंविधविविधावस्थासु वस्तुविपर्ययं कुर्वन् तद्वर्णनं उपमालङ्कारै यथायथं परिपोषयति। यथा अरण्यङ्गतेषु सीतारामलक्ष्मणेषु, भरतस्यागते सति अयोध्यायाम् –*

***अयोध्यायां पुरा शब्दः श्रूयते तुमुलो महान् ।***

***समन्तान्नरनारीणां तमद्य न श्रृणोम्यहम् ॥***

***उद्यानानि हि सायाह्ने क्रीडित्वोपरतैर्नरैः।***

***समन्ताद्विप्रधावद्भिः प्रकाशन्ते समान्यथा ॥***

***तान्यद्यानुरुदन्तीव परित्यक्तानि कामिभिः ।***

**अरण्यभूतेव पुरी सारथे प्रतिभाति मे ॥** *(अयो० ६५/१७–१९)*

*अनन्तरं भरतः रामचरणपादुके नीत्वा यदा रामरहितामयोध्यां प्रविशति तदा तु तस्या नगर्याः स्वरूपमन्यदेवाविर्बभूव–*

***स्निग्धगम्भीरघोषेण स्यन्दनेनोपयान् प्रभुः।***

***अयोध्यां भरतः क्षिप्रं प्रविवेश महायशाः ॥***

***विडालोलूकचरितामालीननरवारणाम् ।***

***तिमिराभ्याहतां कालीमप्रकाशाम् निशामिव ॥***

***राहुशत्रोः प्रियां पत्नीं श्रिया प्रज्वलितप्रभाम् ।***

***ग्रहेणाभ्युदितेनैकां रोहिणीमिव पिडिताम् ॥***

***अल्पोष्णक्षुब्धसलिलां धर्मतप्तविहंगमाम् ।***

***लीनमीनझषग्राहां कृशां गिरिनदीमिव ॥***

***विधूमामिव हेमाभां शिखामग्नेः समुत्थिताम् ।***

***हविरभ्युक्षितां पश्चाच्छिखां विप्रलयं गताम् ॥***

***विध्वस्तकवचां रुग्णगजवाजिरथध्वजाम् ।***

***हप्रवीरामापन्नां चमूमिव महाहवे ॥***

***सफेनां सस्वनां भूत्वा सागरस्य समुत्थिताम् ।***

***प्रशान्तमारुतोद्धूतां जलोर्मिमिव निःस्वनाम् ॥***

***त्यक्तां यज्ञायुधैः सर्वैरभिरुपैश्च याजकैः ।***

***सुत्याकाले सुनिर्वृत्ते वेदिं गतरवामिव ॥***

गोष्ठमध्ये स्थितामार्तामचरन्तिं नवं तृणम् ।

गोवृषेण परित्यक्तां गवां पत्नीमिवोत्सुकाम् ॥

प्रभाकराद्यैः सुस्निग्धैः प्रज्वलद्भिरिवोत्तमैः ।

वियुक्तां मणिभिर्जात्यैर्नवां मुक्तावलीमिव ॥

सहसाचरितां स्थानान्महीं पुण्यक्षयाद् गताम् ।

संहृतद्युतिविस्तारां तारामिव दिवश्च्युताम् ॥

पुष्पनद्धां वसन्तान्ते मत्तभ्रमरशालिनीम् ।

द्रुतदावाग्निविप्लुष्टां क्लान्तां वनलतामिव ॥

सम्मूढनिगमां सर्वां संक्षिप्तविपणापणाम् ।

प्रच्छन्नशशिनक्षत्रां द्यामिवाम्बुधरैर्युताम् ॥

क्षीणपानोत्तमैर्भग्नैः शरावैरभिसंवृताम् ।

हतशोण्डामिव ध्वस्तां पानभूमिमसंस्कृताम् ।

वृक्णभूमितलां निम्नां वृक्णपात्रैः समावृताम् ।

उपयुक्तोदकां भग्नां प्रपां निपतितामिव ॥

विपुलां विततां चैव युक्तपाशां तरस्विनाम् ।

भूमि बाणैर्विनिष्कृत्तां पतितां ज्यामिवायुधात् ॥

भरतस्तु रथस्थः सञ्श्रीमान् दशरथात्मजः ।

वाहयन्तं रथश्रेष्ठं सारथिं वाक्यमब्रवीत् ॥

(अयोध्या० ११४/१–१८)

इत्थं विविधोपमैः महर्षिवाल्मीकिना अयोध्यापुर्याः वैशिष्ट्यं सर्गेऽस्मिन् प्रतिपादितम् । महर्षिणा अशोक वाटिकायां स्थिता सीता असंख्योपमानैर्विशेषिता ।

**तद्यथा–**

*उपवासकृशां दीनां निःश्वसन्तीं पुनः पुनः ।*

*ददर्श शुक्लपक्षादौ चन्द्ररेखामिवामलाम् ॥*

*मन्दप्रख्यायमानेन रुपेण रुचिरप्रभाम् ।*

*पिनद्धां धूमजालेन शिखामिव विभावसोः ॥*

*पीतेनैकेन संवीतां क्लीष्टेनोत्तमवाससा ।*

*सपङ्कामनलंकारा विपद्मामिव पद्मिनीम् ॥*

*पीडितां दुःखसंतप्तां परिक्षीणां तपस्विनीम् ।*

*ग्रहेणाङ्गारकेणेव पीडितामिव रोहिणीम् ॥*

*अश्रुपूर्णमुखीं दीनां कृशामनशनेन च ।*

*शोकध्यानपरां दीनां नित्यं दुःखपरायणाम् ॥*

*प्रियं जनमपश्यन्तीं पश्यन्तीं राक्षसीगणम् ।*

*स्वगणेन मृगीं हीनां श्वगणेनावृतामिव ॥*

*तां स्मृतीमिव संदिग्धामृद्धिं निपतितामिव ।*

*विहतामिव च श्रद्धामाशां प्रतिहतामिव ॥*

*सोपसर्गा यथा सिद्धिं बुद्धिं सकलुषामिव ।*

अभूतेनापवादेन कीर्तिं निपतितामिव ॥

रामोपरोधव्यथितां रक्षोगणनिपीडिताम् ।

अबलां मृगशावाक्षीं वीक्षमाणां ततस्ततः ॥

तस्य संदिदिहे बुद्धिस्तथा सीतां निरीक्ष्य च ।

आम्नायानामयोगेन विद्यां प्रशिथिलामिव ॥

दुःखेन बुबुधे सीतां हनुमाननलङ्कृताम् ।

संस्कारेण यथा हीनां वाचमर्थान्तरं गताम् ॥

(सुन्दर० १५/ १९–२४,३३–३५,३८,३९)

उपर्युक्त सीतावर्णनेन वाल्मीके उपमेयानुरुपमेव उपमानानां सर्जना दृष्टिगोचरा भवति । वर्णनेऽस्मिन् सीतायाः शुचित्वं, पावित्र्यं, सतीत्वं,भीरुत्वं, कृशकायत्वं, अनलङ्कृतत्वं च सकरुणं निरुपितमादिकविना ।

महर्षेरुपमानानि वस्तूनां तत्त्वोद्घाटने मार्मिकानि भवन्तीत्यस्योदाहरणं चित्रकूटे राम–भरत–मिलनावसरे भरतस्य कृते भास्करोपमानेन मिलति–

जटिलं चीरवसनं प्राञ्जलिं पतितं भुवि ।

ददर्श रामो दुर्दर्शं युगान्ते भास्करं यथा ॥[1]

तद्वदेव कैकेयीवरयाचने सति विमूढमनसो दशरथाय–

ऊर्मिमालिनमक्षोभ्यं क्षुभ्यन्तमिव सागरम् ।

उपप्लुतमिवादित्यमुक्तानृतमृषिं यथा ॥[1]

---

१. पद्यमिदं वटोदरसंस्करण प्रक्षिप्तमस्ति। मुम्बई सं. २/१००/१

अयमादिकविः प्रायश अरण्येभ्यः प्राकृतिकपदार्थेभ्यश्चैवोपमानानि संगृह्णाति । कवे उपमानेष्वर्णवो व्योमश्च श्लाघ्यतमौ। दुःखदैन्य–शोक–मोह–करुणोत्साहादि भावान् विशदीकृत्य नायकचरित्रचित्रणाय प्रायशः समुद्रमेव उपमानत्वेन उपस्थापयति।

सुमन्त्रः कैकयीं प्रति–

**यन्महेन्द्रमिवाजय्यं दुष्प्रकम्प्यमिवाचलम् ।**

**महोदधिमिवाक्षोभ्यं संतापयसि कर्मभिः ॥ (अयो०३५/७)**

**समुद्रमिव निर्वेगमाश्वासयत लक्ष्मणः ।**

**स तेन राजा दुःखेन भृशमर्पितचेतनः ।**

**अवगाढः सुदुष्पारं शोकसागरमब्रवीत् ॥**

**रामशोकमहावेगः सिताविरहपारगः ।**

**श्वसितोर्मिमहावर्तो बाष्पवेगजलाविलः ॥**

**बाहुविक्षेपमीनोऽसौ विक्रन्दितमहास्वनः ।**

**प्रकीर्णकेशशैवालः कैकेयीवडवामुखः ॥**

**ममाश्रुवेगप्रभवः कुब्जावाक्यमहाग्रहः ।**

**वरवेलो नृशंसाया रामप्रवाजनायतः ॥**

**यस्मिन् बत निमग्नोऽहं कौसल्ये राघवं विना ।**

**दुस्तरो जीवता देवि ममायं शोकसागरः ॥**

---

२. **अयोध्या० १८/६**

*(अयो०५९/२८–३२)*

*जनवृन्दोर्मिसंघर्षहर्षस्वनवृतस्तदा ।*

*बभूव  राजमार्गस्य सागरस्येव निःस्वनः ॥*

*(अयो०५/१७)*

- ततस्तदिन्द्रक्षयसंनिभं  पुरं दिदृक्षुभिर्जानपदैरुपाहितैः ।

  समन्ततः सस्वनमाकुलं बभौ समुद्रयादोभिरिवार्णवोदकम् ॥

  (अयो०६/२८)

- शोकव्यसनविस्तीर्णे  मज्जन्ति दुःखसागरे । (अयो०८/२१)
- सागरह्रदसंकाशात्सुमन्त्रोऽन्तः पुराच्छुभात् । (अयो०१४/६८)
- पर्वसूदीर्णवेगस्य  सागरस्येव  निःस्वनः । (अयो०६/२७)
- तदिदं न विभात्यद्य विहीनं तेन धीमता ।

  *व्योमेव शशिना हीनमप्शुष्क इव सागरः ॥ (अयो०७२/२०)*

*इत्थं महर्षिवाल्मीकिना पदार्थान् प्रत्यक्षीकर्तुं वृक्ष–नदी–पर्वत–पुष्पादीनि उपमानत्वेन प्रायशः प्रस्थापितानि। यथा लङ्कायुद्धे वीरान् लक्ष्यीकृत्य–*

*स्रवन्तं रुधिरं वक्त्राद् वर्षमेघमिवोत्थितम् ।*

*रराज शोणितोत्सिक्तो गिरिः प्रस्रवणैरिव ।*

*इन्द्रजित् समरे शूरः प्ररुढ इव सानुमान् ।*

*तयोः कृतव्रणौ देहौ शुशुभाते महात्मनोः ।*

*सपुष्पाविव निष्पत्रौ वने शाल्मलिकिंशुकौ ।*

**बाणजालैः शरीरस्थैरवगाढैस्तरस्विनौ ।**

**ववर्ष शरवर्षाणि वर्षाणिव पुरन्दरः ।**

**रणाग्रे समरश्लाघी त्रिश्रृङ्ग इव पर्वतः ।**

**प्रहृष्टाः शरवर्षेण प्रावृट्काल इवाम्बुदाः ।**

**बलार्णवौ सस्वनतुः सुभीमं**

**महार्णवौ द्वाविव भिन्नवेलौ ।**

**प्रविवेशारिसेनां स पतङ्ग इव पावकम् ।**

**अथ प्रदीप्तैर्मुसलैर्नाराच्चैश्चापि रावणः ।**

**अभ्यवर्षत् तदा रामं धाराभिरिव तोयदः।**

*इत्थं रामायणकालपर्यन्तं न केवलं तासां तासां काव्यविधानाम् आविष्कारः संवर्धनं चाभवताम्, विविधनाटकनृत्यनृत्तशिल्पकलानां पुराकथानां गायनस्यापि कुशिलवैः प्रचारोऽक्रियत। रामायणवत् रमणीय-सर्वाङ्गसुन्दर-काव्यस्य रचनायै भूमिकेयं सर्वथाऽवश्यकी प्रतीयते स्म। यथा च सर्जनात्मकसाहित्यस्य विपुला सामग्री तदा विकसिता तथा च वैचारिकतत्त्वमपि संवर्धितम्।*

**आश्चर्यमिदमाख्यानं मुनिना सम्प्रकीर्तितम्।**
**परं कवीनामाधारं समाप्तं च यथाक्रमम्॥**[१]

*महर्षिवाल्मीकिवर्णितमिदममाश्चर्यमयं प्रचुरकाव्यतत्त्वसंवलितं महाकाव्यं परवर्तीकवीनां कृते उत्तमाऽधारशिला वर्तते।*

**कविन्दुं नौमि वाल्मीकिं यस्य रामायणी कथाम् ।**

---

*१ . वा०रा०बाल०४/२६*

*चन्द्रिकामिव चिन्वन्ति चकोरा इव साधव ॥*[1]

# *२.३.वाल्मीकिरामायणस्य दार्शनिकमहत्त्वम्*

*भारतीयवाङ्मये महर्षिवाल्मीकिप्रणितरामायणमादिकाव्यं प्रचक्षते । काव्यस्य सम्बन्ध अथ तः प्रारभ्य इति पर्यन्तं भवति । काव्याय धर्मे–तिहास–दर्शन–लोकजीवन–ऽऽचारविचारा–ऽऽम्नायाः ग्राह्या भवन्ति । उक्तञ्च–*

***" तदेव शाश्वतमुच्यते , यस्य मूले दार्शनिकचेतना प्रतिष्ठिता भवति "***

*दर्शनं तु बहूषु काव्येषु दृश्यते किन्तु रामायणस्य आदिकाव्यत्वात्, वाल्मीकेः द्रष्टृकवित्वात् दार्शनिकतया रामायणम् अन्यतमं सर्वेषु ग्रन्थेषु । अत्र केचन रामायणस्यदार्शनिकपक्षप्रतिपादकबिन्दूनुल्लिख्य केषुचित् विचारं कर्तुमिच्छामि । तद्यथा –*

- दर्शनस्य व्युत्पत्तिः स्वरुपञ्च ।
- रामायणे दर्शनस्य स्थानं स्वरुपञ्च ।
- रामायणे वेदोपनिषदोः प्रभावः ।
- रामायणे यज्ञकर्म तथा तपः ।
- रामायणे वर्णितो देववादः ।
- रामायणे ईश्वरजीवप्रकृतिः ।
- रामायणे सृष्टिप्रलयस्य सन्केतानि ।
- रामायणे माया चमत्कारश्च ।
- रामायणे जगज्जीवयोर्विमर्शः ।
- रामायणे स्वभाववादः ।
- रामायणे लोकहितम् अवतारवादश्च ।
- रामायणे दार्शनिकजीवनमूल्यानि ।

---

[1]. *शार्ङ्गधर संग्रह*

- रामायणे धर्मस्य व्यवस्था स्थापना च ।
- रामायणे प्रवृत्तिनिवृत्तिमार्गः ।
- रामायणे आस्तिकता तथा आस्था ।
- रामायणे धर्मस्वरुपं स्थानञ्च ।
- रामायणे विशिष्टमान्यताः ।
- रामायणे दार्शनिकशब्दाः ।
- रामायणे कालतत्त्वविचारः ।
- रामायणे योगप्रसङ्गदीव्यता ।
- रामायणे मनस्तत्त्वम् ।
- रामायणे मोक्षतत्त्वम् ।
- रामायणे दैववादः पौरुषवादश्च ।
- रामायणे यथार्थवादः आदर्शवादश्च ।
- रामायणे भौतिकाध्यात्मिकपक्षः ।
- रामायणे विज्ञानम् ।
- रामायणे जीवनोपयोगीदार्शनिकसन्देशः ।

## दर्शनस्य व्युत्पत्तिः स्वरुपञ्च–

*शाब्दिकदृष्ट्या दर्शनशब्दः दृश् (दृशिरप्रेक्षणे) धातुना करणार्थे ल्युट् (अन्) प्रत्ययं प्रयुज्य निष्पन्नो भवति । । सामान्यतया " दृश्यते अनेन इति दर्शनम् " अर्थात् मनुष्याणां या वस्तुविवेचिनी तथा आत्माऽनात्माबोधिनी चिन्तनप्रकृतिः भवति तदेव दर्शनम् उच्यते । येन उपकरणेन इदं जगद्, इदं वस्तु जातं, ब्रह्म जीवात्मा प्रकृतिश्च, यथा तथ्येन दृश्यते निरीक्ष्यते परीक्ष्यते विविच्यते तद् दर्शनम्। ब्रह्म–ईश्वर–जीव–आत्मापुरुषादयोऽनुयोगा यत्र सूक्ष्मरुपेण विविच्यते तद् दर्शनम्। अतः समग्रमपि आध्यात्मिकं आधिभौतिकं च विवेचनं दर्शनान्तर्गतं भवति।*

*जीवनस्य सत्यं किमस्ति अयमेव मुख्यान्वेषणविषयः दर्शनस्य । कारणं तत् सत्यप्रेक्षणमेव दर्शनं भवेत् । आत्मदर्शनमेवास्य प्रधानविषयः । ईशावास्योपनिषदि स्पष्टतया कथितमस्ति–*

**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।**

**तत्त्वं पूषन्नपावृणु सत्य–धर्माय दृष्ट्ये ॥** *(ईशा.उप.१५)*

*अर्थात् सुवर्णपात्रेण सत्यस्य वदनं पिहितमस्ति । हे पूषन् ! भवान् तदावरणं अपाकरोतु, येन सत्यस्य दर्शन स्यात् । श्लोकेऽस्मिन् दृष्ट्ये शब्दो हि दर्शनस्य प्रतिरुपेण स्वीकृतः ।*

*दर्शनस्य शाब्दिकार्थः प्रेक्षणम् । मनुष्याणां प्रेक्षणस्य सम्बन्धः प्रत्यक्षतः नेत्राभ्यां भवति अतः अनया रीत्या प्रेक्षणमिदं दर्शनं वक्तुं शक्यते । किन्तु अत्र प्रेक्षणस्य स्पष्टार्थः – प्रकृष्टरुपेण प्रेक्षणम् । अर्थात् स्वान्तश्चक्षुर्भ्यां प्रेक्षणमेव दर्शनस्य अभिधेयः । जीवनस्य सत्यं स्पष्टरुपेण ज्ञातुं दिव्यचक्षुषो आवश्यकता भवति । वस्तुत आत्मा–मोक्ष–पुनर्जन्म–कर्मवाद–जीवन–मृत्वादीनां यथार्थज्ञानं हि दर्शनम् अस्ति ।*

*कश्चन वैदेशिकस्य भावाभिव्यक्तिः –* ***'यदि ईश्वरः सत्यासत्यान्वेषणयोः कञ्चित् एकं चेतुम् अधिकारं प्रयच्छेत् तर्हि अहं सत्यान्वेषणमेव स्वीकरिष्यामि' ।***

*वस्तुतः सत्यस्य अन्वेषणमेव दर्शनस्य प्राणोऽस्ति । अन्तश्चक्षुर्भ्यां कृतं सुव्यवस्थितचिन्तनं दर्शनमभिधीयते । दुःखस्य निवृत्तिः आनन्दस्य प्राप्तिश्चेतद्द्वयं दर्शनस्य लक्ष्यम् । यथा– मानवस्य मूलोत्पत्ति कथं जाता ? तस्य समस्याः तं कथं आन्दोलयति ? का नाम प्रकृतिः ? ब्रह्माण्डस्य किं स्वरुपम् ? पदार्थमस्तिष्कयोर्मध्ये काः समस्याः उत्पद्यन्ते ? आत्मा कथं मुक्तः स्यात् ? आसां समस्यानां समाधानं दर्शनमेव करोति ।*

*कस्मात् , कुतः , कुत्र इति प्रश्नत्रयाणां समाधानं दर्शनेनैव प्राप्यते । दर्शनं प्रपञ्चात् प्रारभ्य सति लीनं भवति । दर्शनेन वस्तुजगतः समस्यानां समाधानं भवति ।*

*अस्माकं दर्शनं पुरुषार्थपरकम् अस्ति । तत्र पुरुषार्थचतुष्ट्यस्य चिन्तनं वर्तते।*

***यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः ।** (वै०सू०१-१-१२)*

*वैशेषिकदर्शनस्य सूत्रस्यास्यार्थः स्पष्टोऽस्ति यत् येन अस्मिन् लोके तथा च परलोके अभ्युदयः स्यात्, धर्मार्थकाममोक्षाणां पुरुषार्थप्राप्तिः स्यात् स एव धर्मः । धर्मदर्शनयोः द्वयोः प्रयोजनदृष्ट्या महत्त्वम् अस्ति । मनुस्मृत्याम् उक्तञ्च-*

***न हि अनध्यात्मवित् कश्चित् क्रियाफलमुपाश्नुते ।***

*अध्यात्मविद् एव धर्मस्वरुपं परिजानाति । गीतायामपि ज्ञानभक्तिकर्मणां समन्वयः कृतोऽस्ति । धर्मं दर्शनोपरि अधिष्ठाप्य मनुसंहितायमपि उक्तम्-*

***सम्यग्दर्शनसम्पन्नः कर्मभिर्न निबध्यते ।***

***दर्शनेन विहीनस्तु संसारं प्रतिपाद्यते ॥** (मनु०६-७४)*

*अर्थात् येन आत्मदर्शनं कृतमस्ति, स पुनः सांसारिकबन्धने न बध्नाति , किन्तु येन आत्मदर्शनं कृतं नास्ति, स जन्ममरणबन्धनात् कदापि मुक्तः न भवति ।*

## ❖रामायणे दर्शनस्य स्थानं स्वरुपञ्च -

*वाल्मीकिरामायणं देवासुरसंग्रामेति नाम्नाऽपि अभिधीयते । रामायणस्य मूले देवासुरसंग्रामो आसीत् अतः रामायणं दैव्यासुरीसंस्काराणां द्वन्द्वात्मकं काव्यमप्युच्यते । महाकाव्येऽस्मिन् जीवनदर्शनस्य वा मूल्यबोधस्य प्रकारद्वयस्य*

संघर्ष अस्ति । द्वन्द्वस्यास्य वास्तविकं रूपमस्ति देहदेहातीतयोर्मध्ये संघर्षः यं अद्यतनीयदार्शनिकभाषायां 'अस्तित्ववाद'स्य तथा 'प्रत्यभिज्ञा'याः संघर्षः वक्तुं शक्यते ।[१]

वस्तुतः असुरदर्शने सर्वेमूल्याः आदर्शाश्च देहाश्रिताः मताः । असुराणां मूल्यानि दैहिकास्तित्वं पुरस्कृत्य विकसितानि । इन्द्रेण शतवर्षाणि यावत् ब्रह्मचर्यस्य पालनं कृत्वा प्रजापतेः आत्मज्ञानं प्राप्तम् । अनेन कारणेन देवाः समस्तलोके सम्पूर्णकामनानां स्वामिनः सञ्जाताः तथा असुराः केवलं दैहिककामनाक्षेत्रे सिमिताः जाताः । रामायणे द्वयोः प्रकारयोः मूल्ययोः लक्ष्यीकृत्योक्तम्–

**धर्मो हि श्रूयते पक्षो ह्यमराणां महात्मनाम् ।**

**अधर्मा रक्षसां पक्षो ह्यसुराणां च राक्षस ॥**[२]

अयोध्यायाः तथा लङ्कायाः सभ्यता संस्कृतिश्च परस्परप्रतिस्पर्धिनि दृश्यते । एकतः मानवेन्द्रमनुनिर्मिता आदर्शनियमिता च अयोध्यानगरी , अन्यतः शुभापुरी रावण बाहुपालिता लङ्कानगरी विद्यते । लङ्कायामपि स्वाध्यायः जपः तपश्चास्ति । तदेवान्तरं यत् तत्रत्य जीवनं राक्षसपरिचालितमासीत् । यद्यपि देवानामाचरणं धर्मसंयुतमुच्यते तथाऽसुराणामधर्मसंवलितं तथापि नूतनमूल्याङ्कनाधारेण रामायणे द्वन्द्वधर्मः प्रतिधर्मे मतः ।[३] रावणः धर्मस्य अस्वीकारात्मकस्थितेः प्रतिकं नास्ति अपितु रावणस्य संपूर्णं बलमुपासनाश्रितं वर्तते किञ्च स धर्मस्य प्रतिपक्षप्रतिधर्मं वदति । रामः धर्मस्य 'नारयणपक्ष'स्य प्रतिनिधिरस्ति तर्हि रावणः धर्मस्य 'प्रतिनारायणपक्ष'स्य प्रतिनिधिरस्ति । रावणः प्रतिसत्यवक्ता अस्ति । परम्

---

[१]. धर्म रामायण – अस्तित्व, प्रत्यभिज्ञा और समन्वय का दर्पण : कुबेरनाथ राय ।

[२]. रामा. ६–३५–१३

[३]. कुबेरनाथ राय : धर्मयुग २० अक्टूबर, ६८, पृष्ठ १०

असत्यवक्ता नास्ति ।[1] रामः नारायणोऽस्ति । तस्य जीवनदर्शनमस्तित्वस्य शुद्धप्रत्यभिज्ञानाश्रितमस्ति । रावणः प्रतिनारायणोऽस्ति । तस्य जीवनदर्शनमस्तित्वस्य तात्कालिकसद्यानुभूत्याश्रितमस्ति । अस्तित्वं यत्किमपि रूपे तत्कालं, सद्यः वा समीपं च भवति तद्रूपं भौतिकम् – भौतिकस्पर्शः ,भौतिकस्वादादि । किन्तु अस्तित्वं स्वस्य शुद्धप्रत्यभिज्ञाने आत्मिकमस्ति । अतः राम–रावणयोः द्वन्द्वः प्रत्यभिज्ञा तथाऽस्तित्ववादस्य द्वन्द्वमस्ति ।[2]

जीवनस्येमान्येव द्वन्द्वात्मकसूत्राणि रामायणकथायां गुम्फितानि सन्ति । यदि व्यापकपरिप्रेक्ष्यं विहाय लघु–लघुधरातलेषु पश्यामश्चेत् रामायणे कारुण्यस्य प्रमुखता तथा त्यागतपसोः महत्ता उद्घोषिता वर्तते । विश्वामित्रस्तथा वशिष्ठः राजसिकसात्विकशक्त्योः प्रतिकौ स्तः । मन्थरा सुखभोगस्य कूटदृष्टिरस्ति तथा जाबाल्यपि सुखभोगस्य पक्षपोषकः प्रतीयते । वैचारिकदृष्ट्या रामायणस्य पात्राणि स्वेषु प्रतिकानि सन्ति । स्थूलरूपेण अयोध्यासम्बन्धिभूभागः एवं लङ्का द्वयोः दर्शनयोः संस्कृत्योश्च स्थाने वर्तेते किन्तु देवत्वासुरत्वस्य न कापि भौगोलिकसीमा निर्धारिता भवेत् । त्यागादर्शनीतिमान् विभीषणः लङ्कामधिवसति तथा सौख्यवादीजाबालिः चित्रकूटे अयोध्यावासीनां समाजे उपविश्य रामं शिक्षयति यत् न कश्चित् कस्यचित् भ्राता वा पितरः अत अयोध्यां प्रत्यागत्य राज्यभोगस्य सेवनमेव श्रेयस्करमिति । विना दार्शनिकपृष्ठभूम्या न काऽपि कृतिः कालजयी भवितुमर्हति । रामायणस्य सर्वदेशीया सर्वकालिकाश्च महत्ता अस्ति तस्य व्यापकजीवनदर्शनकारणात् यत्र आलोकपक्षस्य समानान्तरम् अन्धकारपक्षस्यापि स्थापना कृताऽस्ति । रामायणे वैदिकोपनिषदिकस्यापि चिन्तनसूत्राणि यथोचितानि प्राप्यन्ते ।

## रामायणे ईश्वर–जीव–प्रकृत्यादीनि तत्त्वानि

---

१. कुबेरनाथ राय : धर्मयुग १५ अक्टूबर, ६७, पृष्ठ १०

२. कुबेरनाथ राय : धर्मयुग १५ अक्टूबर, ६७, पृष्ठ १०

वैदिककालात् अद्यावधि आस्तिकचिन्तकैः चराचरसंसारस्य उद्भव–स्थिति–संहारकर्तृशक्तित्वेन ईश्वरः स्वीकृतः । अर्थाद् ईश्वरः ***"सर्गस्थितिनाशहेतु"*** रस्ति । वैदिककाले इन्द्र–अग्नि–यमादीनामानि एकैवैश्वरवाचाकानि आसन् किन्तु परवर्तीकाले नामान्यैतानि रूपाणि वाऽवताराण्यभवन्; परन्तु मूलावधारणायां न कश्चनभेदो दृश्यते । भारतीयदर्शनैः ईश्वरस्य मूलस्वरूपं क्षुण्णमकुर्वन् रञ्जितं तु कृतमस्त्यैव ।

स्वामीदयानन्दसरस्वत्या स्वप्रख्यातग्रन्थसत्यार्थप्रकाशे ईश्वरवाचकशब्दानां व्युत्पत्ति कृताऽस्ति । यथा

***ईश्वरः***– य ईष्टे सर्वेश्वर्यवान् वर्तते स ईश्वरः ।[१]

***आदित्यः***– न विद्यते विनाशो यस्य सोऽमदितिः अदितिरेव आदित्यः ।

***प्राज्ञः***–प्रकृष्टतया चराचरस्य जगतो व्यवहारं जानाति स प्राज्ञः ।

***विष्णुः***– वेवेष्टि व्याप्नोति चराचरं जगत् स विष्णुः ।

***ब्रह्मा***– यःअखिलं जगत् निर्माणेन बृंहति वर्धयति स ब्रह्मा ।

***शंकरः***– यः शं कल्याणं सुखं करोति स शंकरः । इत्यादयः ।

***महर्षिवेदव्यासानुसारं*** संसारस्य उत्पत्तिस्थितिलये ईश्वर एव कारणम् । उक्तञ्च–

---

१. सत्यार्थप्रकाश पृ.१३

**"जन्माद्यस्य यतः ।[1]"**

**पतञ्जल्यनुसारं** *ईश्वरः क्लेश–कर्म–कर्मफल–कामनादिभिः विनिर्मुक्तोऽस्ति। यथा–*

**"क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुष विशेष ईश्वरः।[2]"**

**महर्षिवाल्मीकिना रामायणे** *ब्रह्म–ईश्वर–परमेश्वर–पुरुष–स्वयम्भू–पुरुषोत्तम–वासुदेव–नारायण–जनार्दन–विष्णु–महेश्वर–महादेव–रुद्रादीनां ईश्वरवाचकत्वेन प्रयोगो विहितः । एतेषां देवानां व्यक्तित्वं वाऽचरणं रामायणे पौराणिकमस्ति, किन्तु तात्त्विकं रूपं वेदोपनिषदैः सम्मतं वर्तते । वाल्मीकिरामायणे ईश्वरवाचकशब्दाः यथा–*

**"लोककर्ता ब्रह्मा ।" "भूतकर्तृ ।""स्वम्भूर्भगवान् ।" "ब्रह्मा प्रजानां प्रभुरीश्वरः ।" ब्रह्माणमिव शाश्वतम् ।" "स्वयम्भूर्भगवानचिन्त्यः ।" "त्रयाणामपि लोकानामादिकर्ता स्वयं प्रभुः ।" "विष्णुमव्ययम् ।" "वासुदेवं सनातनम् ।" "स्थाणुं देवमचिन्त्यम् ।" "महादेवोऽक्षरोऽव्ययः ।"** *आदयः शाश्वत–नित्य–अव्यय–अव्यक्तप्रभव–अक्षर–अचिन्त्य–अप्रमेयादिष्वर्थेषु प्रयुक्ताः ।*

*वाल्मीकिरामायणस्य उत्तरकाण्डे महर्षिणा निगदितम्–*

**"जगत्सृष्ट्यन्तकर्तारमजमव्यक्तरूपिणम् ।**

---

*[1]. ब्रह्मसूत्र १–२*

*[2]. योगसूत्र १–२४*

**आधारं सर्वलोकानामाराध्यं परमं गुरुम् ॥[1]"**

अर्थात् सर्वशक्तिमान् तात्त्विकरुपे जगतः रचयिता तथा संहारकर्ता अस्ति । स अजन्मा, अव्यक्तरुपः, सम्पूर्णलोकानामाधारः, आराध्यः गरिमामयश्चाऽस्ति । नैतावदेव अपितु स अचिन्त्यः, अव्यक्तः, अनन्तरुपश्च सन् एकैवाऽस्ति । स अनादिस्तथा अनिर्देश्योऽस्ति । स देवानामपि देवस्तथा तत्त्वानां परमतत्त्वमस्ति ।

## सत्यमेव परमतत्त्वम्

**"सत्यमेकपदं ब्रह्म सत्ये धर्मः प्रतिष्ठितः ।**

**सत्यमेवाक्षया वेदा सत्येनावाप्यते परम् ॥[2]**

अर्थात् ब्रह्म सत्यस्वरुपमस्ति, तत् सत्यमेव धर्मवेदस्य आधारः स्वरुपञ्चास्ति । तेनैव सत्येन परमतत्त्वस्य प्राप्तिर्भवति । महर्षिवाल्मीकिना ब्रह्म–ईश्वरयोर्मध्ये नाऽन्तरं वा भेदः कृतः । कारणं वाल्मीकिः ब्रह्मवद् एव ईश्वरः सत्य–स्वरुपः प्रतिपादितः । यथा–

**"सत्यमेवेश्वरो लोके सत्ये धर्मः सदाश्रितः ।**

**सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् ॥[3]"**

---

[1]. वाल्मीकिरामायण ७/६/१२

[2]. वाल्मीकिरामायणम् २/१४/७

[3]. वाल्मीकिरामायणम् २/१०९/१३

उपनिषत्सु तत् परमज्योतिस्वरुपेणैव सर्वं ज्योतिर्मानिस्तीत्यस्मिन् विषये गदितं यत् **"तस्य भासा सर्वमिदं विभाति"** इत्यस्यैव व्यञ्जना कृताऽस्ति । रामायणे रामस्य तात्त्विकं रुपं वर्णयन् कथितम् –

**"सूर्यस्यापि भवेत् सुर्यो ह्यग्नेरग्निः प्रभोः प्रभुः ।**

**श्रियाः श्रीश्च भवेदग्रया कीर्त्याः कीर्तिः क्षमा–क्षमा ॥[१]"**

अर्थात् स सूर्याणां सूर्यः, अग्नीनाम् अग्निः, समर्थानां समर्थः, सौन्दर्यानां परमसौन्दर्यम्, कीर्तीनां कीर्तिः, क्षमाणाञ्च क्षमारुपोऽस्ति ।

## प्रकृतितत्त्वम्–मायातत्त्वम्

प्रकृतिशब्दः मूलतः साङ्ख्यदर्शनस्याऽस्ति, यत्र काराणविकृत्योः कार्यरूपेण प्रतिपादितमस्ति । प्रकृतिरियं जगतः मूलकारणम् । इयं प्रकृतिः त्रिगुणात्मिका भवति । एतद्विपरितं साङ्ख्ये पुरुषः न तु कारणम् नैव कार्यम् । स असङ्गः, उदासीनः, अकर्ता च । रामायणे वाल्मीकिना प्रकृतिपुरुषयोः शाब्दिकव्यवहारः भवतुनाम साङ्ख्यानुमोदितत्वेभ्यः न कृतस्तथाऽपि निम्नोक्तश्लोकात् या ध्वनिः निर्गच्छति, सा अवश्यं साङ्ख्येन सह सख्यम् स्थापयति । यथा–

**"एषा प्रकृतिरस्माकं पुरुषस्त्वं नरेश्वर ।[२]"**

---

[१]. वाल्मीकिरामायणम् २/४४/१५

[२]. वा०रा० ४/१७/३०

मायाप्रकृत्योरन्तरं वेदान्तसाङ्ख्याधारेण भिन्न–भिन्नरूपेण भवति, किन्तु उपनिषत्काले माया तथा प्रकृतिः एकत्वेनैव स्वीकृताऽस्ति । <u>श्वेताश्वेतरोपनिषदानुसारं</u>–

**"मायां तु प्रकृतिं विद्यात् मायिनं परमेश्वरम् ।**

**तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥[१]"**

माया तथा प्रकृतिः मायावी तथा मायापतिः परमेश्वररूपोऽस्ति । श्रीमद्भगवद्गीतायामपि भगवता कृष्णेन मायाप्रकृतिमेकीकृत्य एतदेवोक्तम्–

**"अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।**

**प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥[२]"**

**वाल्मीकिरामायणे** महर्षिणा परमतत्त्वेन सह मायायाः सम्बन्धस्तु गीतायाः प्राक् संस्थापितमस्ति । यथा–

**"अचिन्त्यमव्यक्तमनन्तमेकं स्वमायया साम्प्रतमागतं वा ।"**

## <u>रामायणे आत्मतत्त्वम्–जीवतत्त्वम्</u>

---

१. श्वेता० ४/१०

२. श्रीमद्भगवद्गीता;

वेदेषु आत्माशब्दः परमतत्त्वार्थेऽपि प्रयुक्तः । तद्वदेव उपनिषत्सु आत्मतत्त्वं परमात्मतत्त्वेन सह मेलयित्वा नैकेषु स्थानेषु प्रस्तुतमस्ति । बीजोऽयं अग्रेगत्वा जीवब्रह्मयोः स्वरुपे अद्वैतवेदान्ते पल्लवितः जातः ।

माण्डुक्योपनिषदि जीवस्य चतस्र अवस्था प्रतिपादिताऽस्ति । यथा–

जाग्रत्–स्वप्न–सुषुप्ति–तुरीयत्वेन । निष्कर्षोऽयं यत् आत्मा मनसा वाण्या च अगोचरे सन् अपि मनोवाण्याः आधारोऽस्ति ।

महर्षिवाल्मीकिना रामायणे आत्मतत्वपरमात्मतत्त्वयोर्भेदः न कृतः, कारणं ब्रह्मा–विष्णु–महेश्वराद्यवतारा एव सृष्टिस्थितिसंहारकर्तारश्च सन्ति । परमात्मा सर्वव्यापि विद्यते तथा जीवः नित्यः सन् अपि सीमितोऽस्ति । अत एव जीवो देहं त्यक्त्वा कर्मानुसारं फलभोगाय लोक–लोकान्तरं गच्छति । उकतञ्च रामायणे–

**"देवलोकमितो गत्वा देहं त्यक्त्वा महीतले ।[१]"**

रामस्य शब्देषु वाल्मीकिना स्पष्टीकृतम्–

**"नात्मनः कामकारो हि पुरूषोऽयमनीश्वरः ।**

**इतश्चेतरतश्चैनं कृतान्तः परिकर्षति ॥[२]"**

अर्थात् जीवोऽयं ईश्वरवद् स्वतन्त्रः नाऽस्ति । अतः न कश्चन स्वेच्छया किमपि कर्तुमर्हति । कृतान्त(नियति) द्वारा जीवः इतस्ततः कर्षति ।

१. वाल्मीकिरामायणम् ३/७/१

२. वाल्मीकिरामायणम् २/१०५/१५

## रामायणे प्राणतत्त्वम्

प्राणतत्त्वम् आत्मतत्त्वात् भिन्नं नास्ति । कारणं प्राणस्य शरीरात् निर्गमनमेव आत्मनः शरीरात् सम्बन्धविच्छेदः कथ्यते । वाल्मीकिरामायणे आदिकविना अयोध्याकाण्डे भणितम्–

**"बहिश्चर इव प्राणो बभूव गुणतः प्रियः ।[1]"**

तद्वदेव अरण्यकाण्डेऽपि लिखितम्–

**"उपरुध्यन्ति मे प्राणा दृष्टिर्भ्रमति राघवः ।[2]"**

जटायुः रामं वदति यत् मम प्राणस्य गति मन्दताम् एति । इत्यादिभिः प्रयोगैः वाल्मीकिना प्राणतत्त्वस्य महत्त्वं प्रतिपादितमस्ति । वस्तुतः वायुः व्यपकतत्त्वमस्ति ।

उक्तञ्च चरकसंहितायाम् –

**"वायुरायुर्बलं वायुर्वायुर्धाता शरीरिणाम् ।**

**वायुर्विश्वमिदं सर्वं प्रभुर्वायुश्च कीर्तितः ॥[3]**

इत्थं महाकविना दार्शनिककविवत् प्रकृति–परमात्मा–जीवात्माऽदीनां दार्शनिकतत्त्वानां स्वशैल्यां प्रस्तुतिरस्माकं पुरतः विहिताऽस्ति । शैल्यामस्यां वेदोपनिषदोः प्रभावोऽपि अवश्यमेव दृष्टिपथे आयाति ।

---

१. वाल्मीकिरामायणम् २/१/११

२. वाल्मीकिरामायनम् ३/६८/११

३. चरकसंहिता

# रामायणे सृष्टि–प्रलयतत्त्वम्

*संसारेऽस्मिन् सृष्टिप्रलयादिविषयाः प्रारम्भतः कुतूहलप्रदाः । सृष्टेः विषयस्य आरम्भः ऋग्वेदात् प्रारभते । तत्र एकस्मिन् स्थले प्रश्नः क्रियते यत् तदा को वृक्षः, किं वनं च आसीत् येन द्यावापृथ्व्याः तक्षणमभवत् ?*

***"किं कारणं ब्रह्म कुतः स्म जाता जीवामः केन च स्व प्रतिष्ठाः ।[1]"***

*प्रश्नस्यास्योत्तरे तैतिरीयब्राह्मणः गदति यत् ब्रह्म एव स वृक्षः, ब्रह्म एव तद् वनं येन द्यावापृथ्वी निर्मिता । यथा–*

***"यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति,***

***यत्प्रत्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति ।[2]"***

*उपनिषदाम् अयं तर्कः तत् तत्त्वमेव चरमसत्यं ज्ञातव्यं यत् येन समस्तवस्तूनामुत्पत्ति जाता स्यात् । यत् समस्तानाम् आधारः स्यात् । यस्मिन् समस्तानां लयः स्यात् ।*

*विषयेऽस्मिन् स्मृतिकाराणां पक्षोऽपि दृष्टव्यः । यथा मनुना प्रोक्तम्–*

***"आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।***

***अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥[3]"***

---

*[1]. श्वेताश्वतरोपनिषद् १–१*

*[2]. तैतिरीयोपनिषद् ३–१*

*[3]. मनुस्मृति १–१–५*

*अर्थात् विश्वमिदं महाप्रलयकाले अन्धकारयुक्तं, लक्षणैः रहितं, संकेतैरयोग्यं तथा तर्कस्वरुपाभ्याम् अज्ञेयञ्चासीत् । सर्वं निद्रावस्थायामैवासीत् ।*

***महर्षिवाल्मीकिना*** *सृष्टिक्रमे (ब्रह्मोद्भवसन्दर्भे) अव्यक्त–आकाश–जलतत्त्वादीनाम् उद्धरणं कृतमस्ति ।*

***"प्रजापतिः पुरासृष्टा अपः सलिलसंभवः ।***

***तासां गोपायने सत्वानसृजत् पद्मसम्भवः ॥[१]"***

***सर्वं सलिलमेवासीत् पृथिवी तत्र निर्मिता ।***

***ततः समभवद् ब्रह्मा स्वयम्भूर्दैवतैः सह ॥[२]"***

*रामायणकारानुसारं प्रजापतिना जलराशेः रक्षणाय नैकप्रकारकजल–जन्तूनाम् उत्पत्तिः कृता । वाल्मीकिरपि ऋग्वेदस्य पद–पद्धतिमनुसृत्य लिखति–*

***" मुखतो ब्राह्मणा जाता उरसःक्षत्रियास्तथा ।***

***ऊरूभ्यां जज्ञिरे वैश्याः पद्भ्यां शूद्रा इति श्रुताः ॥*** *(रामा०२/१४/३०)*

## रामायणे मायाचमत्कारादितत्त्वानि

---

*१. वाल्मीकिरामायणम् ७/४/९*

*२. वाल्मीकिरामायणम् २/११०/३*

प्रकृत्याः सन्दर्भे ईश्वर–जीव–प्रकृत्यादीनां विवेचनावसरे मायाया अपि विचारो कृतोऽस्ति । अत्र मायायाः स्थूलरुपस्यैव संक्षेपेण विचारं कुर्मः यत् रामायणे वाल्मीकिना प्रतिपादितः अस्ति । औपनिषदिकि चर्चा अग्रे विधास्यते ।

रामायणे सत्यं पिहित्वा दिग्भ्रान्तकर्त्र्याः मायायाः बहूत्र प्रसंगाः सन्ति । यत्र प्रामुख्येन मारीचस्य कपटमयस्वर्णमृगरुपम् । राक्षसमारिचः यथार्थतत्त्वं वर्तते तथा स्वर्नमृगस्याकारः तस्य मायारुपम् अस्ति । इदं मायमयरुपमेव अन्तिमं सत्यम् अवबोधनत्वात् अस्य परिणामं सीतारामलक्ष्मणैरभुज्यत । उक्तञ्च–

**“सा तं सम्प्रेक्ष्य सुश्रोणी कुसुमानि विचिन्वती ।**

**हेमरजतवर्णाभ्यां पार्श्वाभ्याममुपशोभितम् ॥**

**प्रहृष्टा चानवद्याङ्गी मृष्टहाटकवर्णिनी ।**

**भर्तारमभिचक्रन्द लक्ष्मणं चैव सायुधम् ॥[१]”**

यदि सीतां बुद्धिरुपां स्वीकुर्मश्चेद् एतद् स्पष्टं भवति यत् यदा बुद्धिः सत्यस्य स्थाने सत्याभासम् अङ्गीकरोति तदा अनर्थस्य जन्मो भवति । कर्ता रामः यदा मायारुपमृगस्य पृष्ठे धावति तदा सिद्धिरुपात् सीतायाः वियुक्तो भवति । यद्यपि मनोरुपलक्ष्मणः मायाविषये शंकाशील आसीत् । उक्तञ्च तेन–

**“अस्य मायाविदो माया मृगरुपमिदं कृतम् ।**

**भानुमत् पुरुष व्याघ्र गन्धर्वपुर सन्निभम् ॥**

[१]. वाल्मीकिरामायणम् ३/४३/१–२

**मृगो ह्येवंविधो रत्नविचित्रो नास्ति राघवः ।**

**जगत्यां जगतीनाथ मायैषा हि न संशयः ॥[1]"**

*इत्थं व्यावहारिकजीवने सत्यं पिहित्वा असत्यं सत्यरूपं प्रस्तूय प्रवञ्चनायाः यच्चक्रव्यूहनिर्माणं भवति, एतदेव मायायाः कार्यं वर्तते । सूक्ष्मबुद्धियुक्तस्तथा व्यवहारनिपुणविद्वान् एव मायारुपात् रक्षितुमर्हति । माया सत्याद् अधिककान्तियुक्ता भवति । अत एव परमसौन्दर्याद्यालंकारिकवर्णनेषु मायाया उपयोगो दृश्यते । यथा सीतायाः विषये कथितं यत् सा देवमाया निर्मिताऽस्ति । उक्तञ्च–*

**"देवमायेवनिर्मिता ।[2]"**

*मायाविषये राक्षसाः निपुणाधिक्येन चित्रिताः सन्ति । यथा–*

**"गन्धर्वनगरप्रख्या माया सा तस्य रक्षसः ।[3]"**

*राक्षसाः मायारुपधारणे अत्यन्त निपुणा आसन् । माया एव राक्षासानां महती शक्तिरासित् । मायायथार्थयोः द्वन्द्वप्रसंगानि रामायणे बहूत्र प्रकीर्तितानि सन्ति ।*

## रामायणे वेदोपनिषदोः प्रभावः –

*[1]. वाल्मीकिरामायणम् ३/४३/७–८*

*[2]. वाल्मीकिरामायणम् १/१/२७*

*[3]. वाल्मीकिरामायणम् ३/४५/१७*

वाल्मीकिरामायणस्य चिन्तनोपरि वेदानां व्यापकप्रभावः दृश्यते । वाल्मीकिदृष्ट्या वेदाः आदर्शमानाः । यथा–

**वेदवेदाङ्गतत्त्वज्ञः ।**[1]

**वेदेषु परिनिष्ठितौ ।**[2]

**नाषडङ्गविदयास्ति ।**[3]

**वैदिकाध्ययने रताः ।**[4]

**ओंकारश्च वषट्कारो वेदाश्च वरयन्तु माम् ।**[5]

**ब्राह्मणानैगमास्तदा ।**[6]

**आचार्यस्तैत्तिरीयाणमभिरुपश्च वेदवित् ।**[7]

**ये चेमे कठकलापाः ।**[8]

**जगुश्च ते यथाशास्त्रं तत्र सामानि सामगाः ।**[9]

**नानृग्वेदविविनीतस्य नायजुर्वेदधारिणः ।**

**नासामवेदविदुषः शक्यमेवं विभाषितुम् ॥**[10]

**कर्म कुर्वन्ति विधिवद् याजका वेदपारगाः ।**

**यथाविधिं यथान्यायं परिक्रामन्ति शास्त्रतः ॥**[11]

---

[1]. रामा.१/१/१४

[2]. रामा.१/५/२३

[3]. रामा.१/६/१५

[4]. रामा.१/१८/३५

[5]. रामा.१/६५/२३

[6]. रामा.१/७७/२३

[7]. रामा.२/३२/१५

[8]. रामा.२/३२/१८

[9]. रामा.२/७६/१८

[10]. रामा.४/३/२८

[11]. रामा.१/१४/३

उक्तनिदर्शनेषु ऋक्यजुसामवेदानामुल्लेखोऽस्ति । एकस्मिन् स्थले अथर्ववेदस्य मन्त्रैः पुत्रेष्टियज्ञसम्पादनविधानमस्ति–

**इष्टिं तेऽहं करिष्यामि पुत्रीयां पुत्रकारणात् ।**
**अथर्वशिरसि प्रोक्तैर्मन्त्रैः सिद्धां विधानतः॥**(वा०रा०१/१५/२)

इत्थं स्पष्टमस्ति यत् महर्षिवाल्मीकेः कालावधि चतस्रो वैदिकसंहितानां प्रचलनमासीत् । वाल्मीकिरामायणे न केवलं यज्ञानां प्रचुरोल्लेखः प्राप्यते अपितु कुत्रचित् तु तस्य विधानमपि कृतमस्ति । रामायणे सामगायकानां कथनमस्ति ।

वेदः धर्मस्य मूलं तथा समस्तज्ञानयुक्तमस्ति एवं वाल्मीकिरामायणे सर्वत्र धर्मस्य प्रतिष्ठा विद्यते–

**धर्मो हि लोके धर्मे सत्यं प्रतिष्ठितम् ।**[१]
**धर्मः सत्यपरो लोके मूलं सर्वस्य चोच्यते ।**[२]

वेदेषु जीवनं उत्, उत्तरं, उत्तमं च प्रति अभिमुखं भूत्वा उत्तरोत्तरविकासाय अस्ति । रामायणेऽपि आदर्शपात्राणि साहसं, शक्तिं, विश्वासं च नीत्वा अग्रे सरन्ति । वेदस्य अन्तिमलक्ष्यं अमृतत्वं, आनन्त्यं वा निःश्रेयसं मन्यन्ते ।

---

[१]. *रामा.२/२१/४१*

[२]. *रामा.२/१०९/१२*

डो.मंगलदेवशास्त्र्यनुसारं **" मनुष्यः स्व अज्ञानबहूलावस्थया स्वं विकासयन् पूर्णतां प्रति याति, सा पूर्णता स्वयम् अनन्ताऽस्ति, तदवदेव यथा ब्रह्माण्डमनन्तमस्ति । वाल्मीकिरामायणेऽपि निःश्रेयसकल्याणतत्त्वमस्ति ।"**[१] रामायणे एकत आदर्शनिबद्धोऽस्ति तर्हि अन्यतः तत् वीरकाव्यमपि वर्तते । आदर्श ओजोत्साहयोः प्रेरको भवति । वेदे प्रकृतेरात्मा परिज्ञाताऽस्ति । वेदेषु सूर्य–अग्नि–वायु–उषसादिदेवतारुपात्मकः प्रकृतिवैभवः दरीदृश्यते । रामायणे लोकादर्शः श्रीरामः सीतालक्ष्मणाभ्यां सह प्रकृत्याश्रये निवसन् स्वकर्तव्यान् व्यापादयति आदर्शानभिगृह्णाति स्वलक्ष्यान् प्राप्नोति च ।

वेदे 'ऋतः' 'सत्यस्य' च व्यापक मान्यताऽस्ति । अस्मिन् चराचरात्मकजगति प्रत्येकपदार्थे यो त्रिकालाबाधितसत्यरुपनियमो विद्यते तस्य मूले 'ऋत्' अस्ति । आधुनिकविज्ञानविद एनं **'चरमनियमः'(Supreme law)** उच्यन्ते । वैदिका एनमेव **'ऋत्'(Esmological order)** वदन्ति । ऋत् तत्त्वस्य द्वितीयं रुपमस्ति सत्यम् । भूमेर्धारणं सत्यं करोति "सत्येनोत्तभिताभूमिः"।[२]

वाल्मीकिरामायणे 'ऋत्' इत्यस्य स्पष्टता न प्राप्यते किन्तु वेदविहित सत्यस्य महिमाऽक्षुण्णाऽस्ति । रामायणे आदर्शगुणगणनायां सत्यं सर्वोपरि राजते ।

श्रुतिवदेव रामायणेऽप्युक्तम्–

**"सत्ये लोकः प्रतिष्ठितः"**[३]

---

*१. डो. मंगलदेव शास्त्री 'भारतीय संस्कृति' पृष्ठ–१२१*

*२. ऋग्वेद् –१०/८५/१*

*३. वा०रा०२/१०९/१०*

अर्थात् लोकोऽयं सत्योपरि स्थितः । सत्यमेवेश्वरमुद्घोष्य तदाश्रितधर्मः प्रतिपादितः ।

**"सत्यमेवेश्वरो लोके सत्ये धर्मः सदाश्रितः" ।**[१]

**"वेदाः सत्यप्रतिष्ठानास्तस्मात्सत्यपरो भवेत्"।**[२]

वेदे पवित्रतायाः भावना पापाद्द्वेषस्य च भावो दरीदृश्यते ; तद्वदेव रामायणेऽपि आचार–विचारद्वारा निष्पापजीवनं प्रसंशितं वरीवर्ती । वेदस्य कथनमस्ति–

**"परिमाग्ने दुश्चरिताद् बाधस्वा मा सुचरिते भज"।**[३]

अर्थात् हे देव ! मां दुश्चरितेभ्यः परिरक्ष्य सुचरित्सु नियोजय ।

**निर्मर्यादस्तु पुरुषः पापाचार समन्वितः ।**

**मानं न लभते सत्सुभिन्नचारित्रदर्शनः॥**[४]

अभिप्रायोऽयमस्ति यत् पापकर्मलिप्तो मर्यादाविहिनश्चजनः सत्सु मानं नाभिगृह्णाति। अतो वेदविहितजीवनवादस्य प्रतिबिम्बनं रामायणोपरि सुस्पष्टं प्रतीयते । उक्तकतिपयप्रसङ्गैर्प्रमाणितं भवति यत् रामायणस्य मौलिकविचारोपरि वेदस्य प्रभावो अपर्याप्तो विद्यते ।

### ❖रामायणे यज्ञकर्म तथा तपः

यज्ञशब्दस्य 'यज्' धातुना निष्पद्यते । 'यज्' धातोरर्थोऽस्ति देवपूजासंगतिकरण–दानञ्च । देवोपमज्येष्ठश्रेष्ठजनानां सम्मानं यज्ञ उच्यते ।

---

[१]. *वा०रा०२/१०९/१३*

[२]. *वा०रा०२/१०९/१४*

[३]. *यजुर्वेद ४–२८*

[४]. *वा०रा०२/१०९/३*

समवय–शील–गुण–स्वभाववद्भिस्सह सङ्गतिस्तथा कनिष्ठेभ्यो दानमपि यज्ञ अभिधीयते । मान–मैत्री–दानादीनाम् इयं प्रक्रिया नितरां प्रचलति । इत्थं महत्कर्म एव यज्ञः कथ्यते यत् शतपथब्राह्मणेऽपि कथितम्–

**"यज्ञो वै श्रेष्ठतमं कर्म"**[१]

वाल्मीकिरामायणे अश्वमेघयज्ञस्य नैकोल्लेखो दृश्यते । अशवमेघात् अतिरिक्तदर्श–पौर्णमास[२]–राजसूय–पौण्डरिक–वाजपेया[३]दियज्ञानां प्रसङ्गचर्चाऽस्ति। एषु अश्वमेघस्य विशदवर्णनं प्राप्यते । कविना अश्वमेघस्योत्तरकाले क्रियमाणानां यज्ञानां नामानि संसूचितानि ते यथा– ज्योतिष्टोम–आयुष्टोम–अभिजित्–विश्वजित्–आप्तोर्याम–बहुसुवर्णक–राजसूय–गोमेध–वैष्णवश्च ।

**यज्ञविधिस्थानकालानि–**

वाल्मीकिना यज्ञस्य सम्पादने निर्दोषविधि–विधानस्य महत्त्वम् अङ्गीकृतमस्ति यथा– **"यदहं यष्टुमिच्छामि शास्त्रदृष्टेन कर्मणा"।**[४], **"यथाकल्पं यथाविधि"।**[५], **"ऋत्विग्भिरुपसन्दिष्टो यथावत् क्रतुराप्यताम्"।**[६]

**प्रवर्ग्यं शास्त्रतः कृत्वा तथैवोपसदं द्विजाः।**

**चक्रुश्च विधिवत् सर्वमधिकं कर्मशास्त्रतः ॥**[१]

---

*१. शतपथब्राह्मण १/७/४५*

*२. वा०रा० १/५३/२४*

*३. वा०रा० ६/१२८/९४*

*४. वा०रा० १/०८/०९*

*५. वा०रा० १/८/१६*

*६. वा०रा० १/०८/२२*

**"मन्त्रवच्च यथान्यायं यज्ञौसो सम्प्रवर्तते"।**[२] ,

**"यज्ञनिवर्तयामास यथाकल्पं यथाविधि"।**[३],

**उपाध्याय स विधिना हुत्वा शान्तिमनामयम् ।**

**हुतहव्यावशेषेण बाह्यं बलिमकल्पयत् ॥**[४]

**"तथा यज्ञभूमौ च विधिवत् पावक जुहुवेन्द्रजित्"।**[५] इत्यादिप्रमाणानि सन्ति । महाकविना धारणेयं स्पष्टीकृता यत् विधिहीनयज्ञस्य निष्पादको शीघ्रं विनश्यति – **"विधिहीनस्य यज्ञस्य सद्यः कर्ता विनश्यति"।**[६]

प्रधानतया ऋत्वनुकूलयज्ञसम्पादनाय व्यवस्थाऽस्ति । ऋतुष्वेव यज्ञकरणेन यज्ञकर्तुः संज्ञा ऋत्विज् भवति । तास्वपि वसन्तऋतुर्महत्त्वम् असामान्यमस्ति । वाल्मीकिना अश्वमेघयज्ञाय वसन्तकालस्य चर्चा कृताऽस्ति–**"वसन्ते समनुप्राप्ते राज्ञो यष्टुं मनोऽभवत्"।**[७] वसन्तस्यागमने संवत्सरं पूर्णतां याति, अतः तस्मिन् काले विहितयज्ञो विशेषपुण्यप्रदो भवति–

---

१. वा०रा० १/१४/४

२. वा०रा० १/३०/१०

३. वा०रा० १/४१/२६

४. वा०रा० २/२५/२१

५. वा०रा० ६/८०/५

६. वा०रा० १/०८/१८

७. वा०रा० १/१२/१

**पुनः प्राप्ते वसन्ते तु पूर्णः संवत्सरोऽभवत् ।**

**प्रसवार्थं गतो यष्टुं हयमेधेन वीर्यवान् ॥**[१]

यज्ञसाधनायै नदीतटः श्रेष्ठः मन्यन्ते तथैव श्रेष्ठस्थलानि तानि भणितानि यत्र प्राकृतिकता–उर्वरता–जीवजन्तुनिर्बाधिता च स्यात् । प्रसङ्गेऽस्मिन् मनुस्मृत्यनुसारम्–

**कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।**

**स ज्ञेयो याज्ञियो देशो म्लेच्छदेशस्त्वतं परः ॥**[२]

अर्थात् सैव यज्ञोचितभूमिर्यत्र कृष्णसारमृगो निःशङ्केण विचरेत् । दशरथेनाऽपि यज्ञाय सरयुनद्या उत्तरतटे यज्ञभूमिसज्जता निर्दिष्टा–

**"सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम्"**[३]

इत्थं समुचितस्थानस्य मुहूर्तस्य च यज्ञे विशेषमहत्त्वं भवति । उक्तञ्च–

**"नात्येति कालो यज्ञस्य"**[४]

राजादशरथः राजसूयाश्वमेघयज्ञयो कर्ता प्रोक्तः–

**"राजसूयाश्वमेघानामाहर्ता धर्मनिश्चितः"**[५]

राज्ञः प्रधानं याज्ञिककर्म राजसूय एवाऽस्ति । यद्यपि सन्तत्यर्थं अश्वमेघयज्ञोल्लेखो वाल्मीकिना नैकेषु स्थलेषु कृतः तथापि रामायणे अश्वमेघमतिरिच्य पुत्रेष्टियज्ञस्याऽपि विधानमस्ति "इष्टिं तेऽहं करिष्यामि पुत्रीयां पुत्रकारणात्"(रा०१/१५/२)

---

१. *वा०रा० १/१३/१*

२. *मनु. २–२३*

३. *वा०रा० १/१२/१६*

४. *वा०रा०१/१९/१८*

५. *वा०रा० २/१००/८*

किं बहूना रामायणे यज्ञसम्बन्धि अनल्पा चर्चाऽस्ति । यथा – यज्ञाग्नि–यज्ञाचार्य–यज्ञसामग्री–यज्ञफल–दानदक्षिणाऽदीनां कविना सविशेषव्यवस्था निर्दिष्टाऽस्ति । वेदसहितयज्ञमण्डपाय आदिकविना यज्ञायतन–यज्ञवाट[१]–यज्ञोपसदन[२]–अग्न्यागार[३]–यज्ञनिवेशन–अग्निशरण[४]–यज्ञभूम्यादिशब्दाः व्यवहृताः । स्वयमादिकविरङ्गीकरोति यत् यज्ञक्रियायां काचित् त्रुटिर्वा किञ्चिच्छिद्रमनर्थकारणं भवितुमर्हति । उक्तञ्च –

**"यज्ञश्छिद्रं भवत्येतत्सर्वेषां शिवाय नः" ।**[५]

कवेः यज्ञनिष्ठता वेदस्य तन्महत्त्वपूर्णतथ्येन सह सम्बन्धिता यत्र लिखितम्–

**"यज्ञो विश्वस्य भुवनस्य नाभिः"**[६]

सम्पूर्णब्रह्माण्डस्य नाभिस्थानं यज्ञोऽस्ति । वाल्मीकिना यज्ञस्य विविधभावाः प्रकटीकृताः । सविधि–विधानछिद्रहीनयज्ञस्य पक्षधरवाल्मीकेः प्रतिनिधिस्वरस्तु वैदिकः एव । एकत्र आदिकविना प्रोक्तम् –

**"यज्ञभूमौ च विधिवत् पावकं जुहुवेन्द्रजित्"**[७]

अर्थात् यज्ञभूमौ इन्द्रजितमेघनादौ सविधि अजुहूताम्, तदा इत्थं प्रतीयते यत् ऋषिराक्षसयोर्मध्ये केवललक्ष्यभेदो एव भवति कारणं ऋषि–मुनि–राज्ञैः क्रियमाण यज्ञो उत्कर्ष–स्वर्ग–सुख–शान्ति–सन्तत्यादीनां कृते भवति स्म, किन्तु राक्षसैः क्रियमाणः यज्ञो परोत्पीडनाय स्वार्थाय च भवति स्म ।

---

१. *वा०रा० १/५०/१*
२. *वा०रा० १/५०/१५*
३. *वा०रा० २/३२/२*
४. *वा०रा० ३/१/४*
५. *वा०रा० १/३१/१०*
६. *अथर्ववेद ९/१०/१४*
७. *वा०रा० ६/८०/५*

## ❖ रामायणे तपः

सामान्यतया धर्मादिजीवनमूल्यानि संरक्षणाय स्थूललिप्साभ्यः सूक्ष्मविकारेभ्यश्च मनः संरक्ष्य तदुत्तरोत्तरं सत्वोन्मुखीकर्तुं प्रयासो हि साधना वा तपः कथ्यते । अनया साधनया आत्मेन्द्रियमनसः शोधनं भवति । व्रतनियमपरिपालनाचरणेन चित्तशुद्धिः विषयनिवृत्तिश्च सम्भवति । ऋग्वेदे ऋतं सत्यञ्च तपसोद्भूतं प्रकीर्तितमस्ति – **"ऋतं च सत्यं चाभिद्धात्तपसोऽध्यजायत"**।[१] तपसैव कृतित्वमायाति । ब्राह्मणग्रन्थानुसारं सृष्टिरुत्पत्तेः पूर्वं प्रजापतिरपि तपञ्चकार –**"स तपोऽतप्यत"** । तपसैव ब्रह्मज्ञानं साक्षात्कारश्च शक्यते इति उपनिषदां मतम् –**"तपसा ब्रह्म विजिज्ञास्व"**।[२] अकर्तव्या तापसः निन्देति छान्दोग्योपनिषद्युपदेशः–**"तपन्तं न निन्देत्"**।[३] किञ्च तपसाधना हि सा सात्विकिरग्निः यया जीवनस्वर्णं उज्ज्वलयति । जीवनस्य रुपमिदं मृत्युजयी भवति, यत् लक्ष्यीकृत्य उक्तञ्च– **"ब्रह्मचर्येण तपसा देवाः मृत्युमुपाघ्नत"** ।[४] हिन्दूधर्मकोशानुसारमुप–भोग्यवस्तूनि परित्यज्य मनोदेहस्य च सुदृढ–सन्तुलित–समाधि–स्थिरतैव तप उच्यते । अनेनैव शक्तिरुद्दीप्ता भवति । तपसो विशुद्धशक्त्या एव मनुष्य असाधारणकार्येऽपि समर्थो भवति । किञ्च योगस्य व्यापकरुपं तपो वर्तते । रामायणस्य कथाप्रारम्भः एव तपस्वाध्यायनिरतनारदेन सह वाल्मीकेः प्रश्नेन भवति–

---

*१. ऋक. १०–१९०–१*

*२. तैत्तिरीय. ३/२*

*३. छान्दोग्य २/१४/२*

*४. हिन्दू धर्मकोश, पृष्ठ–२१४*

**तपः स्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।**

**नारदं परिपपृच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥**[1]

रामायणे अनेके तपस्स्थिताः परायणाश्च साधकाः वर्तन्ते –**" ये चेमे तपसि स्थिताः"**।[2] **"तपश्च परायणम्"**।[3] रामायणे महर्षिकश्यपादारभ्य राक्षसराजरावणपर्यन्तं तपस्वीनाम् एका परम्परा लोक्यते । अत्र उल्लेखनीयमस्ति यत् राक्षसे सत्यपि रावणकुम्भकर्णादीनां तपोविधानम् असात्विकन्नास्ति । तेऽपि अन्यतपस्विभिस्समानमेव उग्रतपस आदर्शं प्रस्तुवन्ति । ऋषिराक्षयोर्मध्ये तत्रान्तरमुत्पद्यते यत्र तपयज्ञयोः फलोपयोगो करणीयो भवति, वस्तुतस्तपसा आत्मज्योतिः प्रस्फुत्य तपस्विनः प्रभां मण्डयति–**"तपसा द्योतितप्रभः"**।[4] शापग्रस्ता अहल्या तपोबलेन स्वकायाकल्पं करोति । रामायणे परम्–महान्–उग्र–अव्यय–अक्षिणतपसां नैकान्योदाहरणानि सन्ति –**" यथा घोरे तपसि तिष्ठतः"**।[5] **"येन तप्तं महत्तपः"**।[6] **"तप उग्रं दुराधर्ष तेपे"**।[7] **"तपस्तप्त्वा ह्यनुत्तमम्"**।[8] **"भूयस्तेपे महत्तपः"**।[9] **"तपसोग्रेण तोषितः"**।[10] **"तपस्तेपे सुदारुणम्"**।[11] **"तपः परमदुष्करम्"**।[12] इत्यादिनिदर्शनानि सन्ति ।

---

*[1]. वा०रा० १/१/१*
*[2]. वा०रा० १/१९/१५*
*[3]. वा०रा० १/२१/१०*
*[4]. वा०रा० १/५१/२*
*[5]. वा०रा० १/४२/१३*
*[6]. वा०रा० १/५७/२*
*[7]. वा०रा० १/६१/४*
*[8]. वा०रा० १/६२/६*
*[9]. वा०रा० १/६३/३*
*[10]. वा०रा० १/६३/१८*
*[11]. वा०रा० १/६५/१*
*[12]. वा०रा० १/६५/२*

## **"तपसः प्रकाराणि"**

वाल्मीकिः प्रमुखतया पञ्चप्रकारकाणि तपांसि प्रोवाच । रामायणे भगीरथ–कश्यप–विश्वामित्र–रावण–कुम्भकर्ण–विभीषणादीन् उग्रतापसाः प्रोक्ताः । किञ्च **"ऊर्ध्वबाहुः पञ्चतपा मासाहारो जितेन्द्रियः"।**[१] जितेन्द्रियो भगिरथस्तु भगिरथस्तु पञ्चतपे लीनः । शप्ता निराहारा वातभक्षा भस्मशायिनी चाऽहल्या तपोमग्ना तिष्ठति–**"वातभक्षा निराहारा तप्यन्ती भस्मशायिनी"।**[२]

वस्तुतः पञ्चप्रकारकतपसोऽभिप्रायोऽस्ति यत् ग्रीष्मकाले चतुर्दिक्षु अग्निं प्रज्वाल्य पञ्चम्यां सूर्याग्नौ उपविश्य निश्चलभावेन तपस्याऽचरणम् । कुम्भकर्णस्य तपप्रसङ्गे वाल्मीकिना निरुपितम्–**"ततापं ग्रीष्मकाले तु पञ्चाग्नीन् परितः"।**[३] स्वोग्रतपस्यास्थो वायुनिर्भरो विश्वामित्रो पञ्चाग्नितपश्चरति –

**"ऊर्ध्वबाहुर्निरालम्बो वायुभक्षस्तपश्चरन् ।**

**धर्मे पञ्चतपा भूत्वा वर्षास्वाकारसंश्रयः ॥"**[४]

तपः कदापि निष्फलं न भवति, अस्य ज्वलन्तोदाहरणं विश्वामित्र अस्ति । रामायणे तपसः प्रभावस्य फलस्य च बहून्युदाहरणानि मिलन्ति । सिद्धाः तपसा स्वर्गविमानं अप्राप्नुवन्–**"विमानमिव सिद्धानां तपसाधिगतं दिवि"।**[५] अखण्डतपसैव महर्षिकश्यपः पुरुषोत्तमं साक्षात्करोति–**"तपसा त्वां सुतप्तेन पश्यामि पुरुषोत्तमम्"।**(वा०रा०१/२९/१३)

---

*१. वा०रा० १/४२/१३*
*२. वा०रा० १/४८/३०*
*३. वा०रा० ७/१०/३*
*४. वा०रा० १/६३/२३*
*५. वा०रा० १/५/१९*

तपसि व्यक्तित्वनिर्माणस्य महती क्षमता भवति । उक्तञ्च–**“भवेदिन्द्रेण वा सृष्टमस्मदर्थे तपोबलात्”**।[१] तपसैव माण्डकर्णिमुनिना पञ्चाप्सरनामकं सरोवरं निर्ममे । किञ्च अभिष्टपदार्थाः मनः समाधानपराक्रमार्जिताश्च भवन्ति । तपसि धारणरक्षणयोः विशिष्टशक्तिर्भवति ।**“तपसाधारयेल्लोकान्”**।[२] **“तपसाचाभिरक्षितः”**।[३] रामायणस्य अध्ययनेन अनुशीलनेन चेदं स्पष्टमस्ति यत् सामान्यधरातलात् उदात्तविभूतिमयभूमिं प्राप्तुं मनोवाक्कर्मसम्बन्धिततपो हि एकमात्रं सफलसाधनमस्ति ।

## ❖ रामायणे वर्णितो देववादः

आरम्भादेव देववादस्स्वीकृतोऽस्ति समाजेन । मूलतः देववादः मनुष्याणाम् आदर्शवादस्य हि नामान्तरं वा रुपान्तरं विद्यते । कालदेशभेदाभ्यां संस्कृत्यादर्शरुपदेवतानां विषये “रश्मिमाला”याम् उक्तमस्ति–

**“कालभेदेन भिन्नानां देशभेदेन वा पुनः।**
**देवतानामयं भेदो मन्यते भावमूलकः ॥**
**संस्कृतेस्तारतम्यं य आदर्शा दर्शयन्ति नः ।**
**त एव देवतारुपा दृश्यन्ते भावमूलकाः ॥**[४]

*१. वा०रा० ५/४६/८*
*२. वा०रा० ५/४८/४*
*३. वा०रा० ५/४८/४*
*४. रश्मिमाला २८/३/४*

स्वस्मात् बलशालीनां सामर्थ्यशालीनां च सम्मुखं पराजयस्वीकरणं मनुष्याणां साहजिकगुणो वर्तते । मनुष्यैः स्वज्ञानोन्मेषकाले एव बल–वैभवशालिन्यः प्राकृतिकशक्तय अवलोकिता ; तथा ताभ्यः दिव्यता च स्वीकृता । मनुष्यैः पूर्वं प्राकृतिकघटनानामवलोकनं, तथा च प्रकृतेर्महत्तत्त्वानां भूमिकाविषये विस्मयेन चिन्तनमारब्धम् । किञ्च मनुष्यैः समर्थ–निर्मल–आदर्शतत्त्वानां व्यक्तित्वानां च पूजनार्चनं प्रारब्धम् । अग्नि–वायु–सूर्यादीन् देवाऽसने प्रतिष्ठिताः ।

## २.४. "रामायणे वर्णितधर्मतत्त्वम्"

भगवान् प्राचेतसो वैदिकधर्मस्य श्रेयसाधनत्वं, वेदानाम् अखण्डितं प्रामाण्यं च लोकम् अवगमयितुमेव श्रीमद्रामायणमहाकाव्यं रचयामास । वेदानाम् अखण्डितप्रामाण्यस्य हेतुमपि स सत्यमेव निर्दिष्टवान् । महर्षिवाल्मीकिः रामायणे सर्वत्र सत्य–धर्मयोः महिमानम् अगासीत् ।

साधरणतया जना विचारयन्ति यत् धर्मपालने सत्यस्य तथा सत्यपालने न धर्मस्य प्रामुख्यम् । अत एव स्वे–स्वे निष्ठावन्तो जना अपि असत्यभाषणे संकोचं न अनुभवन्ति । तद्वदेव सत्यनिष्ठजनाः सत्यपालने न धर्मस्य उल्लङ्घनेऽपि संकोचं कुर्वन्ति । इदं तावत्सत्यधर्मयोस्तेषां यथावदनवगममेव । तथ्यमिदं भगवान् वाल्मीकिः सर्वत्र घोषितवान् । श्रीरामद्वारा जाबालिमतखण्डनावसरे रामायणाकविरिदं तथ्यं प्रस्तौति –

**"सत्याश्रितधर्मः"**

**"सत्यमेवेश्वरो लोके सत्ये धर्मस्सदाश्रितः ।**

**सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् ॥**

**दत्तमिष्टं हुतं चैव तप्तानिच तपांसि च ।**

**वेदास्सत्यप्रतिष्ठानास्तस्मात्सत्यपरो भवेत् ॥**

**ऋषयश्चैव देवाश्च सत्यमेव हि मेनिरे ।**

**सत्यवादी च लोकेऽस्मिन् परं गच्छतिचाक्षयम् ॥[१]"**

इदमनेन स्पष्टं भवति यत्  वेदोक्तो धर्मो यो दान–याग–होम–तपादिरुपः स सत्यपालनेन सार्थको भवति । वेदस्य धर्मे यद् अखण्डितं प्रामाण्यं तदपि सत्यमूलकमेव । सृष्टि–स्थिति–लयकारक ईश्वरोऽपि सत्यस्वरुप एव । धर्मोऽपि सदा सत्याऽश्रितो भवति । असत्यमूलको धर्माभास एव, न तु धर्मः । धर्मस्याधारभूतत्वेन ईश्वररुपत्वेन च सत्यस्याऽयं महिमा वेदप्रतिपादितः । सत्यस्य विषये न मतभेदो दृश्यते । ऋषय एव न, अपितु स्वर्गाधिष्ठिताः देवा अपि सत्यस्य महिमानं निर्द्वन्द्वं स्वीकृतवन्तः । सत्यस्य सत्यमूलकधर्मस्य सेवनेन मनुष्यो यदक्षरं परतत्त्वं प्राप्नोति तेन सह सायुज्यं यातीति वैदिकमतम् ।

सत्यस्य व्रतमिदं न केवलं व्यक्तिगतजीवने एवाऽपितु सामाजिके पारिवारिके च जीवने राजनीत्यामापि परिपाल्यं भवति । अत एव भगवान् श्रीरामो भणति । यथा–

**"सत्यमेवानृशंसंच राजवृत्तं सनातन ।**

**तस्मात्सत्यात्मकं राज्यं सत्ये लोकः प्रतिष्ठितः ॥[१]"**

---

[१]. *वाल्मीकिरामायणम्  सर्ग–१०९*

श्रीरामः राज्यशासने सत्यस्य उपेक्षया जायमानम् अनर्थं च निर्दिशन् वदति–

**"कामवृत्तोन्वयं लोकः कृत्स्नस्समुपवर्तते ।**

**यद्वृतास्सन्ति राजानस्तद्वृत्तास्सन्ति हि प्रजाः ॥[२]"**

वेदाः मानवजीवनस्य परमं प्रयोजनं सत्योपलब्धिमेव निर्दिशन्ति । ज्ञान–विज्ञानयोः मुख्यं प्रयोजनमपि सत्योपलब्धिरेव ।

सृष्ट्यारम्भात् समस्तविश्वेस्मिन् सत्योपलब्ध्यर्थमेव मानवोऽन्विष्यन्नुपगतः । न केवलम् आध्यात्मिकशास्त्राणामेवाऽयं प्रयत्नः, किन्तु भौतिकशास्त्राणामपि । इदं सत्यव्रतं मानवस्त्रिकरणैर्यदा पालयितुं शक्नोति तदा अस्मिल्लोके परलोके च कृतकृत्यो भवति । सत्यस्य पालनेन धर्माचरणेन च जगति सुख–शान्ती प्रतिष्ठिते भवतः । सत्य–धर्मयोः पालनेन मनुष्यस्स्वं चित्तं निर्मलं कर्तुं शक्नोति । अत एव रामायणमिदं स्पष्टम् उद्घोषयति यत्–

**"सत्यधर्माभिरक्तानां नास्ति मृत्युकृतं भयम् ॥[३]"**

(सत्य–धर्मयोः पालनेन मृत्युकृतं भयम् अपरारयितुं शकयते ।)

मानवसमाजस्य सुस्थितये धर्मपालनमनिवार्यम् । यत्र जनाः स्व–स्व धर्मं न पालयन्ति, स, समाजः शाश्वतं विनाशं प्राप्नोति । अत एव धर्मो विश्वस्य जगतः प्रतिष्ठादायक इति वेदोपदिष्टः । लोके जन्मप्राप्तेन सर्वेणापि मनुष्येण विविधा धर्माः

---

*[१]. वाल्मीकिरामायणम् २/१०८/१०*

*[२]. वाल्मीकिरामायणम् २/१०८/९*

*[३]. वाल्मीकिरामायणम् ६/४६/३४*

पालनीया भवन्ति । स यस्मिन् परिवारे संजातस्तस्य परिवारस्य विषये, यस्मिन्देशे समुत्पन्नस्तस्य विषये, येतु जना स्तस्मिन्निर्भरा स्तेषां विषये, येन शासनेन तस्य लोके सुस्थितिः कल्पिता, तस्य राज्यशासनस्य [सर्वकारस्य] विषये च, सर्वेणापि मनुष्येण, स्व–स्वधर्मः सत्यनिष्ठया पालनीयो भवति । यदि कोपि स्वस्य विषये नियतानां कर्तव्यानां पालनविषये छलमथवाऽलसतां करोति, तदा समाजस्याथवा परिवारस्य नोचेद्देशस्यैव तस्य कारणान्महति हानिर्भवति । अत एव रामेण सर्वेणापि मनुष्येण स्वपरिवारस्य, देशस्य, समाजस्य च विषये, यानि–यानि कर्माणि कर्तव्यत्वेन शास्त्रेण प्रतिपादितानि, तेषां पालनविषये, जागरुकेण, निष्ठावता च भवितव्यमिति मुक्तस्वरेण उद्घोषितम् ।

यदा स्वमाता कौसल्या, वनाय प्रवजितं रामं, वृध्दं, पतिं परित्यज्याऽनुगन्तुमिच्छति, तदा, स महात्मा, तस्यै, पुत्रगार्धिन्यै देव्यै दशरथस्य पुत्रत्वेन स्वधर्मं, पत्नीत्वेन च तस्याः स्वं धर्मं ज्ञापयन् वदति –

**"शोकस्संधार्यतां मातर्हृदये साधु मा शुचः ।**

**वनवासादिहैष्यामि पुनः कृत्वा पितुर्वचः ॥**

**"त्वया मया च वैदेह्या लक्ष्मणेन सुमित्रया ।**

**पितुर्नियोगे स्थातव्यमेष धर्मस्सनातनः ॥[१]**

**"शुश्रूषामेव कुर्वीत भर्तुः प्रियहिते रता ।**

[१]. *वाल्मीकिरामायणम् २/२१/४८–४९*

**एष धर्मः स्त्रिया नित्यो वेदे लोके श्रुतः स्मृतः ॥**

**"भर्तुः पुनः परित्यागो नृशंसः केवलं स्त्रियाः ।**

**स भवत्या न कर्तव्यो मनसापि विगर्हितः ॥**[१]

**"पुत्रधर्मः"**

**'नास्ति शक्तिः पितुर्वाक्यं समतिक्रमितुं मम ।**

**प्रसादये त्वां शिरसा गन्तुमिच्छाम्यहं वनम् ॥**

**"नाऽहं धर्ममपूर्वं तं प्रतिकूलं प्रवर्तये ।**

**पूर्वैरयमभिप्रेतो गतो मार्गोऽनुगम्यते ॥**[२]

**"शिष्यधर्मः"**

गुरोर्विषये शिष्येण तदाज्ञापालानरूप अयं धर्मः यथाऽवश्यं पालनीयः तं ताटकावधम् आज्ञापयतो विश्वामित्रास्य पुरतो ज्ञापयन् वदति : –

**"सोऽहं पितुर्वचः श्रुत्वा शासनाद् ब्रह्मवादिनः ।**

**करिष्यामि न संदेहस्ताटकवधमुत्तमम् ॥**

**"गोब्राह्मण हितार्थाय देशस्य च हिताय च ।**

---

१. *वाल्मीकिरामायणम् २/२४/१२*

२. *वाल्मीकिरामायणम् २/२१/३०–३१*

**तव चैवाऽप्रमेयस्य वचनं कर्तुमुद्यतः ॥**[1]

अत्र ध्यातव्यं यद् भगवान् रामस्तटकावधं न केवलं गुरुशासनरुपमेव मत्त्वाऽकरोत्, परंतु तस्मिन् वधे गोब्राह्मणहितं देशस्य च हितम् अपि अपश्यत् ।

उपरोक्तश्लोकं गो–ब्राह्मणहितकरणे, देशस्य च हितकरणे च क्षत्रियेण निरन्तरं यत्नवता भवितव्यमिति च सूचयति ।

## "भ्रातृधर्मः पुत्रधर्मश्च"

सेनया सह चित्रकूटं रामं नेतुम् आगच्छन्तं भरतं दृष्ट्वा तस्मिन् किल्बिषं विशङ्क्य तं सपरिवारं जिघांसन्तं लक्ष्मणं वारयता रामेण भ्रातृणां पितुश्च विषये सर्वेणापि जनेन कथं वर्तितव्यमिति विषयं निरुपयता उक्तं यथा :-

**" पितुस्सत्यं प्रतिश्रुत्य हत्वा भरतमाहवे ।**

**किं करिष्यामि राज्येन सापवादेन लक्ष्मण ॥**

**"यद् द्रव्यं बान्धवानां वा मित्राणां वा क्षये भवेत् ।**

**नाऽहं तत्प्रतिगृह्णीयां भक्षान्विषकृतानिव ॥**

**" धर्ममर्थं च कामं च पृथिवीं चापि लक्ष्मण ।**

**राज्यमप्यहमिच्छामि सत्येनायुधमालभे ॥**

**" यद्विना भरतं त्वां च शत्रुघ्नं वापि मानद ।**

**भवेन्मम सुख किंचिद्भस्म तत्कुरुतां शिखी ॥**

---

[1]. *वाल्मीकिरामायणम् १/२६/४–५*

**“कथंनु पुत्राः पितरं हन्युः कस्यांचिदापदि ।**

**भ्रातावा भ्रातरं हन्यात्सौमित्रे प्राणमात्मनः ॥**

**“यदि राज्यस्य हेतोस्त्वमिमां वाचं प्रभाषसे ।**

**वक्ष्यामि भरतं दृष्ट्वा राज्यमस्मै प्रदीयताम् ॥**[१]

नूनमनेन भ्रातृणां मध्ये यः पारस्परिको विश्वासः, पारस्परिकं च सौभ्रात्रमपेक्षितं तत्तु साधु निरुपितम् । अपरश्चायं विशेषोऽत्रोपलक्षितः यत् धर्मस्य पुरतो राज्यस्याऽथवा संपदो न किमपि महत्वमिति । अमुमेव विषयं प्रकटयन् भगवान् श्रीराम अस्मिन्नेव संदर्भे वदति ।

**“नेयं मम मही सौम्य दुर्लभा सागराम्बरा ।**

**नहीच्छेयमधर्मेण शक्रत्वमपि लक्ष्मण ॥**[२]**”**

**“पतिधर्मः”**

पत्युः पत्न्या विषये यो धर्मोऽनुसरणीयस्तं निरूपयन् देव्यै सीतायै श्रीरामः कथयति : –

**“ यत्सृष्टाऽसि मया सार्ध्दं वनवासाय मैथिलि ।**

**न विहातुं मया शक्या प्रीतिरात्मवता यथा ॥**

**धर्मस्तु गजनासोरु सद्भिराचरितः पुरा ।**

*१ . वाल्मीकिरामायणम् (२/९७/३–६ ; ८–१६=१७)*

*२. वाल्मीकिरामायणम् २/९७/७*

**तं चाहमनुवर्तिष्ये यथा सूर्यं सुवर्चला ॥**

**न खल्वहं न गच्छेयं वन जनकनंदिनि ।**

**वचनं तन्नयति मां पितुस्सत्योपबृंहितं ॥[१]"**

प्रजानां विषये रामस्य य आदरो गौरवं च तन्निरुपयन् महर्षिवाल्मीकिः लिखति : –

**"प्रियवादी च भूतानां सत्यवादी च राघवः ।**

**बहुश्रुतानां वृध्दानां ब्राह्मणानामुपासिता ॥**

**स ग्रामात्पुनरागत्य कुंजरेण रथेन वा ।**

**पौरान् स्वजनवन्नित्यं कुशलं परिपृच्छति ॥**

**पुत्रेष्वग्निषु दारेषु प्रेष्य शिष्यगणेषु च ।**

**निखिलेनाऽनुपूर्व्या च पिता पुत्रानिवौरसान् ॥**

**"व्यसनेषु मनुष्याणां भृशं भवति दुःखितः ।**

**उत्सवेषु च सर्वेषु पितेव परितुष्यति ॥**

**"प्रजापालन संयुक्तो न रागोपहितेंद्रियः ।**

**शक्तस्त्रैलोक्यमप्येषः भोक्तुं किन्तु महीमिमाम् ॥[२]"**

## "पारिवारिकधर्मः"

---

[१]. *वाल्मीकिरामायणम् २/३०/२९–३१*

[१]. *वाल्मीकिरामायणम् २/२*

पारिवारिके धर्मे यथा माता– पित्रोरनुशासनस्य पालनमावश्यकम्, यथाच तद्भक्तिस्सर्वेषां पारिवारिकाणां जनानां विहिता, तथैव सामाजिके धर्मे गुरु, वृद्धादीनामादरः तेषु भक्तिश्च कर्तव्या भवति । यत्र समाजे गुरुषु वृद्धेषु च आदरः न भवति, स समाजो विकासं कर्तुं न प्रभवति । इदमेव तथ्यं प्रकटयञ्छीरामः कथयति : –

**"अस्याधीनं कथं दैवं प्रकारैरभिराद्ध्यते ।**

**स्वाधीनं समतिक्रम्य मातरं पितरं गुरुम् ॥**

**"यत्र त्रयं त्रयो लोकाः पवित्रं तत्समं भुवि ।**

**नाऽन्यदस्ति शुभापांगे तेनेदमभिराद्ध्यते ॥**[1]

स्व–स्वधर्मपालनविषये सर्वेणापि जनेन जगरूकेण भवितव्यम् । स्वयं प्रमादतोऽपि, नाऽधर्म मनो निदध्यात् । अधर्मस्य वृध्दिमपि नोपेक्षेत । यदि जना अधर्मस्योपेक्षां कुर्युस्तर्हि, सोऽधर्मरूपो विषस्समाजरूपं शरीरमेव प्रसृत्या चिराऽदेव तद्विनाशयेत् । अत एव, रामो, वनगोचरस्सन्नपि ऋषीनकारणं हिसतां राक्षसानां वधं प्रतिजानन् कथयति :

**"तपस्विनो रणे शत्रून्हन्तुमिच्छामि राक्षसान् ।**

**पश्यन्तु वीर्यमृषयस्सभ्रातुर्मे तपोधनाः ॥**[2]

---

[1]. *वाल्मीकिरामायणम् २/३०/३३–३४*

[2]. *वाल्मीकिरामायणम् ३/६/२५*

## “क्षात्रधर्मः”

ऋषिणां रक्षणाय रामो महताऽन्देन, स्वप्राणपरित्यागं कर्तुमपि निरंतरं संन्नद्धो वर्नतेस्म । यथा स महात्मा ऋषिणां पालानार्थं समर्पितजीवितस्तथा आर्तानामभयदानेऽपि । अत एव साधूनामुपकारज्ञस्तथाऽऽर्तानां संश्रयश्चऽभिहितः । नूनमिदं शरणागतत्राणरूपं कार्यं भारतीयानामौदार्यस्य भूतदयायाश्च निदर्शनं करोति । विशिष्य भारतीयाः क्षत्रियास्स्वप्राणान् एवं संपदः,स्वं राज्यं किं बहुना स्वंजीवनमेव प्रत्यर्प्य शरणागतत्राणं कृतवन्तः । भगवाञ्छ्रीरामश्शरणागतानाम् अभयदानरूपं कार्यं स्वसनातनं व्रतमेव मन्यते स्म ।

अत एव विभीषणस्याऽभयदानसंदर्भे स महात्मा स्वमिदं महत्तरं व्रतं सुग्रीवस्य प्रतिबोधयन् कथयति : –

**“बध्दाञ्जलिपुटं दीनं याचन्तं शरणागतं ।**

**न हन्यादानृशंस्यार्थमपि शत्रुं परंतप ॥**

**आर्तो वा यदि वा दृप्तः परेषां शरणं गतः ।**

**अरिः प्राणान्यपरित्यज्य रक्षितव्यः कृतात्मना ॥**

**एष दोषो महानत्र प्रपन्नान्नामरक्षणे ।**

**अस्वर्ग्यं चाऽयशस्यं च बलवीर्यविनाशनम् ॥[१]”**

---

१. *वाल्मीकिरामायणम् (६/१८/२७–२८–३१)*

एवं साधारणतः शरणागतरक्षणरूपधर्मस्य परिपालनाऽऽवश्यकता, तस्याऽपालनेन प्रत्यवायं चोद्भाव्य अस्मिन् विषये स्वस्य निर्णयं प्रकटयञ्छ्रीरामो कथयति –

**“सकृदेव प्रपन्नाय तवाऽस्मीति च याचते ।**

**अभयं सर्वभूतेभ्यो ददाम्यतेद् व्रतं मम ॥**

**आनयैनं हरिश्रेष्ठ दत्तमस्याऽभयं मया ।**

**विभीषणो वा सुग्रीव यदि वा रावणस्स्वयम् ॥[१]”**

## “शील–चारित्र्योः महिमा”

एतावत्पर्यंतं मया सामाजिकस्य पारिवारिकस्य च धर्मस्य तत्त्वं तथा मर्यादायाश्च पालनावश्यकता संक्षेपेण निरूपिता । इदानीं व्यक्तिगतधर्मस्य तत्त्वं तथा पालनावश्यकतामपि संक्षेपेण निरूपयिष्यामि । अस्मिन् संदर्भेऽस्माभिरिदं न विस्मर्तव्यं यत् यावन्मनुष्यो न सत्यनिष्ठो भवति, तावद् धर्मस्य पालने समर्थो न भवति । धर्मस्य पालने यथा सत्यनिष्ठाऽपेक्षिता तथा शील–चरित्रयो निर्माणमप्यावश्यकं भवति । यः शीलविहीनो दुश्चारित्रश्च भवति स धर्मं यथावत् पालयितुं समर्थो न भवति । शील–चारित्रविहीनसमाजो अस्मिन् लोके चिरप्रतिष्ठां न गच्छति । तस्य प्रत्यक्षमुदाहरणं राक्षससमाज एव । रामायणेऽत एव सर्वत्र

---

*१. वाल्मीकिरामायणम् ६/१८/३३–३४*

शीलचारित्रयोरावश्यक्ताया उद्घोषः कृतः । यदा कोपि मनुष्यः शील–चारित्रसंपन्नो भवति तदा सर्वेपि सद्गुणाः स्वत एव तस्मिन्नवसरं प्राप्य निवासं कुर्वन्ति । शील–चारित्रविहीनजनस्य सर्वेपि सद्गुणास्तप्तवालुकासु जलबिन्दुसदृशं क्रमशो विनष्टा भवन्ति । महर्षीणामादरस्य गौरवस्य च हेतुस्तेषां शीलचारित्र संपन्नत्वमेवासीत् । यतस्ते – शील–चारित्रसंपन्ना अत एव धार्मिकाश्च बभूवुः । सिद्धन्तोऽयं सर्वत्राऽव्यभिचरितो दृष्टः । सीतारामौ द्वावपि स्व–स्वशीलचारित्रयो रक्षण विषये सततं जागरूकावास्तामत एव, तावुभौ स्व–स्वधर्ममपि दृढनिष्ठया पालयितुं शक्तवन्तौ ।

एतदर्थं सीता–रामयोरुभयोः शील–चारित्रयोर्गानं आदिकविना सर्वत्र मुक्तकण्ठेन कृतम् । मारीचो रावणाय **रामस्य गुणान्** वर्णयन् गदति । यथा –

**" नच पित्रा परित्यक्तो नाऽमर्यादः कथंचन ।**

**न लुब्धो न च दुःशीलो नचक्षत्रियपांसनः ॥**

**नच धर्मगुणैर्हीनः कौसल्यानंदवर्धनः ।**

**नच तीक्ष्णो हि भूतानां सर्वभूतहिते रतः ॥**

**न रामः कर्कशस्तात नाऽविद्वान्नाऽजितेंद्रियः ।**

**अनृतं दुःश्रुतंचैव न रामे वक्तुमर्हसि ॥**

**रामो विग्रहवान्धर्मस्साधुस्सत्यपराक्रमः ।**

**राजा सर्वस्य लोकस्य देवानामिव वासवः ॥**[१]"

रामदूतहनूमाञ्छ्रीरामस्य गुणान् निरूपयन् देव्यै सीतायै भणति : –

---

[१]. *वाल्मीकिरामायणम् (३/३७/८–९१२–१३)*

**" रक्षिता जीवलोकस्य स्वजनस्य च रक्षिता ।**

**रक्षिता स्वस्य वृत्तस्य धर्मस्य च परंतपः ॥[१]**

देव्याः सीतायाः शीलम् अभिनन्दयन् वदति : –

**"इमान्तु शीलसंपन्नां द्रष्टुमिच्छति राघवः ॥[२]"**

श्रीरामः शील–चारित्रविष्यकं स्वं मतमुद्घाटयन् जाबालिमिदं कथयति । यथा–

**निर्मर्यादस्तु पुरुषः पापाचार समन्वितः ।**

**मानं न लभते सत्सु भिन्नचारित्रदर्शनः ॥**

**कुलीनमकुलीनं वा वीरं पुरुषमानिनम् ।**

**चारित्रमेव व्याख्याति शुचिं वा यदिवाऽशुचिम् ॥**

**कश्चेतयानः पुरुषः कार्याकार्य विलक्षणः ।**

**बहूमन्येत मां लोके दुर्वृत्तं लोकदूषणम् ॥**

**कस्य यास्याम्यहं वृत्तं केन वा स्वर्गमाप्नुयाम् ।**

**अनया वर्तमानोऽहं वृत्त्या हीनप्रतिज्ञया ॥[३]**

यः शीलचारित्रसंपन्नो भवति स एव, सत्यव्रतं तत्प्रतिष्ठितं सर्वविधं धर्मं च यथावत्पालयितुं शक्नोति । यः शील–चारित्रविरहितः स स्वमात्मानं लोकं च वंचयित्वा स्वमात्मानं देशं च यातयति । अत्र विषयेऽस्मिन् भारतदेशस्य भूतपूर्वराष्ट्रतेः स्व. सर्वपल्लिराधाकृष्णपंडितस्य शील–चारित्रयोः

---

*१. वाल्मीकिरामायणम् ५/३५/१०*

*२. वाल्मीकिरामायणम् ५/१६/२२*

*३. वाल्मीकिरामायणम् (२/१०९/३–४–७–८)*

निर्माणावश्यकतासम्बन्धिविचारान् प्रस्तौमि **–"उत्तमं चारित्रमेव देशस्य भाग्यमित्युच्यते । चारित्रमेव तादृशं वस्तु येन कस्याश्चिज्जात्या भाग्यं निर्मितं भवति । अधर्मचारित्रैः न महोन्नतस्य समाजस्य निर्माणं कर्तुं शक्यते । यदि नाम वयं महोन्नतं समाजं निर्मितुमिच्छामस्तर्ह्यस्माभिरयं यत्नः कर्तव्यो भवति , येनाऽधिकाधिक तरं स्त्री–पुरुषाश्चरित्रवन्तो भवेयुः । अस्मत्समाजे तादृशानां स्त्री–पुरुषाणामत्यंतमावश्यकता वर्तते येतु प्रायोऽस्यच्छास्त्रैः य उद्घोषः कृतो यत् "आत्मवर्सर्वभुतानीति, तस्यादर्शस्य जीवन्तप्रतिमा एव गोचरीभवेयुः ।" परंतु, बाह्ये जीवितेऽथवा छात्रजीविते; वयं न परामुन्नतिं प्राप्नुयामो यद्यस्माकं चारित्रमुन्नतं न भवेत् । यद्यस्मत्पादतलस्थिता भूमिरेव न दृढतरा तर्हि वयमुन्नतं पर्वतं कथमधिरोढुं शक्नुमः ? यदाऽस्मद्भवनस्य मूलभित्तिरेव चंचला तदा कथं तादृशीमुन्नतिं वयं कर्तुं प्रभावामो, या त्वस्माभिः स्वयं जात्याः पुरतः प्रस्तुता ॥[१]"**

नूनं सत्य–धर्मयोः पालनेन महत्तरं कल्याणं भवति । सत्यस्य मनसा, वचसा, कर्मणा च पालनेन मनः शुध्धं भवति । तादृशे शुध्दमनसि जायमानाः संकल्पाः लोककल्याणाय आत्मकल्याणाय च भवति । शुध्दचित्तमेव स्वधर्मपालने निश्चलं संदेहरहितं च भवति । शुध्दमनसा भगवत्साक्षात्कारं कर्तुं शक्यते । मानसशुद्ध्या मनुष्यः संसारबंधनेभ्यो विमुक्तो भवति । शुध्दचित्तेनैव मनुष्यः

---

[१]. *रामायणमिमांसा ९/५७*

स्वधर्मं यथावत्पालयित्वा सर्वविधस्य श्रेयसो भाजनं भवति । य अशुध्दचित्तो भवति स नाऽस्मिल्लोके परत्राऽपि शान्तिं न प्राप्नोति । यस्य मानसं स्वार्थवासनाभिर्युक्तं स नोभयलोकयोः सुखं प्राप्तुमर्हति । अत एव श्रीकृष्णोऽर्जुनं उपदिशन् कथयति : –

## "कर्तव्यधर्मः"

**" युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।**

**अयुक्तः कामकारेण फले सक्तो निबद्ध्यते ॥**[1]

(यः कर्तव्यदृष्ट्या धर्मम् आचरति सैव नैष्ठिकीं शांतिमाप्नोति । यस्य चित्तं अशुध्दं कामवासनाभिः कलुषितं च भवति, स स्वार्थभावेन धर्ममाचरति येन, स बध्दः सन् विनाशं प्राप्नोति ॥)

लोक–परलोकयो श्रेयोऽभिलषता मनुष्येण इहपरलोकसाधको धर्मः निष्ठापूर्वकं अनुष्ठेयो भवति । यः स्वार्थवशाद् धर्मं त्यजति स स्वस्य आत्मानं स्वस्य परिवारं, स्वस्य समाजं च विनाशयति । अत एव आदिकविः रामस्य गुणान् वर्णयन् हनूमन्तम् इदम् अवाचयत् । यथा–

" सत्य –धर्मरतः श्रीमान् ।[2]"

---

[1]. *श्रीमद् भगवद् गीता ५/१२*

[2]. *वाल्मीकिरामायणम् ५/३५/११*

रामायणे श्रीरामः स्वामनन्यां सत्यनिष्ठां पदे पदे उदघोषयतीति द्रष्टुं शक्यते । तस्मिन्  काले प्रतिज्ञायाः कियत्महत्त्वमासीत् इत्यस्य उदाहरण रामस्य वचनेनानेन ज्ञायते । यथा–

### **"श्रीरामस्य प्रतिज्ञा"**

**"लक्ष्मीश्चन्द्रमपेयाद् वा हिमवान् वा हिमं त्यजेत् ।**

**अतीयात् सागरो वेलां न प्रतिज्ञामहं पितुः ॥[१]"**

( चन्द्रमसः तस्या प्रभा विभक्ता स्यात्, हिमालयः हिमस्य परित्यागं कुर्यात् अथवा अर्णवः स्वसीमामुल्लङ्घयात् किन्तु अहं पितुराज्ञा अन्यथा कर्तुं शक्नोमि ।)

**"संश्रुत्य नच शक्ष्यामि जीवमानः प्रतिश्रावं ।**

**मुनीनामन्यथा कर्तुं सत्यमिष्टं हि मे सदा ॥[२]"**

( मुनीनां पुरतः कृता प्रतिज्ञा मम जीविते नाऽन्यथा कर्तुं प्रभवामि । सत्यस्य पालनं मह्यम् अतिप्रियमस्ति ।)

### **"अधर्मस्य निन्दा"**

अथाऽसत्यवदनेन यथोभयलोकहानिर्भवतीति विषयं श्रीराम स्स्पष्टीकुर्वन्निदं वदति :

**"उद्विजंते यथा सर्पान्नरादनृतवादिनः ।**

**धर्मस्सत्यं परो लोके मूलं सर्वस्य चोच्यते ॥**

**असत्यसंधस्य सतश्चलस्याऽस्थिरचेतसः ।**

---

[१]. *वाल्मीकिरामायणम् २/११२/१८*

[१]. *वाल्मीकिरामायणम् ३/१०/१७*

**नैव देवा न पितरः प्रतीच्छंतीति नः श्रुतम् ॥[1]"**

( असत्यवक्तुः जना तथैव बिभ्यति यथा सर्पात् । संसारे सत्यमेव चरमोत्कर्षस्तथा सर्वेषाम् मूलमपि सत्यमेव । असत्यवक्तृणाम् हव्यं पितरः न स्वीकुर्वन्तीत्यस्माभिः श्रुतमस्ति )

वाल्मीकिः **सुन्दरकाण्डे** अधर्माऽचरणेन उत्पद्यमानं विनाशं बोधयन् तत् तत् पात्रमुखेन कथयति । यथा–

**"अधर्मात्तु महोत्पातो भविष्यति हि सांप्रतम् ।**

**नैते धर्मं विजानंति राक्षसाः पिशिताशनाः ॥[2]"**

( इदानीं अधर्माद् एव महान् उत्पातः भविष्यति, कारणं एते मांसभक्षिणः राक्षसाः स्वल्पमपि धर्मं न जानन्ति ।)

**युद्धकाण्डे** माल्यवान् रावणं स्वम् अधर्मम् अवगमयन बोधयति । यथा –

**"स प्रमादात् प्रवृध्दस्तेऽधर्मोऽहिर्ग्रसते हि नः ।**

**विवर्धयति पक्षं च सुराणां सुरभावनः ॥[3]"**

( तव प्रमादात् वर्धितोऽहिः अस्मान् निगलयितुं इच्छति तथा देवताभिः पालितो धर्मस्तस्यपक्षं वर्धयति ।)

---

[1]. *वाल्मीकिरामायणम् २/१०९/१२–१८*

[2]. *वाल्मीकिरामायणम् ५/२६/३४*

[3]. *वाल्मीकिरामायणम् ६/३५/१६*

युद्धकाण्डे **माल्यवानेन** धर्माऽधर्मयोः सुन्दरं चित्रणं प्रस्तुतमस्ति । स रावणं सन्धिं कर्तुं प्रयतितवान्, किन्तु रावणस्तु रावण एव, तस्य का वार्ता !

**युद्धकाण्डे** माल्यवानस्य धर्माऽधर्मयोर्विषये सुन्दरं निरुपणम् । यथा–

**“असृजद् भगवान् पक्षौ द्वावेव हि पितामहः ।**

**सुराणामसुराणां च धर्माधर्मौ तदाश्रयौ ॥**

**धर्मो हि श्रूयते पक्ष अमराणां महात्मनाम् ।**

**अधर्मो रक्षसां पक्षो ह्यसुराणां च राक्षस ॥**

**धर्मो वै ग्रसतेऽधर्मं यदा कृतमभूद् युगम् ।**

**अधर्मो ग्रसते धर्मं यदा तिष्यः प्रवर्तते ॥[१]”**

## “दुश्चरित्रतायाः निन्दा”

मारीचः रामस्य गुणप्रभावान् निरूपयित्वा रावणं राजधर्मं बोधयन् दुश्चरित्रतायाः परिणामस्वरुपविनाशं दर्शयति । यथा–

**“त्वद्विधः कामवृत्तो हि दुःशीःलः पापमंत्रितः ।**

**आत्मानं स्वजनं राष्ट्रं स ताजा हन्ति दुर्मतिः ॥[२]”**

---

[१]. *वाल्मीकिरामायणम् ६/३५/१२–१४*

[२]. *वाल्मीकिरामायणम् ३/३८/७*

( यो राजा त्वादृशो दुराचारी, स्वेच्छाचारी, पापपूर्णविचारी तथा दुर्बुद्धिः भवति, स स्वस्य तथा स्वसजनानामेव न अपितु समस्तराष्ट्रस्य विनाशं करोति ।)

देवी सीताऽपि रावणस्य आनयं निन्दन्ती कथयति :

**"अकृतात्मानमासाद्य राजानमनये रतम् ।**

**समृद्धानि विनश्यन्ति राष्ट्राणि नगराणि च ॥[१]"**

(यस्य मानसम् अपवित्रं तथा सदुपदेशैर्वञ्चितं भवति, तादृश अन्यायीराज्ञः शासने समृद्धशालीराज्यानि नगराणि च नष्टानि भवन्ति ।)

## "शील–चारित्र्योः प्रशंसा"

देव्याः सीतायाः शील–चारित्रे प्रशंसन् आञ्जनेयः वानरेभ्य वर्णयति । यथा–

**"सफलो राघवोद्योगः सुग्रीवस्य च सम्भ्रमः ।**

**शीलमासाद्य सीताया मम च प्रीणितं मनः ॥**

**आर्यायाः सदृशं शीलं सीतायाः प्लवगर्षभाः ।**

**तपसा धारयेल्लोकान् क्रुद्धा वा निर्दहेदपि ॥[२]"**

( कपिवराः ! श्रीरामस्य उद्योगः सुग्रीवस्य उत्साहश्च सफलतां प्राप्तौ । सीताया उत्तमशीलस्वभावेन (पातिव्रत्येन) अत्यन्तं सन्तुष्टोऽहम् ।

---

१. *वाल्मीकिरामायणम् ५/२१/११*

१. *वाल्मीकिरामायणम् ५/५९/२–३*

(वानरशिरोमणयः ! यस्याः नार्यः शील–स्वभावः आर्यासीता समं भविष्यति, सा स्वतपसा सम्पूर्णलोकं धर्तुमर्हति वा कुपितायां सत्यां लोकत्रयं ज्वालयितुं शक्नोति ।)

सर्वस्यां लङ्कायां प्रदग्धायामपि सीताया अदहनवार्तां श्रुत्वा आञ्जनेयः स्वमन्सीत्थं कथयति : –

**“नहि धर्मात्मनस्तस्य भार्याममिततेजसः ।**

**स्वचारित्राभिगुप्तां तां स्प्रष्टुमर्हति पावकः ॥**

**“तपसा सत्यवाक्येन अनन्यत्वाच्च भर्तरि ।**

**असौ विनिर्दहेदग्निं न तामग्निः प्रधक्ष्यति ॥[१]”**

## “धर्मस्यमूलाधारः सत्यम्”

धर्मस्य सत्यमूलकत्वं सकलश्रेयः प्रापकत्वमपि महर्षिवाल्मीकिः निर्द्वन्द्वं प्रदर्शितवान् । यथा–

**“दत्तमिष्टं हुतं चैव तप्तानि च तपांसि च ।**

**वेदाः सत्यप्रतिष्ठानास्तस्मात् सत्यपरो भवेत् ॥[२]”**

अर्थात् दान–यज्ञ–होम–तपस्या–वेदादीनां सर्वेषाम् आधारः सत्यमेव । अतः सर्वैः सत्यपरायणो भवितव्यम् । वाल्मीकिरामायणे सत्यस्य महिमानं कृतमस्ति ।

---

१. *वाल्मीकिरामायणम् (५/५६/२३–२८)*

२. *वाल्मीकिरामायणम् २/१०९/१४*

कारणं धर्मस्य आधारः सत्यमेवाऽस्ति । यदि मूले सत्यं न स्यात् तर्हि को धर्मः ? उक्तञ्च कविना अयोध्याकाण्डे सत्यस्य महिमायाम् –

**"सत्यमेवेश्वरो लोके सत्ये धर्मः सदाश्रितः ।**

**सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् ॥[१]"**

( जगति सत्यमेवेश्वरोऽस्ति । सदा सर्वदा सत्यस्याधारेणैव धर्मः तिष्ठति । सत्यमेव सर्वस्य मूलं वर्तते । सत्यात् परं नाऽस्ति किमपि पदम् । )

नैतावदेव अपितु उक्तं रामायणे यत् मनुष्यः सत्येन अक्षरस्थानं प्राप्नोति यथा– **"सत्यवादी हि लोकेऽस्मिन् परं गच्छति चाक्षयम् ।[२]"**

महर्षिवाल्मीकिः सर्वानपि मानवदेहधारिणः स्व–स्वधर्मेण कृत्स्नमिदं वसुधातलं स्वर्गुतुल्यं कर्तुं मनुष्यं स्वर्गस्थदेवताभ्योपि स्पृहणीयञ्च कर्तुं रामायणस्य विविधधर्माधिष्ठितपात्राणां चरित्रमाध्यमेन रामायण संहितया प्रेरितवान् । धर्मप्रतिपादकाः ग्रन्थास्तु बहवः सन्ति किन्तु समाजस्य अद्यावधि रामायणे यावच्छ्रद्धा दृश्यते नान्यत्र । श्रद्धायाः मूलं न केवलमादिकाव्यमेव अपितु तत्र आदर्शसमाजनिर्माणाय शिक्षणमस्ति । धर्मरहितः समाजो निश्चयेन विनश्यति तथा धर्मसहितः समाजः सर्वदा जयतीत्यस्य सुन्दरमुदाहरणं रामायणे एव ।

---

*१. वाल्मीकिरामायणम् २/१०९/१३*

*१. वाल्मीकिरामायणम् २/१०९/११*

## “रामायणे विशेषण्त्वेन प्रयुक्त धर्मशब्दः”

यदा समाजे धर्मविषयिकी चर्चा स्यात्तदा तु प्रथमं स्मरणं रामायणस्यैव भवति । संस्कृतवाङ्मये धर्मप्रतिपादकाः ग्रन्थास्तु बहवः सन्ति , किन्तु समाजः उपदेशाऽपेक्षया चरित्रमनुसरति । किं कथयति इति महत्त्वपूर्णं नास्ति किन्तु किं करोतीत्येव महत्त्वं विदधाति । एतादृशचिन्तनं कुर्मश्चेद् वाल्मिकीय रामायणमेव सर्वप्रथमं स्थानमलङ्करोति । न तत्र एकमपि तादृशपात्रं यस्य चरित्रं धर्मस्य मापदण्डे असङ्गतं स्यात् । रामायणे को धर्मः ? इत्यपेक्षया धर्मः कथं जीवितव्य इत्यस्य ज्ञानं प्राप्यते ।

रामायणे नैकमपि तादृशपात्रं यस्य चरित्रं प्रेरणास्पदं न स्यात् । सर्वाण्यपि पात्राणि धर्मद्योतकानि सन्ति । तथाऽपि रामायणस्य सर्वेषु पात्रेषु पात्रमेकमस्ति भगवतः श्रीरामस्य; यो साक्षाद् धर्मस्य मुर्तिरेव । अतः विषयेऽस्मिन् धर्मतत्त्वविवेचनात् पूर्वं रामायणस्य प्रमुखपात्रेभ्यः प्रयुक्तधर्मविशेषणानि वक्ष्यामि ।

### “ रामो विग्रहवान् धर्मः”

महर्षिवाल्मीकिः नायकं रामं साक्षात् **“विग्रहवान् धर्म”** अर्थात् धर्म एवाऽस्तीति लिखति । यथा –

**“रामो विग्रहवान् धर्मः साधुः सत्यपराक्रमः ।**

**राजा सर्वस्य लोकस्य देवानामिव वासवः ॥[१]"**

श्रीरामो धर्मस्य मूर्तिमान् स्वरुपमस्ति । सः साधुः सत्यपराक्रमी चाऽस्ति । यथेन्द्रः समस्तदेवानामधिपतिः, तद्वदेव श्रीरामोऽपि सम्पूर्णजगतः राजाऽस्ति ।

## "धर्मज्ञः"

महाकविना श्रीरामस्य कृते **"धर्मज्ञः"** इति शब्दस्य प्रयोगः कृतः । यथा–

**"धर्मज्ञः सत्यसंधश्च प्रजानां च हिते रतः ।**

**यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिनाम् ॥[२]"**

श्रीरामस्तु धर्मस्य ज्ञाता, सत्यप्रतिज्ञः तथा च प्रजाहितेरतो वर्तते । सः यशस्वी, ज्ञानी, पवित्रः, जितेन्द्रियः, तथा च मनोनिग्रहकर्ता अस्ति ।

## "धर्मस्य परिरक्षिता"

**"प्रजापतिसमः श्रीमान् धाता रिपुनिषूदनः ।**

**रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता ॥[३]"**

श्रीरामः प्रजापतिसमः पालकः, श्रीसम्पन्नः, वैरिविध्वंसकः, जीवत्राता, धर्मस्य रक्षकश्चास्ति । रामेण कदापि प्रजासु भेदः न कृतः । तस्य कृते सर्वेऽपि समाना

---

[१]. *वा०रा० ३/३७/१३*

[२]. *वा०रा० १/१/१२*

[३]. *वा०रा० १/१/१३*

आसन् । जीवमात्रस्य रक्षा तस्य धर्म आसीत्, तथा तद्धर्मस्याऽपि स रक्षाम् अकुर्वन् ।

## "धर्मात्मा"

भगवता प्राचेतसेन श्रीरामाय **'धर्मात्मा'** शब्दः प्रयुक्तः। यथा–

**"श्रृङ्गवेरपुरे सूतं गङ्गाकूले व्यसर्जयत् ।**

**गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियम् ॥[1]"**

श्रृङ्गवेरपुरे गङ्गातटे स्वप्रियं निषादराजगुहं प्राप्य धर्मात्मा श्रीरामः सारथीं अयोध्याय व्यसर्जितवान् । श्लोकेऽस्मिन् महाकविना रामस्य कृते 'धर्मात्मा' प्रयोगः कृतः ।

## "रक्षिता स्वस्य धर्मस्य"

आदिकविना श्रीरामाय **"रक्षिता स्वस्य धर्मस्य"** प्रयोगः कृतः । यथा–

**"रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ।**

**वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥[2]"**

श्रीरामः स्वधर्मस्य रक्षकः, स्वजनस्य पालकः, वेदवेदाङ्गतत्त्ववेत्ता तथा धनुर्वेदे प्रवीणश्चास्ति । श्रीरामः स्वधर्मस्य रक्षणं करोति । वेदानां वेदाङ्गनाञ्च तत्त्वं सञ्जानाति । युद्धशास्त्रेष्वपि निपुणोऽस्ति । अत्र आदिकविना 'धर्मस्य

---

[1]. *वा०रा० १/१/२९*

[2]. *वा०रा० १/१/१४*

रक्षिते'ति रामाय साधुप्रयोगः कृतः, कारणं रामस्तु धर्मस्य संधारको विद्यते । तेनैव समाजाय धर्मविषयिणी प्रेरणा प्रदत्ता ।

## "धर्मात्मा इति राघवः"

महर्षिवशिष्ठेन (दशरथाय) **"धर्मात्मा"** इत्युपाधि प्रदत्ताऽस्ति । तथा रामाय स्वधर्माचरपालनं तथा अधर्मत्यजनं बोधितम् ।यथा–

**"त्रिषु लोकेषु विख्यातो धर्मात्मा इति राघवः ।**

**स्वधर्मं प्रतिपद्यस्व नाधर्मं वोढुमर्हसि ॥[1]"**

श्लोकेऽस्मिन् कविः लिखति यत् **"रघुकुलभूषणदशरथः महान् धर्मात्माऽस्ति"** ख्यातिरियं त्रिषु लोकेषु प्रसिद्धा वर्तते । अतः भवान् स्वधर्ममेव पालयतु, अधर्मस्य भारं मा वहतु ।

## "दाशरथिर्धर्ममेवाश्रितः"

श्लोकमिदम् प्रजाया अनुराग धर्माश्रितराज्ञि भवतीति प्रतिपादयति । अपरं अत्र राज्ञे (पति) शब्दः प्रयुक्तः । यथा–

**"यथा यथा दाशरथिर्धर्ममेवाश्रितो भवेत् ।**

**तथा तथा प्रकृतयो रामं पतिमकामयन् ॥[2]"**

---

[1]. *वा०रा० १/२१/७*

[2]. *वा०रा० २/४५/११*

दशरथनन्दनश्रीरामः यथा–यथा धर्माश्रये दार्ढ्यं प्रकटितं, तथा–तथा प्रजाजनानां मनसि श्रीराम एव स्वामी स्यादितीच्छा दृढा जाता ।

## “रामायणे वर्णितं भौगोलिकतत्त्वम्”

महर्षिवाल्मीकिः रामायणे रामस्यवनगमनं, भरतस्यायोध्यानिवर्तनं, वानराणां सीतान्वेषणं, सुग्रीवसेनाया लंकायात्रादिकं संदर्भं च पुरस्कृत्य भारतवर्षस्य पुर्वापरदक्षिणोत्तरदिशासु स्थितदेशानां भौगोलिकीं स्थितिं वर्णयामास । किन्तु विषयेऽस्मिन् इदं तथ्यं न विस्मरणीयं यत् काले–काले भौगोलिकी स्थितिरपि, परिवर्तनं गच्छतीति । अतः प्राचेतसेन कृतं यद् भौगोलिकं वर्णनं तद् यथावद् वर्तमानकालेपि वर्तत इति न भवितव्यम् ।

## “रामस्य वनयात्रासंदर्भं पुरस्कृत्य वाल्मीकिना प्रस्तुतं भौगोलिकं वर्णनम्”

श्रीरामोऽयोध्यातो वनवासाय प्रस्थाय प्रथमे दिने रात्र्यां तमसायास्तीरे व्यवसत् । इयं तमसा अयोध्यातः दक्षिणस्यां दिशि सरयू–गोमत्योर्मध्ये प्रवहति । इयं वेदश्रुतिरित्यप्यभिधीयते । वेदश्रुतिमतिरिच्यऽन्यापि तमसा नदी वर्तते, यस्यास्तटे वाल्मीकथाश्रमः स्थितः । ततस्तमसां संतीर्य गोमती–स्यंदनिकानाम्न्यौ नदीं तीर्त्वा, गंगाया उत्तरतीरे स्थितस्य शृंगवेरपुरस्य उपान्ते द्वितीयदिनस्य रात्रिं व्यनैषीत् । ततः गुहेन स्थपतिनां आनीतां सुदृढां नौकामारुह्य सीतालक्ष्मणसहितो गंगां तीर्त्वा गंगाया दक्षिणं तीरं प्राप्य गंगाया दक्षिणतीरस्थिते वने कस्यचित्पादस्य मूले तां रात्रिं व्यपादित् । ततो दक्षिणतो गत्वा भरद्वाजाश्रमं (प्रयागं) प्राप्नोत् । तत्र तां रात्रिं

व्युष्य प्रभातायां शर्वर्यां गंगा–यमुनयोस्संधिमासाद्य, पश्चान्मुखाश्रितां कालिन्दीमनुगत्य प्रतिस्रोतस्समागतायाः कालिन्द्यास्तीरमाश्रित्य यत्र प्रचारितं पुराणं तीर्थं अवर्तत तत्र यमुनां प्लवेन संतीर्यं यमुनावनात् दक्षिणदिशायामेव प्रस्थाय चित्रकुटं समागच्छत् । भरतसमागमानंतरं चित्रकूटात् प्रस्थाय अत्र्याश्रमं प्राप्य ततो दक्षिणदिशाया प्रस्थितो विध्यावलिमप्यतीत्य दंडकान् प्राविवेश । दंण्डकारण्ये स्थितमगस्त्याश्रमं प्राप्य अगस्त्यस्य निर्देशनैव गोदावर्यास्तीरस्थितां पंचवटीं प्राप्य तत्र पर्णशालां निर्माप्य तत्र वसतिमकरोत् । अयमगस्त्याश्रमो नासिकक्षेत्रात् दक्षिणपूर्वस्यां दिशायां द्वादशक्रोश दूरेऽवर्तत । अगस्त्याश्रम समीपत एव जनस्थानं वर्तते । अत्रैव रावणेन स्वभ्रातुः खरस्याध्याक्ष्ये चतुर्दश सहस्राणि राक्षसा अध्यावासिताः । औरंगाबादप्रांतमेव जनस्थानमिति कथ्यते स्म । इदं जनस्थानं औरंगाबादप्रांते कृष्णा–गोदावर्योर्मध्यभागे स्थितमनुमितम् ।

अत्र **'पंचवटीं'** अधिकृत्य विद्वत्सु मतभेदो दृश्यते । 'नासिक क्षेत्र एव पंचवटीति' डॉ.शांति कुमार व्यास महोदयो मन्यन्ते । डॉ.राघवन् प्रभृतयो आन्ध्रप्रान्ते 'भद्राचलम्' नाम्नः क्षेत्रस्य गोदावरी तटे स्थितस्य क्षेत्रस्य समीपतो मन्यन्ते । पंचवटीत एव रावण सीतां चौर्येण छलेन च जहार । जटायो निधनं अपि पंचवटी समीपत एवाऽभवत् । ततस्सीतान्वेषणाय प्रस्थितौ राम–लक्ष्मणावुभौ दक्षिणपश्चिमदिशाया जनस्थानमतीत्य क्रौचारण्यं प्रविश्य तदप्यतीत्य कबंधारण्यं विविशतुः । इदं कबंधारण्यम् विंध्यानां दक्षिणतो वर्तते । ततस्सुदूरं यात्रां विधाय पंपासरस्तीरं कबंधस्य निर्देशेन प्राप्य ततो मतंगस्यर्षेराश्रमं प्राप्य तत्र शबर्याकृत मातिथ्यमंगीकृत्य ततः पश्चिमदिशाया ऋष्यमूकं गत्वा, सुग्रीवेण सह मैत्रीं कृत्वा,

सुग्रीवं वालिवधाऽनंतरं किष्किंधाराज्येऽभिषिच्य हनुमदद्वारेण सीतां लंकायां स्थितां ज्ञात्वा किष्किंधातः पश्चिमदिशायां यात्रां कृत्वा सह्यपर्वतश्रेणिं पश्चिमसमुद्रतीरस्थितां प्राप्य ततो दक्षिण दिशाया गिरिमार्गेणैव च मलयपर्वतश्रेणिं प्राप्नोत् । अस्यां मलयपर्वतश्रेण्यामेव महेन्द्रगिरिर्वर्तते । अयं महेन्द्रगिरिस्समुद्रस्य दक्षिणे तीरे, मलयश्रेण्यैव संबध्दस्स्यात् । महेन्द्रपर्वतादवरुह्य रामस्समुद्रतीरस्थिते वेलाबने ससैन्यं निवेशं चकार । तत एव सेतुं बध्दवालंकापुरीं समभिजगाम ।

## "गिरिव्रजतो भरतप्रत्यावर्तनपथवर्णनम्"

भरतो राजगृहात् (गिरिव्रजात्) प्राङ्मुखो निर्ययौ, ( स प्राङ्मुखो राजगृहादभिनिर्याय वीर्यवान् २।७१।१ ) यतोऽयोध्या गिरिव्रजतः पूर्वास्यां दिशि वर्तते । सुदाम, ह्लादिनी, दूरपार, प्रत्यक् स्रोतस्विनी, शतद्रू (सतलज) नदीस्तीर्त्वा अर्थात् बाह्लीकानतीत्य ऐलधानं प्राविशत ।

'स प्राङ्मुखो राजगृहात्' इति श्लोकस्य व्याख्यां कुर्वन् गोविंदराजो वदति– "अत्र दूता ऋजृदुर्गमार्गेण त्वरितं गिरिव्रजमागतः । भरतस्तु चतुरंगबलयुक्तया वक्रमपि महामार्गमाश्रित्य ययौ, अतो नदीपर्वतादिभेदकीर्तनमिति बोद्धयम् ॥

'अपर' नामकान् जनपदानिति, रामायणतिलकम् । तानप्यतीत्य शिलामाकुर्वतीं नदीमप्यतीयुः । इयं नदी आग्नेय–शल्यकर्तन नामकस्य ग्रामद्वयस्य मध्यतः प्रवहतीति, तीर्थः (रामायणतिलकम्) । बारुआ महोदय इमां शिलावहां नदी

दृषद्वतीं मन्यन्ते । ततः स चैत्ररथतुल्यंवनदर्शनकौतूहलेन महापर्वतानत्यगादिति गोविन्दराजः । बारुवा महोदयो ह्लादिनी दूरापारा प्रत्यक्स्रोतस्विनी नदीः, क्रमशः झेलम्, चीनाव, रावी, नद्यो च मन्यते । ततश्चैत्ररथात् स सरस्वती–गंगायो संगमं प्राप्य भारुण्डाख्यं वनं प्राविशत् (२।७१।५) । अमुं श्लोकं व्याख्यान् रामायणतिलककारो लिखति– "सरस्वतिम् इयं अत्र पश्चिमप्रवाहा ; 'गंगा' पदेनाऽत्र सुचक्षुसीताद्यन्यतमाः पश्चिमप्रवाहा ग्राह्याः । एतास्तिस्त्रो गंगाप्रवाहा एवेति पुराणप्रसिद्धम् । तां युग्मेन संगमेन प्राप्य वीरवत्स्यानां देशानामुत्तरान्देशान्प्राप्य भारुण्डाख्यं वनं प्राविशत् । अत्र गंगा–सरस्वतीसंगम वीरमत्स्यभारुण्डवनानां विवरणं ददन् श्रीमान् भारद्वाज महोदयो लिखति– "सरस्वती नदी अवश्यं वर्तमान सरस्वती नद्येव, या कुरुक्षेत्रनगर–थानेश्वराभ्यां अल्पकालिकवर्षतो प्रवाहमाना क्षुद्रनदी रुपेण दृश्यते । इयं शिवालिकपर्वतमालाया उर्ध्वश्रेण्या उदिता सती भटनर प्रदेशस्य समीपतो मरुस्थाने नष्टा भवति । मध्ये मार्ग सा मार्कंड तथा घाग्गर नदीभ्यां मिलति । वैदिके वाड्मये यद्यपि सा बलवती नदी कथिता तथापि सा क्षीणजलप्रवाहतया नैकेषु स्थुलेषु दृश्याऽदृश्या सती गोचरीभवति । अथ गंगाया विषये त इदमभिप्रयन्ति यत् इयं गंगा सरस्वत्याः काचन क्षुद्रा उपनदी भवेदिति ।

## "भारतस्य पूर्वस्यां दिशि स्थितानां देशानां भौगोलिक वर्णनम्"

वानरराज सुग्रीव सीतान्वेषणार्थं विनतनाम्नो वानरयूथपतेराध्यक्ष्ये बलवतां वानरवीराणां सहस्राणि पूर्वस्यां दिशि प्रैषयत् । तैर्वानरवीरैस्तस्यां दिशि ये ये देशा विचेतव्या इति विषयं स्पष्टीकुर्वन् सुग्रीवस्तान् इदं कथयति :–

प्रथमं स वानरान् गंगा–सरयू–कौशिकी–कालिंदी–सिंधु–सरस्वती–शोण, मही–कालमहीप्रभृतीनां नदीनां तीरेषु तत् तीरव्यापृतां सशैलकाननां महीमन्वेष्टुमादिशति ।

अत्र प्रथमं गंगा–यमुनयोः प्रस्तावस्य कृतत्वेनेदं स्पष्टं प्रतीयते यत् सुग्रीवोऽत्र न किष्किंधातः पूर्वस्यां दिशि स्थितस्य भूमिभागस्य वर्णनं प्रस्तौति ; अपितु भारतस्य मध्ये परिव्याप्ताया विंध्यगिरिमालायाः पूर्वस्यां दिशि स्थितानां देशानां प्रस्तावं करोतीति । अतोऽस्मिन् प्रसंगे सुग्रीवेण विन्ध्यगिरिमालामवधित्वेनस्वीकृत्यैव तत्तद्दिक्षु स्थितानां देशानां भौगोलिक वर्णनं प्रस्तुतमित्यवगन्तव्यम् ।

## “भारतस्य दक्षिणस्यां दिशि स्थितानां देशानां भौगोलिक वर्णनम्”

ततो वानरराज सुग्रीवो दक्षिणस्यां दिशि हनुमान्–नील–जांबवन्त–सुषेण–गज–गवाक्ष–मैंद–द्विविद–गंधमादन–उल्कामुख–अंगदादीन्वानर्षभान् प्रेषयन्, तेभ्यो दक्षिणस्थितानां देशानां विवरणं ददन्निदं कथयति :–

सहस्रशिखरान् विन्ध्यानातिक्रम्य नर्मदा, गोदावरी, कृष्णावेणीमहानदीस्तीर्त्वा दशर्णनगराणि अवन्तीं च विचित्य बंग, विदर्भ, कलिंग, कौशीकादीन् देशानातिक्रम्य आंध्र, पुंड्र, चोल, पांड्य, केरलादीनन्वेष्टुञ्चादिशति । तत सह्याद्रिं विचित्य कावेरीं, तत्तीरस्थितान् देशांश्चन्विष्य मलयगिरिं प्राप्य तत्र कृतवासं अगस्त्यं दृष्ट्वा ततस्ताम्रवर्णीं विचित्य ततो महेन्द्रगिरिं समुद्रतीरे स्थितं प्राप्य ततो लंकाद्वीपं गन्तु– मादिशति ।

## “अथ पश्चिमदिशायां स्थितानां देशानां वर्णनम्”

ततस्ताराया: पितरं सुषेणं  पश्चिमदिशि गत्वा सीतामनेष्टुं प्रार्थयमान इदं कथयति–

सौराष्ट्रान् गत्वा तत्र स्थितान्सर्वाञ्जनपदान् बाढमन्विष्य प्रत्यक् स्रोतोवाहिनीनां सर्वासामपि पश्चिमनदीनां तीराणि विचित्य, ततः पश्चिमसमुद्रं , तिमिनक्रझाषकुलं समुद्रं गन्तुमादिशति । ततः सिंन्धुसागरसंगमे स्थितं महान्तं महाद्रुमावृतं सोमगिरिं प्राप्य ततः पश्चिमे स्थितान्  सर्वानपि महागिरीनन्विष्य प्राग्जोतिषं नाम जातभयपुरं गन्तुं समादिशति । तन्नगरमप्यतीत्य ततः पश्चिमे दिशि स्थिता गिरि–कानन संयुता वनभुमी विचेतुमादिशन्निदं कथयति– तत्र शैलस्य द्रुमलतावृतेषु अरण्येषु सिंहव्याघ्रादयो बाहुल्येन वर्तंत इति । अयं प्रांतो **‘गिरनार’** इति प्रसिध्दोऽरण्यप्रांत स्यादिति भौगोलिका मन्यन्ते, यत स “गिरनार” प्रांत सिंहानांमावसभुमित्वेन भारते परं प्रसिद्धः । ततो मेरु प्राप्यं  मेरु–अस्ताचलयोर्मध्यप्रांते स्थितं चित्रवेदिकं दशशाखं जातरुपमयं तालं द्रष्टुमादिशति । पश्चिमसमुद्रोल्लघनानन्तरं गंधर्वादिदेशातिक्रमणानन्तरमेव ते मेरुं प्राप्नुवन्ति । अयं गंधर्वदेश एव संभवतः **‘अरेबिया’** देशो भवेदिति भौगोलिका वदन्ति । तत शतयोजन विस्तृता पर्वतपंक्तिः ईरानदेशस्थिता पर्वतपंक्तिर्भवेत् । तत समुद्रप्रविष्टस्य पर्वतस्य उल्लेखमकरोत् । ततो बहुनां पर्वतपंक्तीनामुल्लेखः कृतस्ततोऽस्ताचलस्य । अस्मादस्ताचलात्परं यतो न भूमिरतोनाऽन्वेषणं कर्तव्यमिति निर्दिशन् गदति :–

**“एतावज्जीवलोकस्य भास्करो रजनीक्षये ।**

**कृत्वा वितिमिरं सर्वमस्तं गच्छति पर्वतम् ॥**

**एतावद् वानरै शक्यं गंतुं वानरपुंगवाः ।**

**अभास्करममर्यादं न जानीम स्ततः परम् ॥[१]”**

अथोत्तरदिशायां स्थितानां देशानां भौगोलिक वर्णनम् उत्तरदिशायां प्रेष्यमाणानां वानराणां नेतुं शतबले श्रावयन् वानरराज सुग्रीवो वदति–

“म्लेच्छ, पुलिंद, शूरसेन, प्रस्थल, भरत, कुरु, मद्र, कांबोज, यवन, शक, देशानां तत्तन्नगराणि विचित्य पुनर्दरदान् हिमवन्तं च द्रक्ष्यथ । ततोप्युत्तरां दिशं गत्वा, काल, सुदर्शन, देवसख, कैलास, कुबेर भवनादीनि च विचेयानि । ततः क्रौंच, मैनकादीनन्वेष्टु मर्हथ । तत ‘शैलोदा’ नाम्नीमापगामतिक्रम्य तत उत्तरान् कुरुन् गच्छथ । तानप्यतीत्योत्तरं सागरं द्रक्ष्यथ । तत्रैव समुद्रे सोमगिरि र्वर्तते । तत्रैव शिवब्रह्माणौ वसतिं कुर्वतः । स एव गिरिर्विसूर्य इति च कथितः । सोमगिरिपर्यंतमेव प्राणिनां गतिः । सोमगिरिस्तावद् देवानामपि दुर्गमः । अतो न कथमपि कुरुणामुत्तरेण न गन्तव्यम् । सोमगिरिं दृष्ट्वा निवर्तध्वम् । ततःपरमभास्करम् अमर्यादं च प्रदेशं वयमपि न जानीम इति।[२]

यद्यप्यस्य वर्णनस्य काव्यान्तर्गतत्वेन तत्तत्प्रदेशानां वर्णने पौर्वापर्यस्य विद्यमानत्वेपि भौगोलिक सीमानां याथातथ्येन वर्णनं भगवता प्राचेतसेन प्रस्तुतम् ।

---

[१]. *वाल्मीकिरामायणम् ४/४२/५०–५१*

[२]. *वाल्मीकिरामायणम् ४/४३/५७–५९*

अत एव वानरराजस्य सुग्रीवस्य भौगोलिक विज्ञानेन चकितो रामस्तमिदं पृच्छति यत तेन कथमिदं भौगोलिकं विज्ञानं समधिगतमिति । सुग्रीवः श्रीरामं समदधन् वदति यत्, स्वजेष्ठभ्रात्रा वालिना तस्य जिघांसया प्राणभयात्पलायमानस्सोऽनुधौता आसीत् । तेनाऽनुधौतस्स स्वप्राणरक्षार्थं सर्वमपि महीतलमभ्रमत । तेन भ्रमणेनेदं विज्ञानं तेन संप्राप्तमिति ।

भगवतः वाल्मीकेः यद् भौगोलिकं विज्ञानं तत्तु परं गहनम् । नैतावदेव, स ऋषि सृष्ट्यादितो यानि–यानि भौगोलिकानि परिवर्तनानि समभवन् तान्यपि बाढं वेत्तीत्यनुमीयते । तस्योदाहरणतदेयं वर्णनं प्रस्तोतुं शक्यते । स सगरस्याश्वमेधयजनप्रदेशनिर्वर्णनावसरे लिखति–

**"शंकरश्वशुरो नाम्ना हिमवानिति विश्रुतः ।**

**विंध्यपर्वतमासाद्य निरीक्षेते परस्परम् ॥**

**तयोर्मध्ये समभवद्यज्ञः स पुरुषोत्तम ।**

**सहि देशो नरव्याघ्र प्रशस्तो यज्ञकर्माणि ॥[१]"**

हिमवद्विंध्ययोर्मध्यप्रदेशस्यैव्याऽऽर्यावर्तत्वेन स, प्रदेशो यज्ञाऽनुष्ठानाय, प्रशस्त इति व्याख्याकाराः

---

[१]. *वाल्मीकिरामायणम् १/३१/५–६*

# तृतीयोऽध्यायः

# ( धर्मैतिहासवर्णनात्मकः)

३.१ धर्मशब्दस्य अभिप्रायः । १६३–१६५

३.२ धर्मस्य परिभाषा । १६६–१६७

३.३ धर्मस्य भेदोपभेदाः(वर्णधर्म–आश्रमधर्म–अन्य धर्माः) ।१६८–१६९

३.४धर्मस्य विविध स्वरुपाणि । १७०–१८८

# (तृतीयोऽध्यायः)

## *३.१.-धर्मशब्दस्याऽभिप्रायः*

"धर्म" शब्दः तादृशसंस्कृतशब्देष्वस्ति यस्य प्रयोगो बहुविध अर्थेषु सञ्जायते। शब्दोऽयं नैकविध परिवर्तनविपर्ययोश्चक्रे भ्रमितः। ऋग्वेदऋचासु शब्दोऽयं "धर्मन्" सामान्यतया नपुंसकलिङ्गे विशेषणत्वेन वा तु संज्ञात्वेन प्रयुक्तः । तत्र शब्दस्यास्य प्रयोगः अस्मिन् रुपे षड्पञ्चाशत्वारं (५६) जातः। तस्मिन् काले वेदभाषायामस्य शब्दस्य को वास्तविकोऽर्थः इत्यस्पष्टम्। स्पष्टतः अयं शब्दः "धृ" धातुर्निर्मितः, यस्य तात्पर्यं धारणम्, आलम्बनम्, पालनञ्च भवति। ऋग्वेदे कुत्रचित्"धर्म" शब्दः पुल्लिङ्गे प्रयुक्तः,यथा- "पितुं नु स्तोषं महो धर्माणं तविषीम्" [1] *किन्तु अन्यस्थानेषु नपुंसकलिङ्गेऽस्ति वा तु तस्मिन् रुपेऽस्ति यं वयं पुंनपुंसकत्वेन विद्मः।स्थानाधिक्येषु धर्मशब्दो "धार्मिकविधिरुपेण" अथवा "धार्मिकक्रियासंस्काररुपेण" प्रयुक्तः, यथा ऋग्वेदे १.२२.१८,५.२६.६,७.४३.२४., ९.६४.१.आदिस्थानेषु। ऋग्वेदे "तानि धर्माणि प्रथमान्यासन्" ऋचा उपर्युक्तकथनं प्रमाणयति। इत्थमेव "प्रथमा धर्माः" [1] तथा "सनता धर्माणि"[2] क्रमशः इत्यनयोरर्थः प्रथमविधयस्तथा प्राचिनविधयः भवति। कुत्रचित् अर्थोऽयमप्रकटं भवति यथा -*

---

*१ - ऋग्वेद-१.१८७.१*

"आ प्रा रजांसि दिव्यानि पार्थिवा श्लोकं देवह् कृणुते स्वाय धर्मणे"।[3], "धर्मणा मित्रावरुणा विपश्चिता व्रता रक्षेथे असुरस्य मायया"।[4], "ध्यावापृथिवी वरुणस्य धर्मणा विष्कम्भिते अजरे भूरिरेतसा"।[5], "अचित्तो यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रिरिषः" ।[6] अत्र धर्मस्य अर्थः "निश्चितनियमः"(व्यव्स्था वा सिद्धान्त), अथवा "आचरणनियमः" अस्ति। धर्मशब्दस्योपर्युक्तार्थो वाजसनेयी संहितायामपि दृश्यते। एकस्मिन् स्थाने "धृवेण धर्मणा" प्रयोगः मिलति अन्यत्र धर्मशब्दस्य बहुलप्रयोगाः अपि प्राप्यन्ते। ऋग्वेदस्य बहवः मन्त्राः अथर्ववेदे प्राप्यन्ते यत्र "धर्मन्" शब्दः प्रयुक्तः। अथर्ववेदे-"अचित्या चेतव धर्मा युयोपिम", "यज्ञेन यज्ञमयजन्त", "त्रिणि पदा विचक्रमे" इत्यादिभिः धर्मशब्दस्य प्रयोगः "धार्मिकक्रियासंस्कारोपार्जितगुणः" इत्यर्थे प्रयुक्तः। ऐतरेय ब्राह्मणे "धर्म" शब्दः सकलधार्मिककर्तव्याद्यर्थे प्रयुक्तः।

---

(१) ऋग्वेद ३.१७.१

(२) ऋग्वेद ३.३.१

(३) ऋग्वेद ४.५३.३

(४) ऋग्वेद ५.६३.७

(५) ऋग्वेद ६.७०.१

(६) ऋग्वेद ७.८९.५

छान्दोग्योपनिषदि "त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तपः एवेति द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्य कुलेऽवसादयन्। सर्व एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति।"

धर्मेणाऽधिगतो येषां वेदस्सपरिबृंहणः।

शिष्टास्तदनुमानज्ञा श्रुतिप्रत्यक्षहेतवः॥[१]

---

**१-बौद्धा.** १/ ६

# ३.२.धर्मस्य परिभाषाः

धर्मशब्दमाश्रित्य सुज्ञैः धर्मतत्त्वचिन्तकैः नैकाः परिभाषाः कृताः।यथा-

ध्रियते नाम धारणं क्रियते स धर्मः धृ धातोर्मन् प्रत्यये कृते धर्म शब्दो निष्पद्यते।नृ यां धारणां अथवा विश्वासं वा कृत्वा स्वकर्मणि प्रवर्तयति सामान्यतया स विश्वास एव धर्मः । धर्मस्याल्पं तात्पर्यं विज्ञाय प्रायः मनुष्याः दानपूजनादिकमेव धर्मपदेन गृह्णन्ति किन्तु तद्धर्मस्वरुपं स्थूलम् । वास्तविकतया सत्कर्मणः सदाचारस्य मूलाधिष्ठाने एव धर्मः। अत एवोक्तम्मनुना-

" आचारः परमो धर्मः"[१]

सदसद्विवेकस्तदनुकूलमाचरणं स धर्मः।

धारणाद् धर्ममित्याहुर्धर्मेण विधृताः प्रजाः ।
यः स्याद् धारणसंयुक्तः स धर्म इति निश्चयः॥[२]

सर्वान् विदधाति स धर्म उच्यते।

---

(१) मनुस्मृति

(२) महाभारतम्

*एतावदेव न अपि तु बहव्यः परिभाषाः सन्ति धर्मस्य यथा-*

*"अहिंसा परमो धर्मः"*

*" आनृशंस्यं परो धर्मः"*

*"आचारश्च सतां धर्मः"*

*"रामो विग्रहवान् धर्मः"*

*"वेदोऽखिलो धर्ममूलम्"*

*"चोदनालक्षणोऽर्थो धर्मः"*

*यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः"।*[१]

*सन्दर्भेऽस्मिन् स्मृतिकारैः व्यावहारिकपक्षं विचिन्त्य बहूत्तमं श्लोकं रचितम्-*

*" अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।*

*धीर्विद्याबुद्धिरक्रोधो दशकं धर्मलक्षणम्॥ "*

# ३.३.धर्मस्य भेदोपभेदाः

( वर्ण-धर्म, आश्रम-धर्म,अन्यधर्माः)

अत्र धर्मस्य विविधभेदाः उपलभ्यन्ते यथा धर्मस्य तिस्रः शाखाः मन्यन्ते [१] -

(१) यज्ञ,अध्ययनं,दानञ्च अर्थात् **गृहस्थधर्मः**।

(२) तपस्या अर्थात् **तापसधर्मः**।

(३) ब्रह्मचारित्वं अर्थात् **अन्तेवासी**।

अत्र धर्मशब्दः आश्रमकर्तव्यानि सूचयति। इत्थं वयं जानिमः यत् धर्मशब्दस्य अर्थः समयानुसारं परिवर्तितः।

किन्त्वन्तेऽयं "धर्म" मनुष्याणां विशेषाधिकारं, कर्तव्यानि, बन्धनद्योतकं, आर्यजातिआचार-विधिपरिचायकं,वर्णाश्रमद्योतकमादिरुपेण संस्थितः। तैतिरीयोपनिषदि छात्राणाङ्कृते यो धर्मशब्दः प्रयुक्तः तस्याशयः "सत्यं वद" "धर्मं चर" इत्यादिरस्ति।श्रीमद्भगवद्गीतायाम् "स्वधर्मे निधनं श्रेयः" इत्यस्यां पङ्क्तौ "धर्म" शब्दस्याऽयमेवार्थोऽवबुध्यते। धर्मशास्त्रसाहित्ये "धर्म" शब्दः अस्मिनेवार्थे प्रयुक्तः।

मनुस्मृतिव्याख्यातामेधातिथ्यनुसारं स्मृतिकारैः धर्मस्य पञ्चस्वरुपाणि मन्यन्ते -

(१) वर्णधर्म (२) आश्रमधर्म (३) वर्णाश्रमधर्म (४) नैमित्तिकधर्म (यथा प्रायश्चित्तादि) (५) गुणधर्म (अभिषिक्त राज्ञः संरक्षण-सम्बन्धी कर्तव्यानि)।

---

(१) छान्दोग्योपनिषद् (२.२३)

*गौतम-धर्मसूत्रव्याख्याता हरदत्तस्तथा मनुस्मृतिव्याख्याता गोविन्दराजः, इमावुभावपि धर्मस्य उपरोक्तानि पञ्चप्रकाराणि प्रतिपादितवन्तौ। धर्मस्य इतोऽपि कतिपय मनोरमपरिभाषाः सन्ति तत्रापिवलोकनमावश्यकं प्रतीयते।*

*पूर्वमीमांसासूत्रे जैमिनिमहर्षिणा "धर्म" **वेदविहित प्रेरक**लक्षणार्थे स्वीकृतः, अर्थात् वेदप्रयुक्तानुशासनानां पालनं रक्षणं संवर्धनञ्च धर्मः ।धर्मस्य सम्बन्धस्ताभिः संस्कारक्रियाभिस्सह विद्यते, याभिरानन्दो जायते तथा यो वेदप्रेरितप्रशंसितश्च स्यात् - **"चोदनालक्षणोऽर्थो धर्मः"।**[1] स एव धर्मो येनाऽनन्दस्तथा निःश्रेयससिद्धिर्भवेताम् – मानवसमाजं लक्ष्यीकृत्यधर्मावरणे सुसम्यक्दायित्वनिर्वहणाय च कर्तव्यपरकदायित्वधर्माः संसूचिताः स्मृतिकारैः यथा राजधर्मः,आमात्यधर्मः,प्रजाधर्मः,शत्रुधर्मः,पितृधर्मः,मातृधर्मः, पुत्रधर्मः,पुत्रीधर्मः,भृत्यधर्मः,गुरुधर्मः,शिष्यधर्मः,नागरिकधर्मः इत्यादिसृष्ठुसमाजायधर्मालङ्कारे दायित्वानि वा कर्तव्यानि भवन्ति। जातीमात्रोद्देशेन विधीयमानो धर्मो वर्णधर्मः।ब्रह्मचर्याद्याश्रमोद्देशेन विधीयमानो धर्मो आश्रमधर्मः। वर्णगताश्रमोद्देशेन व्यवस्थया विधीयमानो धर्मः वर्णाश्रम धर्मः। गुणं कं यनोपादाय तदवलम्बेन विधीयमानो धर्मो गुणधर्मः। निमित्तमुपादाय विधीयमानो निमित्तधर्मः। कैश्चित् साधारणधर्मोऽपि गण्यते ।*

---

[1]. पूर्वमीमांसासूत्र १/१/२

# ३.४. धर्मस्य विविधस्वरुपाणि

*अतिप्राचीनकालादेव धर्मस्य विविधस्वरुपविषये चर्चा सञ्जायते।वस्तुतः धर्मस्य स्वरुपं बहूव्यापकमस्ति तथा मानवानां सम्पूर्णजीवनं स्पृशति। धर्मशास्त्रकारमतानुसारं धर्मः कस्यापि संप्रदायस्य वा मतस्य द्योतको नास्ति, अपितु धर्मः जीवनस्यैका शैली वा आचरणसंहिता अस्ति या समाजे मनुष्याणां कर्माणि वा कृत्यानि व्यवस्थापयति विकासयति तथा मानवीयप्रत्ययस्य लक्ष्यं च प्रापयति । इत्थं विचिन्त्य महर्षिभिः धर्मः भागद्वये विभाजितः, यथा श्रौतधर्म एवं स्मार्तधर्मः।*

***दाराग्निहोत्रसम्बन्धमिज्या श्रौतस्य लक्षणम्।[१]***
***स्मार्तो वर्णाश्रमाचारो यमैश्च नियमैर्युतः।***

*श्रौतधर्मे तानि कृत्यानि वा संस्काराणि समाविष्टान्यासन् येषां प्रधानसम्बन्धः वैदिकसंहिताभिर्वाब्राह्मणग्रन्थैस्सहासन्। स्मार्तधर्मे ते विषयाः समाविष्टा ये विशेषतः स्मृतिग्रन्थेषु वर्णितास्तथा वर्णाश्रमसम्बन्धिताः। केषुचित् ग्रन्थेषु धर्मस्वरुपं श्रौत(वैदिक) स्मार्त (स्मृत्याधारित) एवं शिष्टाचार (शिष्टसज्जनपुरुषाणामाचार-व्यवहारः) रुपेण भागत्रये विभक्तम् –* ***वेदधर्मः–स्मार्तधर्मः–शिष्टागमश्च*** *।*

१- मत्स्यपुराण १४४/३०-३१

वेदोक्तः परमो धर्मः स्मृतिशास्त्रागतोऽपरः।

शिष्टाचीर्णः परः प्रोक्तस्त्रयो धर्माः सनातनाः॥[१]

अत्र वेदोक्तधर्मः परमधर्मत्वेन प्रतिपादितः, कारणं सर्वशास्त्राणां मूलं वेद एव । तदनन्तरं विविधशास्त्राणां रचनाः जाताः । अतः द्वितीयक्रमे स्मार्तधर्मः संसूचितः । तथैव क्रमेऽस्मिन् तृतीये शिष्टाचारः वर्तते ।

वेदोक्त.....धर्मशास्त्रेषु चापरः ।[२]

शिष्टाचारश्च शिष्टानां त्रिविधं धर्मलक्षणम्॥

"उपदिष्टो धर्मः प्रतिवेदम् । स्मार्तो द्वितीयः । तृतीयः शिष्टागमः। [३]

१ - अनुशासनपर्व १४१/६५

२ - वनपर्व २०७/८३

*३ - बौ०ध०सू० १/ १/ १-४*

धर्मशास्त्राणां विविधस्वरुपचर्चाया पूर्वं सामान्यधर्मस्वरुपविषयकं विवेचनमावश्यकं प्रतीयते।

**सुविज्ञानं चिकितुषे जनाय सच्चासच्च वचसि पस्पृधाते।**

**तयोर्यत्सत्यं यतरदृजीयस्त्तदित्सोमोऽवति हन्त्य सत्।**[१]

अतिप्राचीनकालाद् सत्यं सर्वोपरि लक्षितं,स्वीकृतञ्च। सत्यासत्यवचनयोर्मध्ये स्पर्धा भवति, द्वयोर्मध्ये यत्सत्यं स्यात्, ऋजु(आर्जवं) स्यात्तमेव रक्षति सोमस्तथाऽसत्यं हन्ति च। तैत्तिरीयोपनिषदि समावर्तननामकसंस्कारसमये गुरुः शिष्यं कथयति-

" सत्यं वद। धर्मं चर ।" [२]

*व्यावहारिकजीवने धर्मस्तथा सत्यमुभावपि समानौ ।*[३]

*तदेतानि जपेदसतो मा सद् गमय तमसो मा ज्योतिर्गमय मृत्योर्माऽमृतं गमयेति।*

*मुण्ड्कोपनिषदि केवलं सत्यस्य विजयः प्रशंशितः।*

---

***१- ऋ० ७/१०४/१२***

*२- तैति.०(१/११/१)*

*३ – बृहदारण्यकोपनिषद् १/३/२*

*बृहदारण्यकोपनिषदि त्रयः प्रधानगुणाः वर्णिताः –*

*तस्मादेतत्त्त्रयं शिक्षेद् दमं दानं दयामिति ।*[1]

***अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा।***

***अनुग्रहश्च दानं च सतां धर्मः सनातनः॥***[2]

***"श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।***

***आत्मनः प्रतिकुलानि परेषां न समाचरेत् ॥"***[3]

***"तत्त्वमसि"*** *इत्यस्य दार्शनिकविचारः प्रत्येकजनेषु एकैवात्मन अभिव्यक्तेः द्योतकोऽस्ति। अनया विचारधारया दयाऽहिंसादि गुणान् प्राप्तुं शक्यते। अत्र नैतिकता तथा तत्त्वदर्शनं युगपत् सम्पद्येते। अनेन सिद्धान्तानुसारेण केनचित् मनुष्येण कृतं सुकृत्यं वा दुष्कृत्यं अपरं जनं प्रभावयति। यदि कश्चन आनन्दमिच्छति तर्हि स अन्यं तयैव दृष्ट्या पश्येत् यया स्वीयं पश्यति।*

---

*१ – बृहदारण्यकोपनिषद् ५/२/३*

*२ - महाभारतम्-शान्तिपर्व (१६२/२१)*

*३ – अनुशासन पर्व ११३।८-९*

*उक्तश्च-*

***"यथैवात्मा परस्तद्वद् द्रष्टव्यः सुखमिच्छता ।***

***सुखदुःखानि तुल्यानि यथात्मनि तथा परे॥[1]***

*भगवता मनुना चातुर्वर्णेभ्यः बहूत्तमं स्वरुपं निगादितं धर्मस्य-*

***अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।***

***एतं सामासिकं धर्मः चातुर्वर्ण्येऽब्रवीन्मनुः॥[2]***

---

*१ – दक्ष, ३/२२*

*२ – मनु०१०/६३*

मानवजीवनस्य मूलाधाररुपस्यास्य धर्मस्य परिभाषा भेदोपभेदांश्च विवर्ण्य नूनं मनसि तत्स्वरुपजिज्ञासोदेत्येव । तदपाकर्तुं धर्मस्वरुपविषयं विवृण्महे । एतस्मिन् विषये धर्मधुरन्धराणां स्वामीकरपात्रीमहोदयानां धर्मस्वरुपद्योतकान् विचारान् विवेचयामि । **"चोदना लक्षणो धर्मः"** इति जैमिनिसूत्रानुसारं विधिनिषेधात्मकवेदेनैव प्रतिपाद्यः; तथापि वेदशास्त्रमनभ्युपगन्तृभ्यः पूर्वोक्तधर्मस्वरुपम् आवश्यकन्नास्ति यत् स्वीकृतं भवेत् । किन्तु किमपि धर्मस्वरुपमवश्यम्मानवैस्स्वीकर्तव्यं व्यवहारनिर्वहणाय । कोऽपि बलिपुरुषः कस्यापि सम्पद आहरणं न कुर्वीत इत्येतदर्थं सामाजिक आहोस्विद् प्रशासकीयो व्यवहारः परिस्थितेश्च सुचारुरुपेण निर्वाहाय विज्ञजनसमितिनिर्मितान्नियमान्नूनं स्वीकुर्युः । अन्येषान्तु का कथा स्वयं नियमकर्ता अपि अननुकूलपरिस्थितौ सहसा तान् दूरीकर्तुं नार्हति । चर्चैषा तु भौतिकलाभाऽलाभदृष्ट्या नियमनिर्माणस्य आवश्यकता विषये । अपरा चर्चा कर्तव्याऽकर्तव्य औचित्यानौचित्य निर्धारणाय समयविशेषोऽपेक्षितः ।

स्वभावेन कामादिदोषेन वा प्राप्तवेगनिवारिकायाः कस्यापि अनिवार्यश्रृङ्खलाया आवश्यकता वरीवर्तते । तात्पर्यमेतदेव यत् कालभेदेन कर्तव्याऽकर्तव्ययोः भेदो भवति । कस्मिंश्चिद्देशकाले किमपि कर्तव्याऽकर्तव्यं कस्मिंश्चिद्देशकाले तदेव अकर्तव्याकर्तव्यं भवति । यथा समयविशेषे किमपि वस्तु पथ्यं तदेव समयान्तरे अपथ्यं भवति । निम्नातिनिम्नदशायामपि प्राणी स्वहितस्य कल्याणस्य वा उपेक्षां न करोति । एषा तु

भिन्ना कथा यद्धिताऽहितविचारे असमर्थो भूत्वा हितमहितमहितं हितं च प्रबुध्य प्रवृत्तो निवृत्तो वा भवेत् ।

ज्येष्ठाः विद्वांसः समाजस्य अग्रगाः राष्ट्रनिर्मातारश्चापि यदा कदा समाजस्य राष्ट्रस्य वा कल्याणपद्धतिनिर्माणे क्षतिं कुर्वन्ति , येन तदनुगामिनः धन–जन–शक्तिक्षयेन महान्तोऽनर्थभागिनो भवन्ति । तात्पर्यन्त्वेतदेव यत् जीवनस्य प्रज्ञा तु परिमितार्थस्य ग्रहणे एव समर्था । जप–तपसा धर्मानुष्ठानादिना च यावद् अविद्यादिदोषाणां निराकरणं भवति ; तावदेव अधिकरुपेण अनावृत्तचित्ततत्त्वं सूक्ष्मार्थस्य विवेचने समर्थो भवति । वयमनुभवामः यत् कार्यव्यग्रतावस्थायां चाञ्चल्येन अनवधारणेन वा गम्भीरशास्त्रीयविषयं नावगन्तुं शक्नुमः । अतः एतद् वक्तुं शक्नुमः यत् चाञ्चल्यादिदोषेन तस्मिन् समये तद्विषये अस्माकं बुद्धिप्रवेशो न जातः । ब्राह्ममुहूर्ते तानेव विषयान् विवेचयामश्चेद् विषयबोधो भवति । तात्पर्यन्तु चाञ्चल्यादिदोषेन संकुचितप्रज्ञावन्तः प्राणिनः कर्तव्याऽकर्तव्यनिर्धारणं कर्तुं नार्हति । अतः पूर्वोक्तदोषाणां प्रादुर्भावे किदृशी अवस्था भवति तद्विषये उक्तं यत् –

**बुद्धिश्चिन्त्यते पूर्वं स्वश्रेयो नावबुध्यते ।**

**मुह्यता तु मनुष्येण प्रष्टव्या सुहृदो जनाः ॥**

वेगः यद्यपि स्वाधीनप्रवृत्त्या एव उत्पद्यते, तथापि प्रवृतेः कर्ता वेगाधीनो भवति । यद्यपि धावनमर्थात् शीघ्रतया गमनं धावकाधीनम् , सः धावेत् वा न

धावेत् ; तथापि धावनस्य वेगस्य अभिवृद्धौ धावकस्य बहुविधं स्वातन्त्र्यं नश्यति । अतः धावकः

स्वाभिमतस्थले स्थातुं पूर्वमेव वेगस्य शान्त्यर्थं गतिं मन्दीकरोति ; अन्यथा स्वेप्सितस्थले स्थातुं न शक्नोति । अत एव मनः कुठारादिसाधनवत् परतन्त्रं वर्तते ;

अर्थात् अस्माकमिच्छया वृक्षस्य कुठारेण छेदनाऽछेदनं भवितुमर्हति; नात्र कुठारः स्वतन्त्रः । अनया रीत्या मनसा मननं कुर्यात् न वा ; किन्तु तथापि कर्तुः परतन्त्रता अनुभवसिद्धाऽस्ति ।

वयं इच्छामः यत् विषयचिन्तनं न भवेत् ; किन्तु त्यक्तुं न शक्नुमः । एषा एव वेगस्य महत्ता वर्तते । अनादिकालात् प्राणी मनसा विषयचिन्तं करोति । अनेन तस्य वेगो प्रवृद्धो जातः । अधिककालस्य प्रवृत्त्या वेगवृद्धिर्भवति ; अलपकालस्य प्रवृत्त्या वेगोऽल्पो भवति । अल्पो वेगः अल्पप्रयत्नेन शाम्यति ; किन्तु वर्धितवेगस्य निवृत्तये अधिकप्रयत्न आवश्यकः । अशिक्षितोऽनियन्त्रितश्च अश्वः यथा शनैः शनैः महद्युक्त्या नियन्त्र्यते; सहसा तु न; तथैव वेगारुढं मनोऽपि सहसा वशीभूतो नैव जायते ; किन्तु तस्य किञ्चिद् अनुसरणेन तथा केनचिद् वृत्तिनियन्त्रणेन वशीभूतं क्रियते । यथा प्रवाहवती नदी सहसा न रुणद्धि किन्तु शनैः शनैः अन्योन्यन्मुखीकरणेन प्रवृद्धप्रवाहः शान्तो भवति । राजमार्गे यत्र तत्र भयस्थानं सङ्केतितं भवति । येन शीघ्रगामियानादिचालकं भयस्थानस्य परिज्ञानं भवेत् तथा

समये यानस्य अवरोधो भवेत् । यदि किञ्चिद्दूरे भयसङ्केतचिह्नं न स्यात् चेत् वेगारुढयानं सहसा स्वाधीनं कर्तुं न शक्नोमि । तथैव कर्तव्याऽकर्तव्यविवेकाय अपि कश्चित्कालोऽपेक्षितः ।

समयप्राप्तये वेगविरोधः आवश्यकस्तथा तस्मै वेगविरोधाय कापि दृढा श्रृङ्खला आवश्यकी । एनां श्रृङ्खलामेव प्रेक्षावन्तो जनाः "धर्मः" उच्यन्ते । तात्पर्यन्त्विदमेव यत् कामक्रोधादिजन्यस्य तस्य वेगस्य शान्त्यर्थं प्राणी कर्तव्याऽकर्तव्यनिर्णये असमर्थो वरीवर्तते; दीर्घदर्शिभिर्निर्धारिता धर्माधर्मनियमरुपा दृढाश्रृङ्खला भवेत् येन

आगन्तुकाऽनिष्टस्य सम्भावनया वेगः शान्तो भूत्वा तद्विषये चिन्तयामः । इति विचारेण धर्मस्य प्राथमिकलक्षणमेतदेव भवेत् यत् " **यस्मिन् देशे–काले–जातौ सम्प्रदाये वा दीर्घदर्शिनः; ते प्रायः तस्थैः निवासिभिः प्राप्तादराः वर्तन्ते ; तैर्निर्मितं कर्तव्याऽकर्तव्यमेव तद्देश–काल–जाति–सम्प्रदायस्य व्यक्तिभ्यः धर्मो विद्यते"।**

यद्यपि एतत् सत्यं यत् धर्माधर्मे पारस्परिकं वैमत्यं वर्तते । कृत्यमेकं पक्षेणैकेन धर्मः परिगण्यते , अपरेण च अधर्मः । अस्यां दशायां क आप्तः कश्चाऽनाप्तः ? भूत–भविष्य–वर्तमानस्य सर्वेषां महर्षीणामेकस्मिन् काले उपस्थितिः अशक्या । तेषु कञ्चिद् एकमेव सर्वज्ञं ब्रुमश्चेद् अपरः कथन्न सर्वज्ञ इति विनिगमना विरहो वरीवर्तते । यतो हि सर्वज्ञता तु अस्माकं बुद्धिविषया तु न ।

एकस्मिन् तृणे केषां वस्तूनां उत्पादिका केषाञ्च वस्तूनां संहारिकाशक्तिरस्ति इत्यस्यापि पूर्णतया ज्ञानं प्राणिभ्योऽशक्यम् । द्वयोः त्रयाणां वा तृणानां संयोग–वियोगेन कियन्तः शक्तय आविर्भूतोद्भूताश्च भवन्ति । पुनश्च अनन्ततृणानां संयोगवियोगैराविर्भूत–तिरोभूताऽनन्तशक्तीनां परिज्ञानं कान् कथञ्च भवेत् ? तथैव किं कृत्यं कस्मिन् काले

देशे वा कस्य इष्टस्याऽनिष्टस्य वा सम्पादनं करोति इति निर्धारणं परिमिताप्रज्ञाशालिपुरुषः कथं करिष्यति ।

यदि चोच्यते परमेश्वरः सर्वज्ञो वर्तते; अतः तन्निर्मितनियमानेव श्रृङ्खलारुपेण उररीकुर्मश्चेन्नेतद् युक्तम्; यतो हि प्रथमन्तावद् अनीश्वरवादीनां सांख्य–मीमांसकानां

पक्षे नैते नियमा इष्टा भविष्यन्ति । अपरम् ईश्वरवादीनां मते एकेश्वरो निर्णितो नास्ति; यतो हि प्रत्यक्षविषयत्वात् । शास्त्रेणैव तत्सिद्धत्वात् । शास्त्रेण ईश्वरसिद्धिः; ईश्वरेणशास्त्रसिद्धिः इति परस्परम् अन्योन्याश्रयदोषोऽनिवार्यः । पुनश्च किं शास्त्रे ईश्वरनिर्मितं किञ्च अनीश्वरनिर्मितम् ; एतदपि सहसा निर्णितं न भवति । अस्यां दशायां वास्तविकधर्मस्य स्वरुपं कीदृशं निर्णितं भविष्यति ? ।

यदि चोच्यते धर्मस्य प्रथमं निर्णयः उचितः; यावत्कालपर्यन्तं धर्मस्य निर्णयो न भवेत् तावत्कालपर्यन्तम् धर्मानुष्ठानस्य आवश्यकता नास्ति । एतदपि न युकतम्; यतो हि पूर्वकथनानुसारं श्रृङ्खलाविहीनपाशविकप्रवृत्त्या प्राणिनः तादृशं दीनत्वं प्राप्नोति येन विचारं निर्णयं वा कर्तुं सामर्थ्यवन्तः न भवन्ति । सामन्यबुद्ध्या नैकेषु

जन्मष्वपि मिथ्याभाषणे सत्यभाषणे वा कौ गुणदोषौ ?। अधिकाधिकरुपेन इत्येव वक्तुं शक्यते यत् मिथ्याभाषणं व्यवहारस्य बाधकः अव्यवहारस्य हेतुत्वम् । सत्यभाणे एतादृशं नास्ति । अनेनापि सत्यं केवलम् अविश्वासादीनां हेतुः न; पुण्यस्यापि हेतुः; इत्यपि न सिद्धयति ।

## “ परोपकारः पुण्याय पापाय परपीडनम्”

इति व्यासवचनं तथाऽपि परोपकारेण पुण्यं परपीडनेन पापं भवतीत्यपि वक्तुं न शक्नुमः कारणं न्यायशास्त्रानुसारं चौरेभ्यो दण्डप्रदानं धर्म उच्यते । परपत्न्या उअपरमणञ्च धर्मदृष्ट्या पापमुच्यते । एतत्तु पूर्वमेव प्रोक्तं यत् यावत्कालपर्यन्तम् उन्मुक्तपाशविकप्रवृत्तिं न रोधयामस्तावत्कालपर्यन्तं कस्यापि वस्तुनः यथार्थविचारेण

सम्यग्ज्ञानं न भवति । अतः वस्तुनो विचारस्तदैव सम्भाव्यते यदा काभिरपि श्रृङ्खलाभिः प्रवृत्तिनिरोधो भवेत् ।

कश्चन शिष्य आचार्याय ककारनिर्देशने प्रश्नं करोति यत् एनं ककारमेव कथं ब्रूवते ? यदि चोत्तरं दास्यते चेदपि शिष्यः तदुत्तरं ज्ञातुं शक्नोति ? अभिप्रायस्तु एतदेव यत् ज्ञानप्राप्तेः प्रथमचरणे एव बालकः प्रतिप्रश्ने कथमिति प्रशनं करोति चेत् कोटिजन्मष्वपि ज्ञातुं न शक्नोति न च तं ज्ञापयितुमपि शक्नोति।

अन्ततोगत्वा बालकः परमोन्नत्या वञ्चितो भवति । अतः प्रथमं बालकेन ज्ञानार्जने "ननु" "नच" इत्यादिप्रश्नाः न करणीयाः अपि तु आचार्योपदेशं ऊरीकर्तव्यः । एतत्करणे अल्पदिनेषु एव विद्वान् सुधीर्वा भूत्वा स्वयमेव ज्ञास्यति यत् "क" चिह्नविशेषककारकथनस्य किं प्रयोजनम् । तथैव यदि कस्यापि शास्त्रस्य आचार्यस्य श्रृङ्खलया उन्मुक्तप्रवृत्तेः निरोधः काचिन्मात्रायां भवति चेत् शनैः शनैः विचारशक्तेः विकासो भूत्वा तात्त्विकवस्तुनः धर्मविचारस्य ज्ञानस्य वापि अधिकारी भवति । अन्यथा कोटिजन्मष्वपि एतद् ज्ञातुमशक्यं वर्तते ।

प्रश्नोऽत्र समुद्भवति यत् कस्य शास्त्रनिर्दिष्टस्य आचार्यप्रतिपादितस्य वा श्रृङ्खलायाः नियमितप्रवृत्तेः सम्पादनं कुर्यात् ? अस्योत्तरं तु तदेव यत् वयं काशीं गन्तुमिच्छामः किन्तु गमनाय त्रिणि मार्गाणि सन्ति । त्रयाणां मार्गाणां पथिकाः वदन्ति यत् अयमेव मार्गः लक्ष्यप्रापको वर्तते तदा प्रेक्षावतां बुद्धिः एतदेव विनिश्चिनोति यत् त्रयाणां मार्गाणां पथिकेषु देश–नगर–ग्राम–कुटुम्बादिभिः यो निकटतमो भवति;

तदुपदेशमेवानुसरामः । एतदतिरिच्य नान्योपायः । तद्वत् अत्रापि भवतां सम्मुखे नैकेषु धर्माचार्येषु शास्त्रेषु वा यत् पिता–प्रपितादिभि आदृतं पूजितं शास्त्रमाचार्यो वा भवति तन्निर्दिष्टश्रृङ्खलाया आदौ ग्रहणं समुचितं भवति ।

अत एव प्रोक्तं व्यापकधर्मस्य प्राथमिकस्वरुपमेतदेव ग्राह्यमुपयुक्तञ्च भवति यत् "येषां देशकालादीनां पुरुषैरुत्कृष्टतया अभिमतो पुरुषः शास्त्रं वा वर्तते;

तेनोपदिष्टो नियमो धर्म उच्यते” तेषामेव समाश्रयणं प्रकृत्य प्राणी उच्छृङ्खलपाशविकप्रवृत्तिं निरुध्य सूक्ष्मांशानां सविवेककार्याणि अनुष्ठीय कल्याणं प्रति अग्रेसरो भवति । अस्य एतद् कदापि तात्पर्यं न भवति यत् सम्यक् निर्भ्रान्तधर्मस्य परिज्ञाने भवति सति अन्धश्रद्धया भ्रान्तधर्मे एव सदा निमग्नो भवेत्। किन्तु यावत्कालपर्यन्तं निर्भ्रान्तधर्मस्य सम्यक् प्रत्यक्षज्ञानं न भवेत् तावत्पर्यन्तमेव युक्तम् । यतो हि सम्यग्विचारेणैतद् ज्ञायते यत् सोपानारोहक्रमेण नानाधर्माणां स्माश्रयणम् अस्मिन् जन्मनि जन्मान्तरे वा कर्तव्यानि ।

धर्मशब्दस्य अर्थः “ध्रियते अभ्युदयनिःश्रेयसादनेन” इति व्युत्पत्या अभ्युदयादेः साधनं वर्तते । यः यावतीमुन्नतीमभ्युदयरुपेण स्वीकृतं विद्यते, तस्य उन्नतेः तावत्प्रमाणसिद्धं साधनं भवेत्; तस्मै तावदेव धर्म उच्यते । अनया दृष्ट्या चार्वाकोऽपि

धार्मिकः । यतो हि सोऽपि विषयोपभोगादीन् अभ्युपैति । अतः तस्य प्रत्यक्षादिभिर्विनिश्चितसाधनं कृषिवाणिज्यादिः वर्तते । लोकायतिकः प्रत्यक्षप्रमाणसिद्धम् उन्नतिमेव अभ्युदयमुररीकुरुते । बौद्धादयोऽनुमानद्वारा

प्रत्यक्षसिद्धोन्नत्या विलक्षणपारलौकिकौन्नतिमुरीकुर्वन्ति । अतः तेषां साधनपि अनुमानसिद्धमङ्गीकुर्वते । यद्यपि केषाञ्चिच्छास्त्राणामवलम्बनन्तु तेऽपि स्विकुर्वन्त्येव;

तथापि तेषां शास्त्राणि प्रत्यक्षानुमानाभ्यामसिद्धवस्तुनः सिद्ध्यर्थं समर्थाः न सन्ति । यतो हि शास्त्रकर्तारः प्रत्यक्षानुमानाभ्यामेव शास्त्रसम्पादनं प्रकृत्य शास्त्रनिर्माणं कुर्वन्ति । अतः तन्मते प्रत्यक्षानुमानमेवाभ्युपैति ।

तात्पर्यन्त्विदमेव यत् विश्वस्य विश्वस्य सर्वेषां प्राणिनां कृते हिताऽहिताविवेकजन्यमहदनर्थात् त्रातुं तथा निर्विघ्नाभ्युदयसिद्ध्यर्थं केचन नियमाः स्वाभाविकप्रवृत्तेः निवारकाः श्रृङ्खलारुपेण अभ्युपेयाः । एषा तु भिन्ना चर्चा यत् ते नियमाः परस्परं विभिन्ना अथवा कतिपयाशेषु विरुद्धा भवेयुः । यतो हि उन्नति अवनतिश्च अपेक्षाधीना भवति । काचित् स्थितिः कस्मैचित् उन्नतिरुपेन परिगण्यते अन्येभ्यश्च अवनतिरुपेण । अवसाम्प्रदायिकनियमानुसारेण नियमपालकः कश्चिज्जनः स्वसमाजे उच्छृङ्खलप्रवृत्तिमतामपेक्षया ज्यायान् परिगण्यते; यतो हि तस्य स्थितिः उच्छृङ्खलपुरुषापेक्षया श्रेष्ठा वर्तते । किन्तु अनेन एतद् वक्तुमशक्यं यत् एषः अन्येभ्योऽपि श्रेष्ठ इति ।

धर्मस्य एतल्लक्षणं नीतिशास्त्रेण सह अपि प्रायशो युक्तिसङ्गतो भवति । कारणं तत्र – यथा अभ्युदयसाधनं धर्म प्रोच्यते तथैव **“नीयतेऽभ्युदयोऽनया”** इति व्युत्पत्या नीतेरपि अभ्युदयसाधनमेव अर्थो भवति । तदा तु पर्यायवाचकता भविष्यति; परन्तु लोके उभयोः शब्दयोः भिन्नप्रयोगो दृश्यते । अतः उभयोः

शब्दयोरपि अवश्यमेव भिन्नार्थो स्वीकर्तव्यः । अतः प्राधान्येन ऐहिकाभ्युदयसाधनं नीतिः तथा प्राधान्येन पारलौकिकाभ्युदयसाधनं धर्मो ज्ञातव्यः ।

अत्र प्राधान्यशब्दस्य अभिप्राय इदमेव यत् नीतिः प्राधान्येन लौकिकाभ्युदयस्य साधनमपि सदपि पारलौकिकाभ्युदयस्यापि साधनं भवति ; यथा धर्मशास्त्रेषु दण्ड्याय दण्डप्रदानेन दण्ड्यदण्डयितारौ उभौ स्वर्गं यातः । अस्योदाहरणानि तु महर्षिलिखितानि तथा राजा सुद्युम्नो वर्तते । एवं पारलौकिकाभ्युदयस्य साधनमपि ऐहिकाभ्युदये सहायकृद् भवति । अनेन एतत्सिद्ध्यति यत् नीतिः पारलौकिकाभ्युदयस्य साधनं न भवेत् भवतुनाम; किन्तु पारलौकिकाभ्युदयस्य व्यापदिका नैव भविष्यति । दूरदर्शिनः परिणामे बद्धादराः भवन्ति । निकटदर्शिनः समीपवर्तिनी फले आकाङ्क्षिणो वर्तन्ते । परिणामे अनिष्टकरोऽभ्युदयो वस्तुतः अभ्युदयो न अभ्युदयाभासो वर्तते । दुर्योधनस्य नीतिः तात्कालिकं फलदा किन्तु परिणामे सर्वस्य नाशिका । अत एव धर्मविरोधिनी जाता। सुधयः तं कूटनीतिः नित्यभासिका भणन्ति । अपरपक्षे युधिष्ठिरस्य नीतिः यद्यपि आदौ किञ्चित्कालपर्यन्तं कष्टप्रदा; किन्तु परिणामे सर्वतोभावेन अभिवृद्धेः हेतुरुपा। द्वितीयायाः चन्द्रलेखा अल्पमात्रायां भवति तथापि अभिवर्धनोन्मुखा अतः सर्वैर्वन्द्या ।

पूर्णिमायाः पूर्णकलासम्पन्नं बिम्बमपि तादृशं न वन्द्यम् । यतो हि तस्य पूर्णताया अवधिः समाप्ता जाता; अधुना सुधाकरः क्षयिष्णुः वर्तते ।

यदि कोऽपि नीतिः सद्यः (प्रारम्भे) दुःखकरी भवेत्; अवनतेश्चापि जनिका भवेत् किन्तु परिणामे यदि उन्नताभ्युदयस्य च जनिका वर्तते चेत् यथार्थनीतिः।

नीतिधर्मयोर्मध्ये एतावान् भेदः अवश्यमेव दृष्टिगोचरो भवति यत् नीतिस्वरुपं देशकालभेदेन परिवर्तनार्हं भवति । कारणन्त्वत्र नीतेः साध्यसाधनभावो लौकिको वर्तते । तं झटिति बुद्ध्याऽवगन्तुं कतिपयाशेषु कदाचित् शक्यते । किन्तु धर्मोऽदृष्टेन सह सम्बध्नाति । अतः तस्य साध्यसाधनभावो चर्मचक्षुसा ज्ञातुं न वारयामः । तद्विचारार्थमपि विलक्षणदीर्घदर्शिनां गवेषकाणाञ्च आवश्यकता वर्तते; अतः तस्मिन् परिवर्तनमपि न साहजिकम् ।

एतदपि सत्यं  यत् पुरातनसंस्कृतिपरिपौषकैरपि कालभेदेन धर्मस्य परिवर्तनं कृतम् । कस्मिश्चिद् युगे मन्वादिप्रोक्तम्; कुत्रचित् याज्ञवल्क्यादि प्रोक्तम्; कुत्रचिच्च पराशरप्रोक्तं धर्माणामादरस्मृतिप्रोक्तम् । युगभेदेन धर्मस्य तारत्म्योऽपि वर्तते । तथाऽपि अत्र एतद् विचारः कर्तव्यो यत् परिवर्तनं सावधिः भवेद् अथवा निरवधि भवेद्; निरवधिकपरिवर्तनेन निश्रृङ्खलप्रवृतिर्भविष्यति । तदा तु धर्मस्य प्रयोजनम्; यत् पाशविकी–उच्छृङ्खलप्रवृत्तेः निरोधो वर्तते तदपि न सिध्यति । अपरे जनाः नीतिविरुद्धाः; यतो हि नीतिज्ञोऽपि यदि केनापि सह सन्धिं करोति चेत् केषुचन नियमेषु दृढाः भवन्ति; ये अनुलङ्घनार्हाः भवन्ति; अन्यथा शनैः शनैः अन्यविपक्षिराष्ट्राणि अस्माकं समग्रराष्ट्रस्य उपरि आक्रमणं कर्तुं शक्नुवन्ति । अत एव

केचन नियमाः सन्धिमध्ये स्थापयन्ति; येषां विच्छेदेन अन्यनीतीनां समाश्रयणं कर्तव्यम् । यदा लौकिकस्थूलकार्येषु उपयुक्तस्थूलदर्शनेभ्यः निर्धारितलौकिकनियमाः सहसा अनुल्लङ्घनीया भवन्ति; पुनश्च परमसूक्ष्मधार्मिकनियमानां निरवधिकं परिवर्तनं कथं भवितुं शक्यते ?

अत्र प्रथमपक्षोऽपि न युक्त; यतो हि अवधिनिर्धारणकर्ता को भवेत् ? यदि यः कोऽपि निर्धारणकर्ता भवेत् तदा तु यस्य या इष्टावधि भवेत् तस्या एव निर्माणं कुर्यात् । अतः यः सर्वदेशस्य सर्वकालस्य परिस्थितीः जानाति स एव तत्तद्देशकालानुकूलं परिवर्तनं कर्तुं शक्नोति । अनया रीत्या अल्पज्ञपुरुषान् नाऽयमधिकारः । स्मृतीणां मतभेदस्यापि अयमेव अभिप्रायो वर्तते यत् वेदरहस्यज्ञ–सर्वज्ञ–कल्प–महर्षिभिः देशकालस्य परिस्थितिं ज्ञात्वा भिन्न–भिन्नयुगार्थं धर्माः व्यवस्थापिताः । तेऽपि नित्यरुपेण एव तत्तद् युगेभ्यः या व्यवस्था वर्तते; सा एव महर्षिभिः प्रतिष्ठापिता वर्तन्ते । अनेन प्रकारेणैव धर्मस्य नित्यता अपि वर्तते ।

वैदिकस्मार्तधर्मेषु केचन धर्मास्तु सदा समानरुपाः भवन्ति; केचन देश–काल–भेदेन संकोचविकासशीलाः भवन्ति । अतः येषां स्मृतीनां मूलं वेदेषु झटिति नोपलभ्यते; तस्य वेदमूलकत्वमनुमीयते–**“इयं स्मृतिर्वेदमूलिका स्मृतित्वान्मन्वादिस्मृतिवत्”** शतपथब्राह्मणेऽपि उक्तं यत् **“यद्वै मनुरवदत् तद् भेषजं भेषजतायाः”।** अनेन मनोः प्रमाणं सर्वोपरि सिद्धयति । अत एव याः स्मृतयः वेदविरुद्धाः निर्मिताः तासु प्रमात्वं नास्ति ।

अस्यैव भावस्य सूचना जैमिनिः–**“विरोधे त्वनपेक्षं स्यादस्ति ह्यनुमानम्”** अनेन सूत्रेण प्रदत्तम् । यदि चोच्यते आधुनिकबुद्धिमद्भिः नेतृभिः निर्धारितनियमानामपि वेदमूलकत्वनुमातुं शक्नोमि; तर्हि नैतद् वरम् । कारणं तत्र तदर्थग्रहण–धारणाऽनुष्ठानकर्तृभिः निःस्पृहपुरुषश्रेष्ठैरेव निश्चितनियमानां वेदमूलकता

सिद्धयति । आधुनिकज्ञानदुर्विदग्धराग–द्वेषादि–दूषित–वेदशास्त्र–विरोधिनिर्मितनियमानां वेद–मूलकत्वन्ननुमीयते । धर्मस्य नित्याऽपि प्रवाहरुपेणैव न तु कूटस्थरुपेण । अन्यथा कूटस्थनित्यत्वात् पुरुषव्यापारसाध्यता न भवति । तत्तु वर्तमानमात्रग्राहिप्रत्यक्षाऽविषयत्वं वर्तते । अनुमानेनाऽपि धर्माऽधर्मौ सामान्यरुपेणैवावगम्यते ।

येषां बालादीनां तारतम्यं विना ऐहिकहेतून् दृश्यते; तस्य हेतुः कौचन वर्तमानदेहव्यतिरिक्तदेहकृतधर्माधर्मौ अवश्यं स्वीकर्तव्यम् । लोके किमपि कार्यं निर्हेतुकं न दृश्यते । बहुत्र स्थलेषु लौकिकहेतूनां कल्पना न दृश्यते । केचन प्राणिनः विना प्रयत्नेनापि सफलाः दृश्यन्ते; केचन प्राणिनः कृते प्रयत्ने अपि असफलाः भवन्ति । एकेनैव राज्ञा सह वर्तमानौ राजकुमारौ समानपालनव्यवस्थायां सत्यामपि एकत्र हृष्टत्व–पुष्टत्व–चित्तप्रसादत्वं दृश्यते; अपरत्र रागदोषादिः । यदि वर्तमानदेहवर्तिसुखदुःखादि–निर्हेतुकं स्यात् तदा तु अकृताभ्यासदोषो नूनं भविष्यति तथा अनेन देहेन विहितकर्मणां विना भोगं फलं क्षयिष्णुर्भविष्यति । अत अन्ततोगत्वा सुखदुःखस्य किञ्चिद् हेतुविशेषमवगम्यते; तथाऽपि तत् किं वर्तते इति तु नाऽनुमानेन किन्तु शास्त्रेणैव अवगम्यते ।

अधुना अत्र धर्मस्य वास्तविकं स्वरुपं दर्शयितुं केषाञ्चिद् दार्शनिकानां धर्माऽधर्मविषयकविप्रतिपत्तीः पश्यामः ।

- शुभाऽशुभकर्मणां वासनया वासितः परमाणुरेव धर्म इति जैनाः ।

- क्षणिकविज्ञानसंतत्याश्रितवासना एव धर्म इति बौद्धानां मतम् ।

- योगज्ञानादिना वृत्तिनिरोधेन जीवन्मुक्तिः धर्म इति तु सांख्यवादीनां मतम् ।
- विहितप्रतिषिद्धकर्माणामाचरणवर्जनद्वारा प्राप्तविशिष्टो गुणो धर्म इति तु वैशेषिकानां मतम् ।
- 'अपूर्व एव धर्मः' इति तु प्रभाकरादि–मिमांसकानां वचः ।
- वेदबोधितः 'चोदना लक्षणोऽर्थो धर्मः' एतेन जैमिनि–सूत्रेण प्रवर्तितः, वेदशास्त्रेण बोधितः, राग–द्वेषरहितः, सत्पुरुषसेवितः होम–याग–दानादिरेव धर्म एतद् जैमिन्यनुयायिमीमांसकानां मतम् ।

आचार्याणां निष्कर्षोऽयं यत् "**बलवदनिष्टाप्रयोजकत्वे सति श्रेयः साधनतया वेदप्रमातितत्वमेव धर्मत्वम्** " अर्थात् यत्कार्यं बलवतोऽनिष्टस्य हेतुर्नास्ति; वेदैर्बोधितं श्रेयस्करसाधनं वर्तते स एव धर्मः । बलवद्–अनिष्टस्य अहेतु इत्यस्य एतदेव अभिप्रायो यत् शत्रु–मरणहेतुः श्येनादियागो वर्तते । किन्तु तत् शास्त्रैः शत्रुमरणरुपफलापेक्षया बलवान् अनिष्टसंपादको हेतुः वर्तते । अतः नाऽयं धर्मः। यदि ज्यौतिषशास्त्रादिना भाविपुत्रस्य दुर्वृत्तयः ज्ञायन्ते चेत् तदर्थं पुत्रेष्टियागोऽपि न धर्मः ।

यस्मिन् पथि कूपखननेन गोपतनं निश्चितं सोऽपि न धर्मः । वेदबोधितकथनस्य तात्पर्यं भोजनादिः बलवद् अनिष्टस्य हेतुरपि नास्ति श्रेयःसाधनपि वर्तते तथाऽपि

न धर्मः ; यतो हि तत्र प्राणीनां स्वाभाविकी प्रवृतिः । तद् बोधनाय वेदस्य वेदस्य आवश्यक्ता नास्ति । अनया रीत्या सिद्धयति यत् वेदैः बोधितं श्रेयःसाधनम्;

अनिष्टस्य अहेतुः यथा वर्णाश्रमं सर्वाणि कृत्याणि धर्मो वर्तते। एतद्विरुद्धं बलवतोऽनिष्टस्य सम्पादकं वेदनिषिद्धं कृत्यम् अधर्मः । उक्तञ्च विदुरनीतौ–

**आर्षं धर्मोपदेशं च वेदशास्त्रविरोधिना ।**

**यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः ॥**

**“चत्वारि धर्माण्यभयङ्कराणि भयं प्रयच्छन्त्ययथा कृतानि ।**

**मानाग्निहोत्रमुत मानमौनं मानेनाधीतमुत मानयज्ञः ॥**

अर्थात् चत्वारि कर्माणि अभयङ्कराणि; किन्तु एतान्येव कर्माणि सम्यग् अनाचरितानि चेत् भयङ्कराणि भवन्ति । तानि कर्माणि सादरम् अग्निहोत्र–मौनपरिपालन–स्वाध्याय–यज्ञानुष्ठानञ्च । इति संक्षिप्तधियाऽत्र शास्त्राधारेण चिन्तनात्मकं धर्मस्वरुपं प्रतिपादितं विस्तारभयादलमतिपल्लवेन ।

# चतुर्थोऽध्यायः

# (धर्मतत्त्वविमर्शः)


४.१. वेदेषु धर्मतत्त्वम् । १९०–१९५

४.२. वेदोत्तरकाले धर्मस्य स्थितिः । १९६

४.३. स्मृतिग्रन्थेषु धर्मतत्त्वं, तत्स्वरुपञ्च । १९७–२२१

४.४. महापुराणेषु धर्मतत्त्वं, तत्स्वरुपं, विविधभेदाश्च ।२२२–२३३

# (चतुर्थोऽध्यायः)

## ४.१. "वेदेषु धर्मतत्त्वम् "

संस्कृतशब्देषु 'धर्म' शब्दस्य प्रयोगो बहूष्वर्थेषु भवति । शब्दोऽयं नैकपरिवर्तनविपर्ययेषु भ्रमितः । ऋगवेदस्य ऋचासु 'धमर्न्' शब्दो विशेषणत्वेन वा संज्ञारुपत्वेन षड्पञ्चाशत्(५६) वारं प्रयुक्तः । वेदस्य वाण्यां तस्मिन् काले शब्दस्यास्य को वास्तविकार्थः इति वक्तुमशक्यमस्ति । स्पष्टतः शब्दोऽयं 'धृ' धातुना निर्मितः, यस्य तात्पर्यमस्ति धारणं, आलम्बनं, पालनञ्च । ऋग्वेदस्य कासुचित् ऋचासु 'धर्म' शब्दः पुल्लिङ्गेऽपि प्रयुक्तः । यथा–

**"पितुं नु स्तोषं महो धर्माणं तविषीम् ।[1]"**

**"इममञ्जस्पामुभये अकृण्वत धर्माणमग्निं विदथस्य साधनम् ।[2]"**

**"त्वे धर्माण आसते जुहूभिः सिञ्चतीरिव ।[3]"**

अधिकांशस्थानेषु 'धर्म' शब्दस्य प्रयोगो धार्मिकक्रियासंस्कारादिषु जातोऽस्ति । यथा–ऋग्वेदस्य १.२२.१८, ५.२६.६, ७.४३.२४, ९.६४.१ आदि स्थानेषु । ऋग्वेदस्य ऋचेयं उपर्युक्तकथनं प्रमाणयति–**"तानि धर्माणि प्रथमान्यासन्"।**[4] तद्वदेव **"प्रथमा धर्मा"**(ऋग्वेद,३.१७.१) तथा **"सनता धर्माणि"**(ऋग्वेद,३.३.१) इत्यनयोरर्थः क्रमशः 'प्रथमाः विधयः' तथा 'प्राचीनाः विधयः' अस्ति ।

---

[1]. *ऋग्वेद, (१.१८७.१)*
[2]. *ऋग्वेद, (१०.९२.२)*
[3]. *ऋग्वेद, (१०.२१.३)*
[4]. *ऋग्वेद, (१०.९०.१६)*

कुत्रचित् अस्यार्थः प्रकटः नाऽपि भवति ।

यथा–**"आ प्रा रजांसि दिव्यानि पार्थिवा श्लोकं देवः कृणुते स्वाय धर्मणे ।**[१]

**"धर्मणा मित्रा वरुणा विपश्चिता व्रता रक्षेथे असुरस्य मायया ।**[२] तथैव **"द्यावा–पृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ।**[३] एवञ्च **"अचित्तो यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ।**[४] आदिषु 'धर्म' शब्दस्याऽर्थः 'निश्चितनियमः' (व्यवस्था वा सिद्धान्तः) अथवा 'आचरणनियमः' अस्ति । 'धर्म' शब्दस्य उपर्युक्तार्थः वाजसनेयी संहितायामपि प्राप्यते । एकस्मिन् स्थाने **"ध्रुवेण धर्मणा"** प्रयोगोऽपि मिलति ।

ऋग्वेदस्य बहवः मन्त्राः अथर्ववेदेऽपि मिलन्ति ; यत्र 'धर्मन्' शब्दस्य प्रयोगः जातः । **अथर्ववेदे** 'धर्म' शब्दः **"धार्मिकक्रियासंस्कारैरर्जितगुण"** स्वरूपे प्रयुक्तोऽस्ति । यथा–

**"ऋतं सत्यं तपो राष्ट्रं श्रमो धर्मश्च कर्म च ।**

**भूतं भविष्यदुच्छिष्टे वीर्यं लक्ष्मीर्बलं बले ॥**[५]

**ऐतरेयब्राह्मणग्रन्थे** 'धर्म' शब्दः सकलधार्मिककर्तव्यार्थे प्रयुक्तः। **छान्दोग्योपनिषदि** धर्मस्यैकः महत्त्वपूर्णार्थः प्राप्यते, तदनुसारं धर्मस्य तिस्रः शाखाः

---

१. *ऋग्वेद, (४.५३.३)*

२. *ऋग्वेद, (५.६३.७)*

३. *ऋग्वेद, (६.७०.१)*

४. *ऋग्वेद, (७,८९,५)*

५. *अथर्ववेद, (९.९.१७)*

सन्ति । यथा–**"त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एवेति द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन् । सर्वे एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति** । (१) यज्ञ–अध्ययन–दान–गृहस्थधर्मः (२) तापसधर्मः (३) ब्रह्मचारित्वम् अर्थात् आचार्यस्य गृहे अन्तपर्यन्तं वासः । अत्र 'धर्म' शब्दः आश्रमाणां विलक्षणकर्तव्यानि सूचयति । इत्थं वक्तुं शक्यते यत् "धर्म"स्य स्वरुपं समयान्तरे परिवर्तनचक्रे परिवर्तितम् । किन्त्वन्तेऽयं "धर्म" मनुष्याणां विशेषाधिकाराणां, कर्तव्याणां, बन्धनानां, आर्यजात्याचार विधि–परिचायकस्य, वर्णाश्रमस्य च द्योतको जातः । **तैतिरीयोपनिषदि** छात्राणाङ्कृते यो "धर्म" शब्दः प्रयुक्तः स अस्मिनेवाऽर्थेऽस्ति यथा–**"सत्यं वद" "धर्मं चर"** इत्यादिः। **श्रीमद्भगवद्गीता**यामपि "**स्वधर्मे निधनं श्रेयः"** इत्यस्मिन् वाक्येऽपि 'धर्म' शब्दस्य अयमेवाऽर्थः ।

वैदिकऋषिभिः जीवितानां साध्यत्वेन चत्वारः पुरुषार्थारुपदिष्टाः, ते यथा धर्माऽर्थकाममोक्षरुपाः । मोक्षः परमपुरुषार्थः प्रतिपादितः, नतु साध्योऽपितु सिद्धः । शिष्टास्त्रयः साध्याः पुरुषार्थाः । तत्त्वदर्शिनः ऋषयः धर्मसहितार्थकामौ भोग्यत्वेनैव निर्दिष्टवन्तौ । अर्थकामौ केवलौ पतनस्य कारणत्वात् न अनुमतौ, कारणम् अर्थकामयोः सेवनेन मनुष्यः शीलचारित्राभ्यां हीनः सन् मनुष्यत्वं परित्यज्य पशुत्वम् उपगच्छति ।

**वैदिकसंहितासु सत्यधर्मौ संस्कृत्या आधारस्थम्भत्वेन अनुमतौ । अतः सर्वत्र वैदिकवाङ्मये सत्यधर्मयोः महती प्रशंसा कृता वर्तते । सत्य–**

**धर्माविभावप्यन्योऽन्याश्रितौ स्तः। यः सत्यं वक्ति स एव धर्मं पालयितुं शक्नोति । यो धार्मिकः स एव सत्यपालनं करोतीत्यर्थः ।** वेदेष्वस्योदाहरणानि यथा–

**१. "सुविज्ञानं चिकितुषे जनाय सच्चाऽसच्च पस्पृधाते ।'**(ऋग्वेद, ७/१०४/१२)

( मन्त्रेऽस्मिन् महर्षिणा सत्याऽसत्यवचनयोः या पतिस्पर्धाऽस्ति, तस्या निर्देशेन समं सत्यवचनम् ऋजु भवतीत्युक्त्वा सत्यभाषणं सोमोऽववतीत्यसत्यवचनं हिनस्तीति चादिशत् )

**२. "युवा देवास्त्रय एकादश सत्याः सत्यस्य ददृशे पुरस्तात् ।'**(ऋग्वेद, ८/५७/२)

( सूक्तेऽस्मिनिदमुक्तं यत् त्रयस्त्रिंशद्देवाः सत्यस्वरुपाः, यतस्तेऽक्ष्णोः पुरतः सत्यं ददृशिरे । अतस्तदन्तर्गतौ अश्विनावपि सत्यौ स्तः)

**३. "सत्यं इद् वा उ तं वयमिन्द्रं स्तवाम, नाऽनृतम् ।'** (ऋग्वेद, ८/६२/१२)

( वयम् इन्द्रं यत् स्तुमस्तत् सत्यं, नाऽनृतम् )

**४. "ऋतं शंसन्त ऋजु दीध्याना दिवस्पुत्रासो असुरस्य वीराः ।**

**विप्रं पदमंगिरसो दधाना यज्ञस्य धाम प्रथमं मनंत ॥'** (ऋग्वेद, १०/६७/२)

**५. "अग्ने व्रतपते व्रतं चरिष्यामि । तच्छकेयं तन्मे राद्ध्यताम् ।**

**इद महमनृतात्सत्यमुपैमि ।** (अत्र **'व्रत'** शब्दा वैदिककर्मणः द्योतकः। **धर्म–कर्म** शब्दौ अस्य पर्यायौ स्तः ।)

(ऋतस्य सत्यस्य पालका एव ऋतं तरन्ति, नतु अनृतस्य । अनृतस्य वक्तारोऽन्धाः वा बधिराः भवन्ति । यथा–

**"अपानक्षासो बधिरा अहासत, ऋतस्य पन्थानं न तरन्ति दुष्कृतः।"**(ऋग्वेद,९/७३/६)

**अथर्ववेद** इदमुद्घोषयति यत् पृथ्वीमिमां बृहत् सत्यं, ऋतं, उग्रं तपः, यज्ञः, ब्रह्म (वेद) धारयन्तीति । यथा–**"सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथ्वीं धारयन्ति ॥'** (अथर्ववेद, १२/१/१)

**शतपथब्राह्मण**मतानुसारं सत्यवदनेन दिव्यत्वप्राप्तिर्भवति, तथाऽनृतवदनेन मर्त्यत्वप्राप्तिर्भवति । अपरं च जगति मनुष्याः सत्यमेव विश्वसंति । तत्त्वसाक्षात्कारसमर्थं चक्षुः सत्यमेव । यथा–**"द्वयं वा इदं न तृतीयमस्ति । सत्यञ्चैवाऽनृतञ्च । सत्यमेव देवा अनृतं मनुष्याः । 'इदमहमनृतात् सत्यमुपैमि' तन्मनुष्येभ्यो देवानुपैति ॥** (शतपथब्राह्मणम्,१/१/३–४) अयमपि मन्त्रः परमर्थवान्, यथा–**" सत्यं वै चक्षुः । तस्माद् यदिदानीं द्वौ विवदमानौ एयाताम्, अहमदर्शमहमश्रौषमिति । य एवं ब्रूयात् अहमदर्शमिति तस्मा एव श्रद्दध्यात् । तदेवैतत्समर्थयति ।"**

**तैतिरीयोपनिषदि** गुरुकुलात्समावर्तमानं विद्याव्रतस्नातकं भगवान् वेद अनुशास्ति :–**"सत्यं वद । धर्मं चर ॥"** इति । **"सत्यान्न प्रमदितव्यम् ।"**; **"धर्मान्न प्रमदितव्यम् ।"** इति च । (तैतिरीयोपनिषद,प्र.प्र) **"सत्यं परं परं सत्यं सत्येन न सुवर्गाल्लोकच्च्यवन्ते कदाचन सतार्हि सत्यं तस्मात्सत्ये रमन्ते ॥"** (तै.उ.)

वैदिकवाङ्मये धर्मस्तु संसारस्य प्रतिष्ठारुपको द्योतितः । यथा–**"धर्मो विश्वस्य जगतः प्रतिष्ठा । लोके धर्मिष्ठं प्रजा उपसर्पन्ति । धर्मेण पापमनुदति । धर्मे सर्वं प्रतिष्ठितम् । तस्माद्धर्मं परमं वदन्ति ।"** (तै.उ.)

अनेन इदं स्पष्टं भवति यत् वेदेषु संस्कृतिः सत्य–धर्माश्रिताऽसीत् । किं बहूना, सृष्ट्युत्पत्तिक्रमे ब्रह्म चतुरो वर्णान् सृष्ट्वाऽपि विभूतियुक्तं कर्म कर्तुं न प्राभवत् । अतः श्रेयस्करं धर्मम् असृजत् । धर्मोऽयं क्षत्रियस्याऽपि नियन्ता । तस्मात् धर्मात् परं एतस्मिन् सृष्टौ किञ्चिदपि न विद्यते । लोके 'सत्यमेव धर्म' इति कथ्यते । अत एव सत्यं वदन्तं नरं जना धार्मिकं वदन्ति । तद्वदेव धर्मं वदन्तं दृष्ट्वा सत्यं वदतीति मन्यन्ते । यतो हि सत्य–धर्मौ द्वावपि धर्मरुपौ, तयोर्न भेदः। अन्ततो उपनिषद्वाक्यं **"सत्यमेव जयते"** विलिख्य वेदेषु धर्मस्वरुपमितिविषयं विस्तारभयात् समापयामि ।

# ४.२. वेदोत्तरकाले धर्मस्यस्थितिः ।

**“वेदो धर्ममूलम”** इति गौतमधर्मसुत्रानुसारं वेदः धर्मस्य मुलमस्ति । **“धर्मज्ञसमयः प्रमाणं वेदाश्च ।”** इति तु आपस्तम्बकथनम् । तदवदेव वशिष्ठधर्मसूत्रानुसारं –**“श्रुतिस्मृतिविहितो धर्मः । तदलाभे शिष्टाचारः प्रमाणम् । शिष्टः पुनरकामात्मा ।** इत्यादयः ।

उपर्युक्तप्रमाणैः स्पष्टमस्ति यत् धर्मस्य मूलोपादानानि वेदाः, स्मृतयः, शिष्टाचारश्च सन्ति । अत्र वेदोत्तरकालस्य तात्पर्यम् उपनिषद्भिस्सह अस्ति । वेदेषु धर्म–विषयकविधयः न प्राप्यन्ते, केवलं प्रासंगिकनिर्देशा एव प्राप्यन्ते । अतः कालान्तरे धर्मविधीनां प्रतिपादनार्थं उपनिषदां धर्मसूत्रांणां स्मृतीनां च रचना जाता । उपनिषत्काले धर्मस्य स्थितिः प्रोन्नतिः प्राप्ता, कारणं धर्मस्य तात्पर्यमवगमनं स्पष्टं विशदं च जातम् । उपनिशदाम् कानिचित् धर्मध्वजोदाहरणानि पश्यामः । यथा–**“ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद् धनम् ।**[१]**”**

**“सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् ।**[२]**”** इत्यादिभिः धर्मः व्यावहारस्वरुपे आगतः।

---

[१]. *ईशावास्योपनिषत् – १*

[२]. *तैत्तिरीयोपनिषत् – १/११/१*

# ४.३. “स्मृतिग्रन्थेषु धर्मतत्त्वं, तत्स्वरुपञ्च ।”

स्मृतयः धर्मसंहिता इत्याख्या प्रोक्ताः । स्मृतिशब्दः ‘स्मृ’ धातुना क्तिन् प्रत्यये कृते निष्पद्यते । अस्यार्थ अनुभूतविषयजन्यज्ञानमस्ति । स्मृतिशब्दः प्राय अर्थद्वये प्रयुक्तः । एकस्मिनर्थे वेदस्य स्मरणं चिन्तनञ्चास्ति, यथा–**“स्मरन्ति वेदमनया स्मृतिः ।** अपरार्थे वेदवाङ्मयात् पृथक् ग्रन्थाः यथा पाणिनि–श्रौत–गृह्य–धर्मसूत्र–मन्वादिभिरन्यग्रन्थैः सह सम्बन्धः, किन्तु संकिर्नार्थदृष्ट्या स्मृतिधर्मशास्त्रयोरर्थ एकैव । उक्तञ्च मनुस्मृत्यां –**“श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः ।**[१]”

तैतिरीयारण्यके स्मृतिशब्दः प्राप्यते । वशिष्ठस्मृत्यनुसारं स्मृतयः धर्मस्य उपादानत्वेन स्वीकृताः । स्मृतीनाम्(धर्म) अभावे शिष्टजनानाम् आचरणमेव प्रमाणभूतं मन्तव्यम् । यथा–**“श्रुतिस्मृतिविहितो धर्मः तदलाभे शिष्टाचारः प्रमाणम्।**[२]” इमे स्मृतय एव कस्मिंश्चित्काले धर्मशास्त्रत्वेन स्थिताः स्युः , दक्षस्मृत्यां स्पष्टमुल्लिखितमस्ति यत् दक्षप्रजापतिना ब्रह्मचारी, गृहस्थ, वानप्रस्थ, तथा च सन्यासाश्रमाणाङ्कृते धर्मशास्त्रं लिखितम् ।

अस्त्वयमेव निष्कर्षः यत् स्मृतीनामपराभिधानम् धर्मशास्त्रमेव । इमे सर्वदा धर्मविषयकं मार्गदर्शनं कुर्वन्ति । अग्रे मुख्यस्मृतिषु वर्णितधर्मतत्त्वं तत्स्वरुपं च वर्णयिष्ये ।

---

*१. मनुस्मृतिः २/१०*

*२. वशिष्ठस्मृतिः १/३–४*

# “मनुस्मृतौ धर्मस्वरुपम्”

**“मनुष्पिता”** इति ऋग्वेदानुसारं स्वायम्भुवमनुः मनुष्याणां पिता अस्ति । सायणेनापि उक्तं यत् **“सर्वासां प्रजानां पितृभूतो मनुः ।”** पिता स्वपुत्रान् हितं शिक्षयति तथा यथार्थहितं केवलं वेदैः ज्ञायते । अतः स्वायम्भुवमनुना यत् ब्रह्मणा लक्षश्लोकात्मकः सारभूतो ग्रन्थो पठितः, तं ग्रन्थं संक्षिप्य भृगु–नारदादीन् दशशिष्यान् पाठितवान् ।

मनुना स्पष्टमुल्लिखितं यत् श्रुतिस्मृतिप्रतिपादिताचार एव श्रेष्ठः धर्मः । यथा–

**“आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च ।**

**तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः ॥[१]”**

भारतीयसाहित्ये भगवतः मनोः तथा तस्य धर्मशास्त्रं “मनुस्मृतेः” विशेषं स्थानं अस्ति । धर्मशास्त्रकारेषु मनोरत्यन्तं गौरवं वर्तते । अतः शास्त्रकाराः कथयन्ति–

**“मनुस्मृतिविरुद्धा या सा स्मृतिर्न प्रशस्यते ।**

**वेदार्थोपनिबद्धत्वात् प्राधान्यं हि मनोः स्मृतिः ॥**

मनुः मानवजातेः आदिपिता अस्ति एवं समस्तक्षेत्रेषु मानवजातेः पथप्रदर्शकः अस्ति । मनुना रचितं धर्मशास्त्रं ‘मनुस्मृति’ विश्वस्य **सर्वप्रथमं विधानं** विद्यते ।

---

१. *मनु० १/१०८*

मनुस्मृति द्वादशाध्यायेषु विभक्ताऽस्ति । तत्र **प्रथमेऽध्याये** संसारस्य उत्पत्तिः वर्णिता । **द्वितीयेऽध्याये** संस्कार–विधि–ब्रह्मचर्य–व्रताचरण–गुर्वभिवादनादीनां विधानं कृतम् । **तृतीयेऽध्याये** गृहस्थाश्रमप्रवेशात् पूर्वं स्नानरुपसंस्कारविधानम्, विवाहभेदाः लक्षणानि च, बलिवैश्वदेवस्तथा श्राद्धविधिः निरुपिताऽस्ति । **चतुर्थेऽध्याये** जीविकानामुपायाः, ऋतादीनां लक्षणानि, गृहस्थाश्रमवासीनां नियमाः प्रोक्ताः । **पञ्चमेऽध्याये** भक्ष्य–अभक्ष्यम्, मरणाशौचशुद्धिः, द्रव्याणां शुद्धिप्रकाराणि तथा स्त्रीधर्माः वर्णिताः सन्ति । **षष्ठेऽध्याये** वानप्रस्थधर्माः, मोक्षस्तथा संन्यासधर्माः निगदिताः । **सप्तमेऽध्याये** सम्पूर्णराजधर्माः प्रतिपादिताः सन्ति । **अष्टमेऽध्याये** ऋणादीनां व्यवहाराः विहिताः । **नवमेऽध्याये** पतिपत्नयोः संयुकतजीवनस्य कर्तव्यानि एवं विरहितजीवनस्य कर्तव्यानि निर्दिष्टानि । धनस्य विभाजनं, द्युतचौरादिभिः रक्षणोपायाः वर्णिताः । वैश्यशूद्राणां कर्तव्यान्यपि सूचितानि सन्ति । **दशमेऽध्याये** वर्णसंकरोत्पत्ति, आपत्काले जीविकासाधनानि च प्रस्तुतानि । **एकादशेऽध्याये** प्रायश्चित्तविधानं वर्तते । **द्वादशेऽध्याये** वर्णानुसारं सांसारिकगतिः, आत्मज्ञानस्यमोक्षदायकता, निषिद्धकर्मणां गुण–दोषपरिक्षणं वर्णितमस्ति । देश–धर्मः, जाति–धर्मस्तथा पाखण्डीनाम् आचरणादीनां निदर्शनमस्ति ।

भगवता मनुना <u>धर्मस्य चत्वारि प्रमाणानि</u> निर्दिष्टानि । यथा–

**"वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।**

**आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥[१]"**

---

[१]. *मनु० २/६*

(१) सम्पूर्णवेदाः (२) वेदज्ञानां स्मृतिः तथा शीलः (३) वेदानुकूलमहात्माभिः कृतमाचरणम् (४) स्वमनसः प्रसन्नता ।

### "धर्मानुष्ठानाय योग्यदेशः"

**"एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।**

**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥[१]**

( सरस्वती एवं दृषद्वती इत्यनयोः देवनद्योः मध्ये स्थितो देशः 'ब्रह्मावर्तः' उच्यते । अस्मिनैव देशे उत्पन्नब्राह्मणेभ्यः सर्वैः शिक्षा ग्रहणीया ।)

### "भोजनविधिः"

**"पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन् ।**

**दृष्ट्वा हृष्येत् प्रसीदेच्च प्रतिनन्देच्च सर्वशः ॥**

**पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति ।**

**अपूजितं तु तद्भुक्तमुभयं नाशयेदिदम् ॥[२]"**

भोजनं प्राणप्रदमस्ति अतः तस्य सत्कारो विधेयः । भोजनस्य निन्दा कदापि न करणीया । अन्नं दृष्ट्वा प्रसन्नो भवेत् । अन्नमिदं सर्वदाऽहं प्राप्नुयामिति कल्पनया अन्नस्य अभिनन्दनं कुर्यात् ।

---

१. *मनु० २/२०*
२. *मनु० २/५४–५५*

## “प्रतिष्ठायाः पञ्चकारणानि”

**“वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी ।**

**एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥[1]”**

धनं, पितृव्यः, वयाधिक्यं, श्रृतिस्मृतिविहितकर्माणि तथा च विद्या एतानि पञ्चप्रतिष्ठायाः स्थानानि सन्ति ।

भगवता मनुना स्पष्टं कृतं यत् ब्राह्मणानां श्रेष्ठता विद्यया, क्षत्रियस्य श्रेष्ठता पराक्रमेण, वैश्याणां श्रेष्ठता धनेन तथा च शूद्राणां श्रेष्ठता वयसा ज्ञायते । श्वेतकेशेन कश्चन वृद्धो न भवति । किन्तु युवान् अपि यदि विद्वान् स्यात् तर्हि स वृद्धः ज्ञेयः । काष्ठस्य गजः, चर्मणः मृगः तथा च मूर्खब्राह्मणः केवलं नामधारणं कुर्वन्ति । यथा स्त्रिषु नपुंसकः निष्फलो भवति । तथैव वेदस्य अज्ञाता ब्राह्मणः निष्फलोऽस्ति ।[2]

## “शिष्यकर्तव्यम्”

**“गुरोर्यत्र परीवादो निन्दा वाऽपि प्रवर्तते ।**

**कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥[3]”**

यत्र गुरूणां निन्दा भवति तत्र शिष्यैः न स्थातव्यम् । तथा कर्णौ पिधातव्यौ । यदि शिष्यः गुरुदोषान् वर्णयति तर्हि गर्दभः भवति । यदि कथयति तर्हि श्वान् भवति । यदि गुरोर्धनस्य उपभोगं करोति तर्हि कृमि भवति तथा च गुरोरुन्नतिं न सहते तर्हि कीटः भवति ।

---

[1]. *मनु० २/१३६*

[2]. *मनु० २/१५८*

[3]. *मनु० २/२००*

## “याज्ञवल्क्यस्मृतौ धर्मस्वरुपम्”

महान् ज्ञानी,योगी,अध्यात्मज्ञः,धर्मज्ञः एवञ्च श्रीरामकथायाः प्रखरवक्ता महर्षियाज्ञवल्क्यः सर्वलोकविश्रुतः । पुराणेष्वयं ब्रह्मण अवताररुपेण स्वीकृतः । श्रीमद्भागवतानुसारं अयं देवरातस्य आत्मजः । याज्ञवल्क्यः महर्षिवैशम्पायनस्य शिष्यः । केनचित् कारणेन वैशम्पायने रुष्टे सति दण्ड्यो याज्ञवल्क्यः ज्ञानमयाः सर्वाः यजुर्वेदशाखाः उद्वमितवान् । याः वैशम्पायनस्य अन्याः शिष्याः पक्षिरुपेण ग्रहीतवन्तः । यजुर्वेदस्य सैव शाखा **‘तैतिरीयशाखे’**ति उच्यते ।

पुनः वेदविद्याज्ञानं प्राप्तुं दृढनिश्चयः याज्ञवल्क्यः सूर्यमुपासयन् तस्मादयाचत् यत् ‘हे देव! मह्यं तादृशयजुर्वेदज्ञानं देहि यत् अद्यावधि न केनाऽपि प्राप्तं स्यात् ।’ उक्तञ्च श्रीमद्भागवते –

**‘अहमयातयामयजुःकाम उपसरामीति।’**[1]

तदा प्रसीदसूर्यः अश्वरुपेण तस्मै मन्त्रोपदेशं ददौ ।

**“एवं स्तुतः स भगवान् वाजिरुपधरो हरिः ।**

**यजुंष्ययातयामानि मुनयेऽदात् प्रसादतः ।**[2]**”**

अश्वरुपसूर्यात् प्राप्तिकारणेन शुक्लयजुर्वेदस्येमाः शाखाः ‘वाजसनेयी’ वा ‘माध्यन्दिनी’ नाम्ना प्रसिद्धा । याज्ञवल्क्यः विदेहस्वामीजनकस्य गुरुः आसीत् ।

---

[1]. *श्रीमद्भागवतमहापुराणम्–१२/६/७२*

[2]. *श्रीमद्भागवतमहापुराणम्–१२/६/७३*

मनुस्मृतिः सर्वासु प्राचिना वर्तते, किन्तु याज्ञवल्क्यस्मृतिरपि न न्यूना । महर्षियाज्ञवल्क्यस्य जीवनं त्याग–तपस्या–सदाचारयुक्तमासीत् । तेन सदैव धर्ममर्यादा पालिता संरक्षिता च ।

## “धर्मस्वरुपम्”

स्मृतिरियं मुख्यतया आचार–व्यवहार–प्रायश्चित्तेषु विभज्यते । प्रायः सहस्रत्रयं श्लोकान्विता स्मृतिरियम् । प्रत्येकाध्यायेषु पृथक्–पृथक् प्रकरणानि सन्ति ।

आचाराध्याये त्रयोदशप्रकरणानि, व्यवहाराध्याये पञ्चविंशति प्रकरणानि, प्रायश्चिताध्याये षड्प्रकरणानि च सन्ति ।

### • आचाराध्याये धर्मस्वरुपम् –

महर्षियाज्ञवल्क्यः आरम्भे एव लिलेख यत् आत्मदर्शनं, सर्वत्रात्मबुद्धिः वा भगवद् बुद्धिरेव परमो धर्मः एवं धर्मसाधनरुपेण योगज्ञानं प्रधानम् । यथा–

**‘अयं तु परमो धर्मो यद्योगेनात्मदर्शनम् ।[१]’**

सर्वाश्रमं वर्णञ्चोद्दिश्याब्रवीत्–

**“अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।**

**दानं दमो दयाक्षान्तिः सर्वेषां धर्मसाधनम् ॥[२]”**

---

१. *याज्ञवल्क्यस्मृतिः/आचा०/८*

२. *याज्ञवल्क्यस्मृतिः/आचा०/१२२*

अर्थात् मनसा–वाचा–कर्मणा च सर्वपरकारेण हिंसाराहित्यं, यथार्थभाषणम्, अचौर्यम्, पावित्र्यम्, इन्द्रियनिग्रहः, दानम्, दमः, सर्वभूतेषु दया, सर्वथाक्रोधत्यागश्च सर्वेभ्यो धर्मसाधनम् अस्ति । महर्षियाज्ञवल्क्येनोपदिष्टं यत् सदा धर्माचरणं करणीयं, अधर्ममार्गं परिहर्तव्यं, लोकविरुद्धं च न व्यवहर्तव्यमिति ।

**"कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत् ।**

**अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु ॥[१]"**

स्मृत्यामस्यां **दानप्रकरणे** महर्षिः **गो–दानस्य** महती महिमा तथा तत्फलं वर्णयामास । तेन दीन–दुर्बल–अनाथानां सहायता, रुग्णानां परिचर्या तथा तेभ्य औषधदानमपि गोप्रदानवत् परिगणितम् । महर्षिणा दानप्रकरणस्यान्ते ब्रह्मज्ञानदानं सर्वधर्ममयं सर्वोत्कृष्टं ब्रह्मलोकप्रदायकं स्वीकृतम् । यथा–

**"सर्वधर्ममयं ब्रह्म प्रदानेभ्योऽधिकं यतः ।**

**तद्ददत् समवाप्नोति ब्रह्मलोकमविच्युतम् ॥[२]"**

श्रद्धा–भक्ति–विधिपूर्वकञ्च कृतेन श्राद्धकार्येण मनुष्यो दीर्घायुत्वं, संततिः,धनं, विद्या,सुखं,राज्यं,स्वर्गं,मोक्षञ्च प्राप्नोति । श्रद्धायुक्तं कृतं पितृकार्यं ऐहलौकिकं,पारलौकिकं च सुखं प्रयच्छति । उक्तञ्च–

**"आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ।**

**प्रयच्छन्ति तथा राज्यं प्रीता नृणां पितामहाः ॥[३]**

---

[१]. *याज्ञवल्क्यस्मृतिः/आचा०/१५६*

[२]. *याज्ञवल्क्यस्मृतिः/आचा०/२१२*

[३]. *याज्ञवल्क्यस्मृतिः/आचा०/२७०*

**राजधर्मप्रकरणे** राजासम्बन्धिकर्तव्यानि प्रोक्तानि तथा राज्यसंचालनाय दण्डविधानं सूचितम् । ब्राह्मणानां सम्मानं तथा च प्रजारक्षणं राज्ञः मुख्यकर्तव्यं प्रकीर्तितम् ।

**“नातः परतरो धर्मो नृपाणां यद्रुणार्जितम् ।**

**विप्रेभ्यो दीयते द्रव्यं प्रजाभ्यश्चाभयं सदा ॥[१]”**

एवञ्च–

**“ब्राह्मणेषु क्षमी स्निग्धेष्वजिह्मः क्रोधनोऽरिषु ।**

**स्याद्राजा भृत्यवर्गेषु प्रजासु च यथा पिता ॥[२]**

राज्ञा अतिसावधानतया स्वं प्रजासेवकं मत्वा धर्ममर्यादापूर्वकं राज्यसञ्चालनं विधातव्यम् ।

## • व्यवहाराध्याये धर्मस्वरुपम्

याज्ञवल्क्यस्मृतेः द्वितीयोऽध्यायः व्यवहाराध्यायोऽस्ति । व्यवहाराध्याये हिन्दुधर्मशास्त्राणां नियमाः विस्तरेण वर्णिताः । यथा न्यायालादीनां व्यवस्था, दण्डविधानं, राज्ये शान्तिस्थापनं, साक्षीणां प्रकाराः, ऋण–आदान–प्रदानस्य प्रक्रिया, क्रय–विक्रयनियमाः एवं चौर्यादीनां कर्मणां दण्डविधिश्च वर्णिताः ।

---

१. *याज्ञवल्क्यस्मृतिः/आचा०/३२३*

२. *याज्ञवल्क्यस्मृतिः/आचा०/३३८*

## • प्रायश्चित्ताध्याये धर्मस्वरूपम्

अध्यायेऽस्मिन् मुख्यतया **शौचाचारः, आपद्धर्मः, वानप्रस्थधर्मः, यतिधर्मः, कर्मविपाकः** एवं **प्रायश्चित**प्रकरणञ्चोल्लिखितमस्ति ।

अत्र महर्षिणा मानवदेहस्य नश्वरतां प्रदर्श्य भणति यत् देहोऽयं जलतरङ्गवत् क्षणभङ्गुरः । नास्य विश्वासो कर्तव्यः । अतः संसारस्य केष्वपि पदार्थेषु वस्तुषु वा प्राणिषु स्थिरतायाः वा स्थायित्वस्य भावः मूर्खतेति । इदं पञ्चभौतिकं शरीरं निश्चितं पञ्चतत्त्वेषु विलीयते एव । मृत्युस्तु अबाधसत्यमेव । अतः तस्य शोकः नैव कर्तव्यः, अपितु मृतस्य उद्धारार्थं यथाशक्यं तर्पणं, पिण्डदानम् एवं श्राद्धादिधर्मक्रियानामाचरणं सम्पादनीयम् ।

**"अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः ।**[1]**"**

महर्षियाज्ञवल्क्येन स्वस्मृतौ स्थाने स्थाने यज्ञदान–स्वाध्याय–सदाचार–अहिंसादीनां सर्वधर्माणां च प्रशंशा कृता । तदनुकूलमाचरणमनुमोदितम् । प्रारम्भे एव महर्षिणा योगसाधनया परमात्मसाक्षात्कारः प्रधानो धर्मः प्रकिर्तितः । यथा–

**"ध्यानयोगेन सम्पश्येत् सूक्ष्म आत्मात्मनि स्थितः ।**[2]

योगसाधनया परमतत्त्वं संप्राप्य जीवेन क्रमशः जीवन्मुक्तिः, विदेहमुक्तिः, कैवल्यञ्च प्राप्यते । इत्यलमतिविस्तरेण ।

---

१. *याज्ञवल्क्यस्मृतिः/प्राय०/ ११*

२. *याज्ञवल्क्यस्मृतिः/प्राय०/६४*

## “पराशरस्मृतौ धर्मस्वरुपम्”

पराशरस्मृतेः रचयिता महर्षिपराशरोऽस्ति । महर्षिपराशरः तपोनिष्ठवशिष्ठस्य पौत्रः, महात्माशक्तेः पुत्रः, वेदव्यासस्य पिता एवं महाज्ञानीशुकदेवस्य पितामहश्चासीत् । इत्थं महर्षेः अग्रिमाः पूर्वजाः ज्ञानसम्पन्नाः आसन् । ‘पराशर’ इत्यस्य शब्दस्यार्थो भवति यत् **‘पराश्रृणोति पापानीति पराशरः’** । महर्षिपराशरेण विरचितं ‘विष्णुपुराणम्’ अपि धर्मशास्त्रमेव । महर्षिपराशरः धर्माचरणमेव परमकलयाणकरं मन्यते स्म । यथा–

**“धर्म एव कृतः श्रेयानिहलोके परत्र च ।**

**तस्माद्धि परमं नास्ति यथा प्राहुर्मनीषिणः ॥**[1]

इत्थं धर्माचरणमेव परमकर्तव्यमनुमतम् । धर्ममार्गेण उपार्जितं द्रव्यं हितकरम् एवम् अधर्मोपार्जितं द्रव्यं धिक्कारयुक्तमुपलक्षितम् । अस्मिन् संसारे धनेच्छायै शाश्वतधर्मस्य त्यागो नैव कर्तव्यः । यथा–

**“ येऽर्था धर्मेण ते सत्या येऽधर्मेण धिगस्तु तान् ।**

**धर्मं वै शाश्वतं लोके न जह्याद् धनकाङ्क्षया ॥**[2]

### • धर्मस्वरुपम्

महर्षिपराशरविरचितपराशरस्मृतिः सर्वस्मृतिसु विशिष्टं स्थानं विदधाति । वर्तमानकाले प्राप्तपराशरस्मृत्यां द्वाद्वाशाध्यायाः प्राप्यन्ते ।

महर्षिपराशरः युगद्रष्टा महात्माऽसीत् । स्मृत्यामस्यां चतुर्णां युगानां धर्मव्यवस्था विशेषरुपेण वर्णिता । तत्र सविशेषं कलिधर्माणां वर्णनमस्ति । शक्तेः

---

[1]. *महा०शान्ति०१९०/६*

[2]. *महा०शान्ति०१९०/६*

वृद्धिर्वा हानिः युगानुसारं भवति । अतः चतुर्षु युगेषु मनुष्याणां धर्माचरणविधयः विविधाः आसन् । यथा– सत्ययुगे जनाः विशेषशक्तियुताः आसन्, अतस्तस्मिन् काले तपः एव धर्मः आसीत् । त्रेतायुगे ज्ञानधर्मयोः प्रामुख्यं, द्वापरयुगे यज्ञ–यागादीनामनुष्ठानं धर्मः एवं कलियुगे दानमेव धर्मः मतः । यथा–

**"तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।**

**द्वापरे यज्ञमित्युचुर्दानमेकं कलौ युगे ॥[१]"**

सर्वेषु युगेषु विविधाः धर्मचिन्तकाः विख्याताः सञ्जाताः । तेषु कलियुगे – महर्षिपराशरः धर्मविषये प्रख्यातः आसीत् । यथा–

**" कृते तु मानवो धर्मस्त्रेतायां गौतमः स्मृतः ।**

**द्वापरे शङ्खलिखितः कलौ पाराशरः स्मृतः ॥[२]"**

## • चतुर्षु युगेषु दानधर्मस्य वैविध्यम्–

कृतयुगे जनाः ब्राह्मणानां समीपं गत्वा श्रद्धापूर्वकं दानं ददति स्म । त्रेतायुगे ब्राह्मणान् स्वगृहे निमन्त्र्य दानं ददति स्म । द्वापरयुगे ब्राह्मणाः याचनां कृत्वा दानं प्राप्नुवन्ति स्म, एवं कलियुगे परिचर्यानन्तरमेव दानं प्राप्नुवन्ति । एतेषु दानेषु प्रथमं दानम् उत्तमं, द्वितीयं मध्यमं, तृतीयम् अधमम् एवं चतुर्थं सर्वथा निष्फलमेवेति ।

**"अधिगम्य कृते दानं त्रेतास्वाहूय दीयते ।**

**द्वापरे याचमानाय सेवया दीयते कलौ ॥[३]**

---

[१]. *पराशरस्मृतिः १/१३*

[२]. *पराशरस्मृतिः १/२८*

[३]. *पराशरस्मृतिः १/२८*

महर्षिपराशरस्य स्पष्टमभिमतं यत् आचार–विचाराणां पालनमेव प्रधनो धर्मः। व्यवहारे धर्मपालनमावश्यकं, केवलं वाचिकं धर्मकथनं निष्फलमिति । यथा–

**"चतुर्णामपि वर्णानामाचारो धर्मपालकः ।**

**आचारभ्रष्टदेहानां भवेद्धर्मः पराङ्मुखः ॥[१]"**

सर्वासु अवस्थासु सर्वेषु कालेषु च दानधर्म एव सर्वे विशिष्टः मेनिरे । अन्ततोगत्वा इदमेव वक्तुं शक्यते यत् महर्षिपराशरेण दानधर्मो विशिष्टः अभिमतः ।

१. *पराशरस्मृतिः १/३७*

## “दक्षस्मृतौ धर्मस्वरुपम्”

प्राचिनस्मृतिसु दक्षस्मृतिः अतिमहत्त्वशीला । अस्याः रचयिता प्रजापतिदक्षोऽस्ति । दक्षः ब्रह्मणः मानसपुत्रोऽस्ति । परब्रह्मणः शक्त्या पितामहब्रह्मणा स्वदेहस्य विविधाङ्गेषु सृष्टिविस्तारार्थं दशमानसपुत्राः सृष्टाः । तत्र दक्षः ब्रह्माङ्गुष्ठाज्जातः । यथा– **“दक्षोऽङ्गुष्ठात् स्वयम्भुवः ।**[१]**”** कार्यसम्पादने अतिकुशलत्वात् सः **“दक्ष”** इत्यभिधानेन ख्यातः । प्रजापतिदक्षः भगवान्विष्णोरनन्यो भक्तः कृपापात्रश्चासीत् ।

महात्मा दक्षः स्वसन्ततिषु सम्यग्धर्माचरणं, युक्ताचारविचाराः, नित्यनैमितिककर्मानुष्ठानं च स्युः, तदर्थम् धर्मावबोधकः स्मृतिरुपैको धर्मग्रन्थं रचयामास । सो ग्रन्थः **‘दक्षस्मृतिः’** इत्युच्यते । स्मृतिरियमतिसंक्षिप्ता किन्त्वत्यन्तोपादेया । अस्यां स्मृत्यां धर्मो विशिष्टरुपेण वर्णितः ।

स्मृतिविषये प्रजापतिः कथयति – श्राद्धावसरे कश्चिद्विप्रः स्मृतिमिमां श्रावयति, तर्हि तच्छ्राद्धं पितृणाम् अक्षयतृप्तिप्रदायकं भवति ।

## “धर्मस्वरुपम्”

सप्ताध्यायेषु उपनिबद्धेयं स्मृतिः प्रामुख्येन गृहस्थधर्मं प्रतिपादयति । प्रजापतिः उपदिशति–गृहस्थाश्रमः अन्यत्रयाणाम् आश्रमाणां जनयिताऽस्ति । अतः आश्रमोऽयं अन्याऽश्रमाणामाधारः आश्रयश्च । तदर्थमेव गृहस्थो जनः **“ज्येष्ठाश्रमी”** कथ्यते । गृहस्थाश्रम यज्ञ–दान–अतिथिसेवादिभिः सर्वजीवानां यापनं भवति ।

---

*[१]. भाग०३/१२/२३*

# “गृहस्थधर्मः”

प्रजापतिः स्वस्मृत्यां ‘नव–नवक’ प्रकरणे गृहस्थैः आचरणीयानि नवकर्तव्यानि उल्लिखितवान् ।

**“नव–नवके मङ्गलकारकाः नवोपदेशाः” –**

गृहस्थेभ्यः अतिथिसेवा प्रधानो धर्मः । अतः सर्वप्रथमं प्रजापतिः अतिथिसेवा प्रधानेति मत्वा तद्विषये नवोपदेशानुपदिशति । तद्यथा–

**(१) मनसः सौम्यत्वम् (२) दृष्टेः पावित्र्यम् (३) मुखे वाणीसौम्यत्वम्**

**(४) हृदयसौम्यत्वम् (५) आगतानामतिथीनाम् उत्थाय यथायोग्यं स्वागतम्**

**(६) क्षेम–कौशलम् अभिपृच्छेयुः (७) स्नेहयुक्तवार्तालापं कर्तव्यम्**

**(८) उपगम्य अतिथिसेवा (९) अतिथिगमनकाले योग्यानुव्रज्या च ।**

यथा लिखितम्–

**“ मनश्चक्षुर्मुखं वाचं सौम्यं दद्याच्च्तुष्टयम् ॥**

**अभ्युत्थनमिहागच्छ पृच्छालापप्रियान्वितः ।**

**उपासनमनुव्रज्या कार्याण्येतानि यत्नतः ॥[1]**

---

[1]. *(दक्षस्मृतिः–३/४–५)*

**“नवेतराणि कर्तव्यानि”-**

**(१) अभ्यागतेभ्यः स्थानम् (२) जलप्रदानम् (३) आसनम्**

**(४) पादशुद्धिकरणम् (५) अभ्यङ्गदानम् (६) आश्रयदानम्**

**(७) शय्या (८) यथायोग्यं सुभोज्यभोजनम् (९) जलमृतिका च ।**

यथा–

**“ईषद्दानानि चान्यानि भूमिरापस्तृणानि च ।**

**पादशौचं तथाभ्यङ्गमाश्रयः शयनं तथा ॥**

**किञ्चिचान्नं यथाशक्ति नास्यानश्नन् गृहे वसेत् ।**

**मृज्जलं चार्थिने देयमेतान्यपि सदा गृहे ॥**[1]

गृहस्थैः प्रतिदिनं प्रातःस्नानं करणीयं, यतो हि नवद्वारयुतमिदं शरीरमतीव मलिनम् । नवद्वारैः नित्यं मालिन्यं जायते, अतः स्नानेनैव पुनः शुद्धिः भवितुमर्हति। स्नानरहितेन अपावित्र्यशरीरेण जप–होम–अनुष्ठानानि नैव कर्तव्यानीति ।

त्रिकालसन्ध्यावन्दनं गायत्री–जपश्च आवश्यकं कर्म । प्रतिदिनसन्ध्यासेवी पवित्रो भवति । असान्ध्यः धर्माधिकारी न गण्यते । असान्ध्यानां सर्वाणि कर्माणि निष्फलानि भवन्ति । त्रैकालिकसन्ध्यावन्दनस्य धर्माचरणस्य मुख्यमुपादानमस्ति ।

---

[1]. *दक्षस्मृतिः ३/६–७*

यथा–

**“सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।**

**यदन्यत् कुरुते कर्म न तस्य फलमश्नुते ॥[१]”**

- **पोष्यवर्गस्य भरण–पोषणं गृहस्थानां प्रधानो धर्मः–**

प्रजापतिना आश्रितधर्मो विशेषेण वर्णितः । गृहस्थानां कृते आश्रितजनानां (स्वकुटुम्बीनां, सेवकानाञ्च) भरण–पोषणमर्थात् तेषां जीवननिर्वाहप्रबन्धनं प्रमुखधर्मः । तेन ऐहलौकिकं पारलौकिकं च सुखं प्राप्यते । पोष्यवर्गस्य उपेक्षा कादापि नैव कर्तव्या । तेषां पीडनं सदा अधर्मः । यथा–

**“भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम् ।**

**नरकं पीडने चास्य तस्माद्यत्नेन तम् भरेत् ॥[२]”**

किञ्च दक्षप्रजापतिना गार्हस्थ्यधर्मो सविशेषः प्रतिपादितः । स्मृत्यामस्यां अतिथिसेवा, दानं , नित्यनैमितिककर्म, पोष्यवर्गस्य निर्वाहप्रबन्धनादिविषयाः उट्टङ्किताः । अन्ते गृहस्थैः कर्तव्यानि कर्माण्यैव प्रधानो धर्मः ।

---

[१]. *दक्षस्मृतिः २/१३–२०*

[२] *दक्षस्मृतिः २/३०–३१*

## “शातातपस्मृतिसु धर्मस्वरुपम्”

प्राचीनधर्मशास्त्रकारेषु महर्षिशातातपस्य अद्वितीयं स्थानं विद्यते । महर्षियाज्ञवल्क्यस्य मतानुसारं धर्मशास्त्रकारेषु महर्षिशातातपो विशिष्टः । तस्य स्मृत्या ज्ञायते यत् सः महर्षिशरभङ्गस्य गुरुः आसीत् । यथा–

**“ इति शातातपोप्रोक्तो विपाकः कर्मणामयम् ।**

**शिष्याय शरभङ्गाय विनयात् परिपृच्छयते ॥**[1]

महर्षिशातातपेन यो सदुपदेशो प्रदत्तः तदेव **‘शातातपीयधर्मसंहिता’**, **‘शातातपियस्मृतिः**, **‘शातातपीयधर्मशास्त्रम्’** वा **‘शातातपीयकर्मविपाकः’** कथ्यते । प्रायः सर्वे ऋषयः मुनयः महात्मानश्च तपस्विनः आसन्, किन्तु महर्षिशातातपस्य अभिधानमेव तस्य अनन्ततपसः द्योतकः ।

महर्षिशातातपः तपः कुर्वन्नेव क्षीणो जातः  एवं तेन सर्वविधतपांसि आचरितानि अतः स **“शातातपः”** इति नाम्ना प्रसिद्धो जातः ।

- **शातातपप्रणितस्मृतयः–**

महर्षिशातातपः तिस्रः स्मृतयः रचयामास । यथा–**(१) लघुशातातपस्मृतिः (२) वृद्धशातातपस्मृतिः (३) शातातपस्मृतिः** वा **शातातपीयकर्मविपाकः** इति ।

---

[1]. *शातातपस्मृतिः ६/४७*

## “लघुशातातपस्मृतौ धर्मस्वरुपम्”

नामानुसारेण स्मृतिरियं संक्षिप्ता, अस्यां १०७ श्लोकानि सन्ति । मुख्यतया अस्यां स्मृतौ प्रायश्चितं, शुद्धिः, अभक्ष्यभक्षणं, श्राद्धः, दानादिविषयाणां वर्णनमस्ति।

श्राद्धप्रकरणे महर्षिशातातपः कथयति यत् –

**“ त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः ।**

**त्रीणि चात्र प्रशंसन्ति सत्यमक्रोधमार्जवम् ॥[१]”**

अर्थात् श्राद्धे दौहित्रः , कुतपवेला एवं तिलाः एतानि त्रीणि पवित्राणि, तथैव श्राद्धकर्तृभ्यः सत्यं, अक्रोधः, सरलता(छलछद्मयोः राहित्यम्) इत्यादीनां पालनं कर्तव्यम् ।

---

[१]. *श्लोक १०७*

# “बृहस्पतिस्मृतौ धर्मस्वरुपम्”

आचार्यः बृहस्पतिः देवानाम् अपि गुरुः अस्ति, अतः तेषां महिमायाः का कथा? स अतीव सत्वसम्पन्नो धर्मनीतेः संज्ञाता, वाणीबुद्धिज्ञानामधिष्ठाता एवं महान् परोपकारी आसीत् । भीष्मपितामहस्य कथनम् अस्ति यत् – “बृहस्पति–सदृशो वक्तृत्वशक्तिसम्पन्नः नास्त्यन्यत्र कोऽपि।”

**“वक्ता बृहस्पतिसमो न ह्यन्यो विद्यते क्वचित् ॥”[३०१]**

पुराणेषु उल्लिखितं यत् सः महान्तपस्वीमहर्षे अङ्गिरसः पुत्रोऽस्ति। सो देवगुरुः एवं वाचस्पतिरपि कथ्यते । नक्षत्रमण्डले प्रतिष्ठितो भूत्वा सः ग्रहरुपेण जगतः कल्याणचिन्तने निमग्नोऽस्ति । सप्तवासरेषु अपि बृहस्पतेः परिगणना भवति । शास्त्रीय मान्यतानुसारं बृहस्पतिः कल्याणकर्ता एवं मङ्गलकर्ता विद्यते । पुराणेषु एवं महाभारतादिषु आचार्यबृहस्पतेरनेकानि दिव्यानि चरित्राणि एवं उपदेशप्रदानि आख्यानानि उट्टङ्कितानि सन्ति । न केवलं देवताभिरपित्वसुर– किन्नर–नाग–गन्धर्व– देवयोनि– मनुष्यवर्गादिभिश्च बृहस्पत्युपासनया अनेकविधानि उत्तमफलानि लब्धानि । बृहस्पतिप्रदत्तधर्मोपदेशाः कल्याणकरास्तथाऽभ्युदयदायकाःसन्ति । बृहस्पतिः स्वभावेन शान्तः । अनेन विषमपरिस्थितिसु कथं शान्त–समभावयुक्त–सधैर्यञ्च वर्तनीयम्, वाक्येषु माधुर्यं च कथं स्थापनीयमितिं देवराजाय् उपदिष्टमासीत् ।

---

[३०१]. महा. अनु. १११/५

यथा –

**“यस्तु सर्वमभिप्रेक्ष्य पूर्वमेवाभिभाषते ।**

**स्मितपूर्वाभिभाषी च तस्य लोकः प्रसीदति ॥”**[३०३]

धर्मराज्ञे युधिष्ठिरायापि धर्म–तत्त्व–रहस्यमुपदिष्टम् –

यथा –

**“सर्वभूतात्मभूतस्य सर्वभूतानि पश्यतः ।**

**देवाऽपि मार्गे मुह्यन्ति अपदस्य पदैषिणः ॥”**[३०४]

एवञ्च –

**“न तत् परस्य संदध्यात् प्रतिकूलं यदात्मनः ।**

**एष संक्षेपतो धर्मः कामादन्यः प्रवर्तते ॥**[३०५]

अनयोः श्लोकयोः स्पष्टार्थोऽस्ति यत् सर्वभूतेषु आत्मवद्समभावः स्थापनीयस्तथा यदात्मनः प्रतिकूलं स्यात् तत्परेभ्योऽपि न वर्तयेत् – इत्येव धर्मः । 'महाभारतम्' तु आचार्यबृहस्पतेः सदाचारमयोपदेशैर्विभाति । एकदा

---

[३०३]. महा. शान्ति ८४/६

[३०४]. महा. अनु. ११३/७

[३०५]. महा. अनु. ११३/८

धर्मराजयुधिष्ठिरस्य धर्मविषयिकजिज्ञासाया उत्तररुपेण यत्किञ्चित् बृहस्पतिना उक्तम् – तदत्र उल्लेख्यम् ।

एकदा युधिष्ठिरेण बृहस्पतिः पृष्टम् – भगवन् । भवान् सम्पूर्णधर्मतत्वस्य ज्ञाता एवं सर्वेषां शास्त्राणां विद्वान् अस्ति, तर्हि कथयत – यत् पिता–माता–गुरु–मित्र–सजातीयसम्बध्यादिषु मानवानां सुसहायकः कोऽस्ति? यदा सर्वे स्वजनानां मृतदेहं काष्ठवत् त्यक्त्वा प्रतिगृहं गच्छन्ति , तदा जीवः परलोकं केन सह याति ?

तदा बृहस्पतिः कथितवान् – प्राणी एक एव जायते म्रियते च । स्वयमेव दुःखं पारं गत्वा स्वयमेव सद्गतिः वा दुर्गतिः प्राप्तव्या भवति । पिता– माता– भ्राता–गुरु– पुत्र– सम्बन्ध्यादिषु च नैकोऽपि सहायकः सिद्धयति । जनाः मृतदेहं मृत्तिकापिण्डवत् काष्ठवच्च त्यक्त्वा किञ्चित्क्षणं रुदन्ति एवं पश्चात् पुनः स्वकर्मबन्धने बध्नन्ति । स्वजनास्तु मृतदेहं त्यक्त्वा गच्छन्ति, किन्तु धर्म एव जीवात्मनम् अनुसरति । अतः धर्म एव जीवस्य सहायकोऽस्ति । अतो धर्माचरणं हि परमावश्यकम् । धर्मयुक्तः दिवङ्गच्छति तदवदधर्ममार्गी नर्कं टीकते । इत्थमनेकोपदेशैः संवलिता स्मृतिरियं 'बृहस्पतिस्मृतिः' नाम्ना प्रसिद्धाऽस्ति । एषा स्मृतिः संक्षिप्ता वर्तते । स्मृत्यामस्यामेकाशीति श्लोकाः सन्ति । स्मृतिरियं प्रधानतया गोदानस्य भूदानस्य च महिमानं वर्णयति । स्मृतिरियं इन्द्र – बृहस्पति संवादरुपेण प्राप्ताऽस्ति। यथा –

**"एवमिन्द्रेण पृष्टोऽसौ देवदेवपुरोहितः ।**

**वाचस्पतिर्महाप्राज्ञो बृहस्पतिरुवाच ह ॥**[३०६]

इत्थं पृष्टप्रश्नानां समाधानमेव अस्याः स्मृतेः प्रतिपाद्यःवा प्रमुखः विषयः । संक्षेपेण केचन अंशाः प्रस्तुत्यतेऽत्र।

## भूदानं महादानम् ।

आचार्यबृहस्पतिः देवेशाय कथितवान् – "राजन् । येन भूदानं कृतं तेन सुवर्ण– रजत– वस्त्र– मणिरत्नादीनाञ्च दानं दत्तमित्येव ज्ञेयम् । कारणम् एतानि सर्वाणि द्रव्याणि पृथिव्या जायन्ते । यथा –

**"सुवर्णं रजतं वस्त्रं मणिरत्नञ्च वासव ।**

**सर्वमेव भवेद्दत्तं वसुधां यः प्रयच्छति ॥"**[३०७]

एवं यः कालकृष्टां, शस्ययुक्तां, सबीजां भूमिं ददाति, सः यावत् चन्द्रदिवाकरौ प्रकाशेते तावद् दिविं प्रतिष्ठते । उक्तञ्च –

**"कालकृष्टां महीं दत्त्वा सबीजां शस्यशालिनीम् ।**

**यावत् सूर्यकरा लोकास्तावत् स्वर्गे महीयते ॥"**[३०८]

---

[३०६]. बृहस्पतिस्मृतिः – ३

*[३०७]. बृहस्पतिस्मृतिः–५*

*[३०८]. बृहस्पतिस्मृतिः–६*

यः स्वाजीविकां वशीभूतः जनः यत्किञ्चिद्दुराचारं करोति, तर्हि तत्सर्वं गोचर्मपरिमाणायाः भूमेः दानं दत्त्वैव नश्यति एवं सो जनः पापान्मुच्यते ।

**“अपि गोचर्ममात्रेण भूमिदानेन शुध्यति ॥[३०९]**

## (त्रीणि अतिदानानि )

सर्वेषु दानेषु महत्दानम् ‘अतिदानम्’ इति परिकीर्तितम् । गोदान–भूदान–विद्यादानान्येतानि त्रीणि दानानि सर्वेभ्यो दानेभ्यो विशिष्टानि सन्ति । अत ‘अतिदानम् ‘ इत्यपि चोच्यते । अतिदाता (अतिदानकर्ता) सर्वेभ्यो पापेभ्यो उद्धरति। इमानि दानानि दातारं तारयन्ति ।

**“त्रीण्याहुरतिदानानि गावः पृथ्वी सरस्वती ।**

**तारयन्ति हि दातारं सर्वात् पापादसंशयम् ॥”[३१०]**

## (भूमिहरणात्पातकम् )

भूमिदानेन पुण्यप्राप्तिः भवति, तद्विपरीतं भूमिहरणेन महत्पापं भवति ।

**“भूमिदो भूमिहर्ता च नापरं पुण्यपापयोः ।”[३११]**

एवञ्च भूमिहर्ता यदि कोव्ययुतगवां दानं करोति तदाऽपि शुध्दिं न प्राप्यते ।

---

[३०९]. *बृहस्पतिस्मृतिः–७*

[३१०]. *बृहस्पतिस्मृतिः १८/१९*

[३११]. *बृहस्पतिस्मृतिः –३०*

**"गवां कोटिप्रदानेन भूमिहर्ता न शुध्यति ।[३११]**

## (पूर्तधर्मस्य महिमा ) –

लोकोपकारकप्रवृत्तयः **'पूर्तधर्मः'** इति कथ्यते । निः स्वार्थ भावेन वापी– सरोवर– जलाशय– धर्मशाला– विद्यालय–अनाथालय– चिकित्सालय– मन्दिराणाञ्च स्थापनेन, वा पुनः स्थापनेन जीर्णोद्धारणेन च यद्धर्मो भवति सः पूतधर्मोऽस्ति । एवञ्च वृक्षारोपणमार्गबन्धनादीनि लोकोपकाराकाणि कर्माणि जनहितार्थाय सन्ति। अतः तानि पूर्तधर्मे समाविष्टानि भवन्ति । आचार्येण तादृशानां कर्मणाममि माहात्म्यं प्रदर्शितमस्ति । यो जनः नूतनजलाशयनिर्माणं वा पुरातनस्य जीर्णोद्धारं कारयति, सः आत्मना सह स्वकुलस्यापि उध्दारं करोति । स्वर्गलोकं च गच्छति । जीर्णानां स्थानानां जीर्णोध्दारं करोति सः विशिष्टस्य पुण्यस्य अधिकारी भवति । आचार्यः इन्द्राय उपदिशति यत् – हे देवेश ! येन निर्मितवापीतडागादिषु नीदाधकालेऽपि जलं न शुष्यति, सो जनः कदापि कठोराणि विषमानि दुःखानि न प्राप्नोति । यथा –" **यस्तडागं नवं कुर्यात् पुराणं वापि खानयेत् ।**

**स सर्वं कुलमुद्धृत्य स्वर्गे लोके महीयते ॥**
**वापीकूपतडागानि उद्यानोपवनानि च ।**
**पुनः संस्कारकर्ता च लभते मौलिकं फलम् ॥**
**निदाघकाले पानीयं यस्य तिष्ठति वासव ।**
**स दुर्गं विषमं कृत्स्नं न कदाचिदवाप्नुयात् ॥**(बृह०६२–६४)

---

*३११. बृहस्पतिस्मृतिः –३१*

## ४.४."महापुराणेषु धर्मतत्त्वं, तत्स्वरुपं, विविधभेदाश्च ।"

भारतीयसंस्कृतेः स्वरुपज्ञानाय पुराणस्य अध्ययनं महतावश्यकं वर्तते । पुराणन्तु भारतीयसंस्कृतेः मेरुदण्डोऽस्ति, यस्योपरि आधुनिकभारतीयसमाजः स्वनियमनं प्रतिष्ठापयति ।

**पुराणशब्दस्य व्युत्पत्तिः –**

**'पुराण'** शब्दस्य व्युत्पत्तिः महर्षिपाणिनिना, यास्केन तथा स्वयं पुराणैः प्रदत्ताऽस्ति । "पुरा भवम्"(प्राचीनकाले जायमानम्) एतस्मिन् अर्थे "सायं चिरं प्राह्णे–प्रगेऽव्ययेभ्यष्ट्युटयुलौ तुट् च"(पाणिनिसूत्र ४/३/२३) इत्यनेन सूत्रेण 'पुरा' शब्दात् 'ट्यु' प्रत्यये कृते तुटागमे च सति 'पुरातन' शब्दः निष्पद्यते, किन्तु स्वयं **पाणिनिना** स्वस्य सूत्रद्वये पुराणशब्दस्य प्रयोगः कृतोऽस्ति , यत्र तुडागमस्य अभावः निपातनात् सिद्धयति । यथा– "पुर्वकालैक–सर्व–जरत्–पुराण नवकेवला समानाधिकरणेन"(पाणिनिसुत्र २/१/४९) तथा "पुराणप्रोक्तेषु ब्राह्मणकल्पेषु"(पाणिनिसूत्र ४/३/१०५) ।

पुराणशब्दः **ऋग्वेदे** द्वादशाधिकस्थानेषु प्राप्यते, यत्र शब्दोऽयं प्राचीनार्थे वा पूर्वकालार्थे प्रयुक्तः । **यास्क**मतानुसारं **"पुरा नवं भवति"** अर्थात् यत् प्राचीने सति नूतनं स्यात् तत् पुराणम् । **वायुपुराणानुसारं** "पुरा अनति" अर्थात् प्राचीने काले यत् जीवितमासीत् तत् पुराणम् । **पद्मपुराणानुसारं** निरुक्तिरियं किञ्चित् भिन्नाऽस्ति–"पुरा परम्परां वष्टि कामयते" अर्थात् यत् प्राचीनतायाः परम्परायाः कामनां करोति तत् पुराणम् ।

**ब्रह्माण्डपुराणस्य** एतस्माद् भिन्नैका तृतीया व्युत्पत्ति अस्ति –**"पुरा एतत् अभूत्"** अर्थात् प्राचिने काले इत्थम् अभूत् । प्राचीनग्रन्थेषु पुराणस्य सम्बन्ध इतिहासेन सह एतावान् घनिष्ठ आसीत् यत् उभावपि सम्मिलितरुपेण **"इतिहास पुराण"** इतिशब्देन उल्लिखितौ । **छान्दोग्योपनिषदि** "इतिहासपुराणम्" पञ्चमो वेदः प्रकीर्तितः । यथा–**"ऋग्वेद भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणमितिहासपुराणं पञ्चमं वेदानां वेदम्** ।[३१३]

स्कन्धपुराणानुसारम्–**'आत्मा पुराणं वेदानाम्'** अर्थात् पुराणं वेदस्य आत्माऽस्ति । पद्मपुराणानुसारम्–'यत् प्राचीनपरम्परायाः कामनां करोति, तत्पुराणमुच्यते । पुराणम् अस्माकं पूर्वजैः सञ्चितज्ञानस्य भण्डारमस्ति । पुराणेष्वेतिहास–भुगोल–आयुर्वेद–चिकित्सा–काव्य–छन्दशास्त्र–वास्तुशिल्प–चित्रकला–भित्तिचित्र–अध्यात्म–नीतिशास्त्र–तंत्र–मंत्र–योगादीनां विपुलभण्डारम् अस्ति । यत् ज्ञानं वेदेषु संक्षिप्तं वा सूत्रात्मकमासीत् तत् सौकर्याधिक्याय लोकभाषायां आख्यानमाध्यमेन पुराणेषु वर्णितम् । ये वेदाध्ययनं कर्तुमसर्थाः आसन्, तेषाङ्कृते पुराणसाहित्यस्य निर्माणमभूत् । पुराणेष्वन्यविभिन्नविषयैः सह धर्मविषयकं विशदव्याख्यानं प्राप्यते ।

भारतीयधर्मसंस्कृत्योरितिहासे पुराणसाहित्यस्य अत्यधिकमहत्त्वमस्ति । कठिनानि–गहनानि च वेदमन्त्राणां रहस्यानि, वेद–वेदाङ्गानि, उपनिषद्–दर्शनानि सरलकथापद्धत्या जनसामान्यसमक्षं प्रस्तौतुं पुराणसाहित्यस्य भूमिका अत्यन्तोपादेया सिद्धा जाताऽस्ति ।

---

[३१३]. *छान्दोग्योपनिषद् ७/१*

## “धर्मतत्त्वं, स्वरुपं, विविधभेदाश्च”

पुराणेषु सर्ववर्णेभ्यः लोके परलोके च सुखेन जीवितुमुपायाः निर्दिष्टाः । वेदेष्वपि सुखोपलब्धेः साधनानि निर्दिष्टानि सन्ति, किन्तु तानि कलियुगीजीवानां कृते कष्टसाध्यानि सन्ति । कलियुगस्य जीवः नैतावानर्थसम्पन्नः नैव पवित्रः यत् यज्ञेभ्य अत्यावश्यकोपकरणानां सञ्चयं कर्तुं शक्नुयात् । कलियुगे मनुप्रतिपादितस्तथा वेदनिर्दिष्टधर्माचरणं कठिनं, किन्तु पुराणेषु प्रतिपादितं एकादशीव्रतानुष्ठानं सुखपूर्वकं, अल्पधनेन तथा स्वल्पक्लेशेन कर्तुं शक्यते; तथा महत्फलमपि लभ्यते । अत एव पद्मपुराणे कथितम् यत् यो यमलोकनिवृतिम् अभिलषति स यावज्जीवनम् एकादशी कुर्यात् । यथा–

**“श्रुता ते मानबा धर्मा वैदिकाश्च श्रुतास्त्वया ।**

**कलौ युगे न शक्यन्ते ते वै कर्तुं नराधिप ॥**

**सुखोपायमल्पसाधनमल्पक्लेशं महाफलम् ।**

**पुराणानां च सर्वेषां सारभूतं महामते ।**

**एकादश्यां न भूञ्जीत पक्षयोरुभयोरपि ॥**[३१४]”

सूतसंहितायामपि एतदेव तथ्यं निगदितमस्ति । फलतः अल्पप्रयासत्वात् सर्वसाधारणहेतूत्वात् सरलमुक्तिसाधननिर्दिष्टत्वाच्च अद्यत्वे पुराणानि प्रशंसन्ते ।

---

[३१४]. *पद्मपुराणम् ६/५३/४–६*

ब्राह्मणसद्गुणान् अपवादरूपेण स्वीकरणे पुराणानामेकं गम्भीरतात्पर्यं लक्षितं दृष्टिगोचरं भवति, यत् पी.वी.काणे महोदयेन स्वग्रन्थे स्फुटीकृतमस्ति । बौद्धधर्मस्य राजकीयाऽश्रयणत्वात् वैदिकधर्मस्य रक्षासमस्या मनिषीणां पुरत उपस्थिता । ब्राह्मणवर्गः तादृशवर्गः यो वैदिकधर्मसंरक्षणस्य महनीयं कार्यं कुर्वन्नासीत्, किन्तु तस्य योगक्षेमव्यवस्था आवश्यकी । यदि ब्राह्मणस्य रक्षाव्यवस्था भूपतिर्वा सम्पन्नगृहस्थः न चिन्तयति तर्हि वेदस्य संरक्षणं कथं भवितुमर्हति ?

एतदेवाभिप्रायं लक्ष्यीकृत्य समस्याऽऽहरणार्थं पुराणेष्वुक्तं यत्–

**"तीर्थेषु ब्राह्मणं नैव परीक्षेत कथंचन ।**

**अन्नार्थिनमनुप्राप्तं भोज्यं तं मनुरब्रवीत् ॥[३१५]"**

तात्पर्यस्यास्य गाम्भीर्यं मत्वा पुराणैः **दान–श्राद्ध–तीर्थ–यात्रा–नदीस्नान–व्रत–भक्ति–अहिंसा–भगवन्नामकीर्तना**दिनि धर्मपोषकानि कर्तव्यानि निर्दिष्टानि सन्ति ।

## "पूर्तधर्मः"

वैदिके समाजे इष्टापूर्तस्य महिमा विशिष्टरूपेण ग्राह्याऽस्ति । ऋग्वेदस्य एकस्मिन् मन्त्रे "इष्टापूर्त" शब्दस्य प्रयोगोऽस्ति, किन्तु शब्दस्यार्थः वा सङ्केतः न मिलति । पुराणेषु शब्दानां व्याख्या प्राप्यते । तदनुसारं **"इष्ट"** वेदप्रतिपाद्यकर्म अस्ति, तथा **"पुर्त"** पुराणैः प्रशंसितकर्म अस्ति । यथा–

---

[३१५]. *पद्मपुराणम् ५/१९/२१२*

**“अग्निहोत्रं तपः सत्यं वेदानां चैव साधनम् ।**

**आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ॥**

**वापीकूपतडागानि देवतायतनानि च ।**

**अन्नप्रदानमर्थिभ्यः पूर्तमित्यभिधीयते ॥**[३१६]**”**

तात्पर्यमेतदेव यत् प्रजायाः कल्याणाय वापी–कूप–सरोवरादीनां खननं तथा मन्दिरस्य निर्माणं एवञ्च याचकेभ्यः अन्नप्रदानं **“पूर्त”** उच्यते । एतदेव धर्मस्य अनुष्ठानं पुराणैः बहूप्रशंसितमस्ति । **“समाजस्य सेवा तथा आर्त–पीडितानां दुःखापनयनं सर्वश्रेष्ठः धर्मः परिकीर्तितः”** । **“परोपकार”** पुराणानां मुख्यधर्मप्रतिपादकविषयोऽस्ति । यथा–

**“परोपकारः पुण्याय पापाय परपीडनम् ।”**

**“न स्वर्गे ब्रह्मलोके तत् सुखं प्राप्यते नरैः ।**

**यदार्तजन्तुनिर्वाण दानोत्थानमिति मे मतिः ॥**[३१७]

**प्राणिनामुपकाराय यथेवैह परत्र च ।**

**कर्मणा मनसा वाचा तदेव मतिमान् वदेत् ॥**[३१८]

---

[३१६]. *मार्कण्डेयपुराणम् १६/१२३,१२४ तथा अग्निपुराणम् २०९/२–३ = अत्रि संहिता ४३,४४*

[३१७]. *मार्कण्डेयपुराणम् १५/५७*

[३१८]. *विष्णुपुराणम् ३/१२/..*

# “राजधर्मः”

पुराणेषु राजधर्मस्य विवरणमनेकेषु स्थलेषु बहुश उपलभ्यते । राज्ञ उत्पत्ति प्राचीनकाले कथमभूत् ? तस्य सहायकानि कति अङ्गान्युपाङ्गानि सन्ति ? साम–दाम–दण्ड–भेदानि राज्ञे कदा उपयोगिनी भवन्ति ? इत्यादीनां प्रश्नानां समुचितं समाधानं पुराणेषु लभ्यते । **मत्स्यपुराणे** २१९ अध्याय तः २२६ अध्यायपर्यन्तं विषयोऽयं संक्षेपेण विवृतः । मत्स्यपुराणे एव २१९ अध्याये राजकुमाराय शिक्षा–दीक्षा केन प्रकारेण दातव्या इत्यस्य विस्तृतं विवरणमस्ति ।

मत्स्यपुराणे राज्ञः सप्तप्रसिद्धान्यङ्गानि यथा **स्वामी–अमात्य–जनपद–दुर्ग–दण्ड–कोश–मित्राणि** प्रोक्तानि सन्ति । साम[319]–भेद[320]–दण्डानां[321] प्रयोगानन्तरं राज्ञः साम्यं विभिन्नदेवैः सह कथं न्यायोचितमस्तीत्यस्य सुन्दरं वर्णनं २२५ अध्याये कृतं वर्तते ।

**अग्निपुराणे** विषयोऽयं विस्तारपूर्वकमस्ति ।[322] **गरुडपुराणस्य** नीतिसारनामके उपन्यस्तप्रकरणेऽपि अमुमेव विषयमुपस्थापयति । अत्र धर्मार्थकाममोक्षाणां विकिर्णानि श्लोकानि तु सन्त्येव, राजधर्मसम्बन्धिश्लोकान्यपि उपलभ्यन्ते । नीतिसारप्रकरणात् नैकानि श्लोकानि गरूडपुराणस्य नाम्ना **राजनीतिप्रकाशे** उद्धृतानि सन्ति । **राज्याभिषेकस्य** प्रसङ्ग अग्निपुराणे विद्यते, यत्र अभिषेकनिमित्तानि पौराणिकमन्त्राणि उट्टङ्कितानि सन्ति ।

---

[319]. *मत्स्यपुराणम् अ०२२१*

[320]. *मत्स्यपुराणम् अ०२२२*

[321]. *मत्स्यपुराणम् अ०२२४ तः २२६*

[322]. *अग्निपुराणम् अ०२१८ तः २३७*

राजधर्मविषयकवर्णनम् मत्स्याग्निगरुडातिरिक्त मार्कण्डेयादिवत् पुराणेषु तथा विष्णुधर्मोत्तरोपपुराणेष्वपि प्राप्यते । एतेषामध्यायानां परिशीलनेन पौराणिकराजधर्मस्य स्वरुपं सविशेषं स्पष्टं भवति, यत् महाभारतादिग्रन्थेषु प्रतिपाद्यराजधर्मात् भिन्नं नास्ति । **मत्स्यपुराणे** राज्ञः विषये महत्त्वपूर्णचर्चाऽस्ति–

**"कृपणानाय वृद्धानां विधवानां च योषिताम् ।**

**योगक्षेमं च वृत्तिं च तथैव परिकल्पयेत् ॥[३२३]"**

(अर्थात् कृपण–अनाथ–वृद्ध–विधवादीनां कृते योगक्षेमस्य तथा वृत्तेः प्रबन्धः राज्ञः महनीयधर्मो वर्तते ।)

श्लोकमिदं महाभारतस्य श्लोकमेकं प्रति सङ्केतयति, यत्र नारदेन युधिष्ठिरं प्रति अनाथ–अन्ध–अङ्गहीनादीनां जनानां कृते वृत्तिव्यवस्थायानियमनस्य उपदेशः प्रदत्तः । यथा–

**"कच्चिदन्धाँश्च मुकांश्च पङ्गून् व्यङ्गानवान्धवान् ।**

**पितेव पासि धर्मज्ञ ! तथा प्रव्रजितानपि ॥[३२४]**

यत्र वृद्ध–अनाथ–मुक–पङ्ग्वादीनां असहाय्यानां च वृत्तिप्रबन्धनं भवति, तत्रैव राजधर्मः पुष्टो भवति ।

---

[३२३]. *मत्स्यपुराणम्*

[३२४]. *महाभारतम् सभापर्व*

**गरुडपुराणस्य** नीतिसारनामकं प्रकरणं स्वनैतिकशिक्षायै अत्यन्तोपादेयं संग्रहणीयञ्चास्ति । संस्कृतनीतिवाक्येषु जीवनस्य सारः सञ्चितः वर्तते । नीतिवाक्यं तु लघु भवति, किन्तु तस्मिन् गम्भीरार्थः निहितो भवति । वार्धक्यम् अवबोधनाय सारभूतश्लोकमिदं पश्यामः । यथा–

**"अध्वा जरा देहवतां पर्वतानां जलं जरा ।**

**असम्भोगश्च नारीणां वस्त्राणामातपो जरा ॥**

अत्र चतुर्णां पदार्थानां वार्धक्यविवरणमस्ति, तथा गाम्भीर्यमपि प्रदर्शितमस्ति। तदवदेव गार्हस्थ्यजीवनस्य आदर्शरुपं श्लोकमिदं पश्यामः । यथा–

**"यस्य भार्या विरूपाक्षी कश्मला कलहप्रिया ।**

**उत्तरोत्तरवादास्या सा जरा न जरा जरा ॥**[३२५]

पुराणेषु नीतिविषयस्य इमानि स्थलानि सारगर्भितानि उपादेयानि च सन्ति । पुराणेषु अनेकाः विद्याः वर्णिताः सन्ति; मुख्यरूपेण अग्निपुराणे, गरुडपुराणे तथा नारदीये प्राचुर्यं विद्यते । तत्र वर्णनं संक्षिप्तमस्ति किन्तु प्रामाणिकं वर्तते । काश्चन विद्यास्तु अतिप्राचीनाः सन्ति, यस्याः मूलग्रन्थास्त्य् दूर्लभा एव । पुराणेषु आसां विद्यानाम् आचार्यस्य नामानि मतानि च प्रदत्तानि सन्ति, किन्तु तानि अल्पज्ञातान्येव । यथा– अश्वशास्त्रम् । इयं प्राचीना विद्याऽस्ति । यत्र अश्वचिकित्सायाः विशदवर्णनमस्ति। अस्तु,

---

*३२५. गरुडपुराणम् १०९/२३*

**"वायुपुराणे धर्मस्य विविधभेदाः"** निरुपिताः । यथा–

"पुराणेष्वेषु बहवो **धर्मास्ते** विनिरूपिताः ॥

रागिणां च विरागाणां यतीनां ब्रह्मचारिणाम् ।

गृहस्थानां वनस्थानां स्त्रीशूद्राणां विशेषतः ॥

ब्राह्मणक्षत्रियविशां ये च सङ्करजातयः ।

गङ्गाद्या या महानद्यो यज्ञव्रततपांसि च ॥

अनेकविधदानानि यमाश्च नियमैः सह ।

योगधर्मा बहुविधाः सांख्या भागवतास्तथा ॥

भक्तिमार्गा ज्ञानमार्गा वैराग्यानिलनीरजाः ।

उपासनविधिश्चोक्तः कर्मसंशुद्धिचेतसाम् ॥

ब्राह्मं शैवं वैष्णवं च सौरं शाक्तं तथाऽऽर्हतम् ।

षड्दर्शनानि चोक्तानि स्वभावनियतानि च ॥[३२६]

**पुराणेषु बहवः धर्माः निरुपिताः सन्ति । यथा वर्णाश्रम–षोडशसंस्कार(विशेषतः श्राद्धः)–व्रत–उपासना–दान–पूजा–दीक्षा–राजधर्म–तीर्थमाहात्म्यादीनां विस्तृतं वर्णनमस्ति ।**

---

[३२६]. *वायुपुराणम् १०४/*

वस्तुतः पुराणकर्तारः न केवलम् इतिहासलेखकाः किन्तु धर्मप्रतिपादका अपि आसन्, तदर्थं ब्रह्माण्डपुराणस्य श्लोकमिदं पश्यामः । यथा–

**“<u>धर्मशास्त्रप्रणेतारो</u> महिम्ना सर्वगाश्च वै ।**

**तपः प्रकर्षः सुमहान्येषां ते ऋषयः स्मृताः ॥[३२७]”**

**पुराणकर्तृत्व**विषये अवधातव्यं भवति यत् पुराणानां रचना वेदव्यासेन कृता इति प्रायोवादः मन्यते । पुराणानां रचना अनेकैः ऋषिभिः कृतेति तथ्यं कथनम् । मनुस्मृत्यामस्य प्रमाणं मिलति । यथा–

**“स्वाध्यायं श्रावयेत् पित्र्ये धर्मशास्त्राणि चैव हि ।**

**आख्यानानीतिहासाँश्च पुराणानि खिलानि च ॥[३२८]”**

अस्मिन् श्लोकोपरि मेधातिथेः टिप्पण्यस्ति यत् **‘पुराणानि व्यासादि प्रणितानि’, न तु व्यासप्रणितानीति** । मार्कण्डेयपुराणस्य श्लोकेऽपि **“बहुला परमर्षयः”** प्रयोगः दृश्यते । अत्र प्रायोवादस्तथा कथनं द्वयमपि प्रस्तूय पुनः धर्मविषये आगच्छामि ।

**कुर्मपुराणस्य** पूर्वार्धे १२अध्यायस्य २६८ श्लोके लिखितमस्ति यत् धर्मः पुराणेषु प्रतिष्ठितः । यथा–

**“अष्टादश पुराणानि व्यासाद्यैः कथितानि तु ।**

**नियोगाद् ब्राह्मणो राजन् तेषु <u>धर्मः प्रतिष्ठितः</u> ॥[३२९]”**

---

[३२७]. *ब्रह्माण्डपुराणम्*

[३२८]. *मनुस्मृति ३/२३२*

## "धर्मसहिष्णुता"

पुराणकारणादेव धार्मिकसहिष्णुतायाः साम्राज्यं भारतदेशस्य धार्मिकक्षेत्रेषु प्रतिष्ठितम् । परस्परम् एकत्वबोधनाय नारदीयपुराणस्य श्लोकमिदं दृष्टव्यं भवति । यथा–

**"हरिशंकरयोर्मध्ये ब्रह्मणश्चापि यो नरः ।**

**भेदं करोति सोऽभ्येति नरकं भृशदारुणम् ॥**[330]

अस्तु, पौराणिकधर्मतत्त्वं किमपि नूतनम् उत्पद्यमानं धर्मतत्त्वन्नास्ति, यत् वेद–प्रतिपादितधर्मात् विभक्तं स्यात् । मूलतत्वं समस्तवैदिकमेवास्ति । केवलं स्थितेः परिवर्तनेन कतिपयप्राचीनाः विषयाः परिह्वताः तथा च नविनाः विषयाः ग्रहिताः । वैदिके युगे कर्मकाण्डस्य विषयोपरि विशेषाग्रहः आसीत् किन्तु पौराणिके युगे 'भक्तिः' महत्त्वं प्राप्ता । पुराणेषु पञ्चदेवाः मुख्यरुपेणप्रतिष्ठिताः यथा ब्रह्मा, विष्णुः, शिवः, गणेशः तथा सूर्यश्च ।

## "पुराणस्य प्रयोजनम्"

वस्तुतः वेदपुराणे अभिन्ने स्तः । किन्तु वेदस्य भाषाऽवबोधनं वैदिकमन्त्राणां तात्पर्याऽवगमनं कर्तु सर्वे समर्थाः न आसन् । दीक्षोपनयनसंस्कारविरहितत्वात् समाजस्य निम्नस्तरे स्थियमानाः जनाः स्वजीवनं वेदमयं निर्मितुं न प्रभवन्ति स्म ।

---

*३२९. कूर्मपुराणम् पूर्वार्ध १२/२६८*

*३३०. नारदीयपुराणम्*

अतः महर्षिवेदव्यासेन तथा तच्छिष्यप्रशिष्यैः मानवसमाजस्य कल्याणाय पुराणशास्त्राणि रचितानि ।

वेदस्तु द्विजसमुदाये प्रतिष्ठितः , किन्तु पुराणानि तु सर्वेभ्य अधिकारं प्रच्छन्ति शास्त्रज्ञानाय । वेदतत्त्वं जनसामान्यः जानीयात् एतदेव पुराणस्य मुख्योद्देश्यम् । वेदवचनम् – "**एकं सद्विप्रा बहुधा वदन्ति ।**" पुराणवचनम्–"**एकं सत् प्रेम्णा बहुधा भवति ।**" अत्र ध्यातव्यो विषयोऽस्ति यत् ईश्वराराधनस्य(भक्ति) महत्ता न केवलं पुराणेष्वेव, अपि उपनिषत्स्वपि विषयोऽयमुट्टङ्कितः । यथा कठोपनिषदि एकं सुन्दरं वचनमुद्धृतमस्ति यत् ईश्वरभक्त्या एव ईश्वरप्राप्तिर्भवति ।

**"नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।**

**यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥[३३१]"**

केनोपनिषद्यपि निगदितम् यत् ईश्वरः भजनीयोऽस्ति, अत उपासितव्यः । यथा–

**"तद्वनमिति उपासितव्यम् ।[३३२]**

[३३१]. *कठोपनिषद् १/२/२३*

[३३२]. *केनोपनिषद्*

# पञ्चमोऽध्यायः

## (धर्ममीमांसात्मकः)


५.१.धर्मस्य विविधक्षेत्राणि ।     २३५–२३७

५.२.कर्मविषयको धर्मः ।     २३८–२४३

५.३.क्रियापरको धर्मः ।     २४४

५.४.सामाजिको धर्मः ।     २४५–२४८

५.५.समसामायिको धर्मः ।     २४९

एतेषां तुलनात्मकम् अध्ययनम् । २५०–२५३

# (पञ्चमोऽध्यायः)

## ५.१. धर्मस्य विविधक्षेत्राणि

यत्र प्रकृतिः तत्र धर्मः । वस्तुतः यत्र धर्मो तिष्ठति तदेव क्षेत्रं स्यात् । यथा धर्मस्य स्वरुपं विशालमस्ति तद्वदेव क्षेत्रमपि सुविस्तृतं वर्तते । स्थूलरुपेण यत्र मानवसेवा भवति तद्धर्मक्षेत्रं वक्तुं शक्यते । यथा **चिकित्सालय–अन्नक्षेत्र–विद्यालय–वृद्धाश्रम– विधवाश्रम– अनाथाश्रमादयाः** धर्मस्य क्षेत्राणि सन्ति । कारणं स्थानेष्वेतेषु **मानवसेवा** भवति । सूक्ष्मरुपेण पश्यामश्चेद् शास्त्रेषु प्रोक्तं यद्धर्मलक्षणं तदेव क्षेत्रमपि वर्तते धर्मस्य । प्रोक्तं मनुना यथा–

**"धृति क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।**

**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥**[३३३]"

**(१) धृति–** धनादीनां नाशने चित्तस्तथैर्यं ।(मेधातिथि)

आरभ्यमाणे कर्मणि विघ्ने आगते सति अनुद्विग्नता ।(सर्वज्ञनारायण)

सन्तोषस्थापनम् (कुल्लूक भट्ट तथा गोविन्द राजः)

स्वधर्माद् अस्खलनम् (राघवानन्दः)

स्वधर्मस्य सर्वथाऽत्यागः (नन्दन)

---

[३३३]. मनुस्मृति ६/१२

अनुद्विग्नभावेन कर्तव्यपालनम् (रामचन्द्रः)

**(२) क्षमा–** अन्यस्य अपराधसहनम् (मेधातिथि तथा गोविन्दराजः)

क्रोधोत्पत्तेः कारणे उपस्थिते सति अक्रोधः (सर्वज्ञनारायण)

अपकारस्य अप्रतिशोधः (कुल्लूक भट्ट)

द्वन्द्वसहिष्णुता (राघवानन्द)

अपमानसहनम् (नन्दन)

शान्तिः (रामचन्द्रः)

**(३) दमः–** अनुद्दण्डः । तपस्यायां क्लेशसहनम् । विकारे सति निर्विकारत्वम् ।

द्वन्द्वसहिष्णुत्वम् ।

**(४) अस्तेयः–** अन्यवस्तूषु अस्पृहा । अन्यायेन परधनादीनाम् अग्रहणम् ।

परद्रव्यास्वीकारः ।

**(५) शौच–** आहारादीनां पावित्र्यम् । स्नान–मृतिकादिभिः शरीरशुद्धिकरणम् ।

शास्त्ररीत्या बाह्याभ्यन्तरपावित्र्यम् ।

**(६) इन्द्रियनिग्रह–** इन्द्रियाणां विषयेषु अप्रवृत्तिः । जितेन्द्रियत्वम् ।

**(७) धी–** सम्यग् अवबोधनम् । प्रतिपक्षसंशयाणां दूरीकरणम् । आत्मोपासना ।

शास्त्रतात्पर्यज्ञानम् । बुद्धेः अप्रतिहतत्वम् ।

**(८) विद्या–** आत्मानात्मविषयको विचारः । बहुश्रुतत्वम् ।

**(९) सत्यम्–** यथार्थभाषणम् । अमिथ्या वक्तव्यम् । स्वज्ञानानुसारं सम्यग् सम्भाषणम् ।

**(१०) अक्रोधः–** क्षमाप्रदाने सत्यपि अपकारप्राप्ते सति क्रोधवर्जनम् । दैववशात् उत्पन्नक्रोधस्य निवारणम् ।

सत्य–दया–तपस्या–शौच–तितिक्षा–उचितानुचितविचार–संयम–अहिंसा–ब्रह्मचर्य–त्याग–स्वाध्याय–सारल्य–सन्तोष–समदर्शिता–महात्मासेवा–सांसारिक–भोगचेष्टानिवृत्ति–मौन–आत्मचिन्तन–योग्यान्नविभाजन–श्रवण–कीर्तन–स्मरण–सेवा–पूजा–नमस्कार–दास्य–सख्य–आत्मसमर्पणादीनाम् आचरणं धर्मः । यथा–

**"सत्यं दया तपः......आत्मसमर्पणम् ।[३३४]"**

# ५.२. कर्मविषयको धर्मः

[३३४]. श्रीमद्भागवतम् –७/११/८–१२

**चातुर्वर्ण्यं त्रयो लोकाश्चत्वार आश्रमाः पृथक् ।**

**भूतं भव्यं भविष्यं च सर्वं वेदात् प्रसिध्यति ॥**

चत्वारो वर्णाः, त्रयो लोकाः, चत्वार आश्रमाश्च, किं बहूना यत् कालमस्ति यत्र भूतकालं भविष्यकालं वर्तमानकालं च सन्निहितमस्ति, तदपि वेदात् एव सिद्धयति ।

प्राणिषु सर्वश्रेष्ठप्राणी मनुष्यो वर्तते, यस्य जीवनस्य अन्तिमं लक्ष्यं परमप्राप्तिरेव । मनुष्योऽयं पूर्वकर्मानुसारं चतुर्षु वर्णेषु विभक्तोऽस्ति । पृथक–पृथक् कर्मभिः मोक्षप्राप्तये प्रवृतो भवति । निकृष्टकर्म कुर्वनपि मानवः त्यागी–तपस्वी–सन्यासी–परमहंसमहात्मादिवत् मोक्षं प्राप्नोति । वेदमूलकधर्म एव आचरणस्य आधार इति तु निश्चप्रचम् । अस्मिन् धर्मे स्त्री–पुरुष–भ्राता–भगिनी–पिता–पुत्र–आचार्य–शिष्य–राजा–प्रजा–स्वामी–सेवकादीनां च कृते विविधाऽधिकारीणां कर्माणि नियतानि सन्ति । एतैः कर्मभिः आचरणैश्च निर्मितोऽस्ति धर्मः । उक्तञ्च–

**“आचारः परमो धर्मः”**

जीवनस्य क्षेत्रं बहुव्यापकमस्ति । जगति भिन्न–भिन्नराष्ट्राणां विभिन्नाः परिस्थितयः सन्ति । प्रत्येकमनुष्याणा स्वभावपार्थक्यं वर्तते । एकेव मनुष्यः जन्मात् मृत्युं पर्यन्तं अनेकासु अवस्थासु एधते । देश–काल–अवस्था–पात्रादिभेदैः

आचारशास्त्राणां निर्माणं आवश्यकता च भवति । पूजाया आसने यादृशः प्रयत्नः शक्यः तादृश एव प्रयत्नः भोजनस्य आसने अशक्यः । धर्मसंवलितकर्मणाम् अनेकानि रुपाणि भवन्ति, किन्तु मनुष्य एक प्राणी विद्यते अतः तस्य अनेकधर्माः

न भवन्ति । प्रत्येकसमये प्रत्येककर्मणि च धर्मस्य प्रभावः भवेत् तदर्थमेव शास्त्रैः आचारसंहिताभिः कर्मविस्तारः कृतः ।

## " शास्त्रविहितकर्म एव धर्मः "

धर्मस्य स्वरूपं व्यक्तेः पात्रता–काल–स्थान–कार्यादिभिः सुनिश्चितं भवति । यत् कार्यं एकस्य कृते विहितधर्मो भवति, तदेव अपरस्य कृते अधर्मो भवितुं शक्यते । को धर्मः कदा कस्य कृते धर्मो भवति एतद्बोधनाय साधनं शास्त्रं वर्तते। अत एव धर्मस्य अपरा परिभाषाऽस्ति–

## "चोदना लक्षणो धर्मः।[३३५]"

## "शास्त्रप्रेरितकर्म एव धर्म अस्ति ।"

प्रत्येकसमाजः, प्रत्येकजातिः, प्रत्येकपदार्थः स्वनियमान् परिपाल्य एव स्थातुं शक्नोति । ये धर्मेषु अनासक्ताः तेऽपि समाजाय नियमं निर्मातुं उत्सहन्ते किन्तु यदि प्रेरनात्मकनियमः न स्यात् तर्हि कथं समाजस्य धारणं भविष्यति । अतः धर्मः– धारणा शक्तिरेव प्रेरणात्मकशक्ति अस्ति । अतः प्रेरणानियम एव करणीयस्य अकरणीयस्य च निर्णयं कर्तुमर्हति ।

## "सार्वभौमिकधर्मः"

"केचन धर्माः सार्वभौमाः भवन्ति"। ते एव नित्यधर्मा अपि उच्यन्ते । केचन अहिंसासत्यादीन् धर्मे गृह्णन्ति । अत्र शास्त्रस्य आवश्यक्ता तेषां मते न भवति,

[३३५]. जैमिनीसूत्रम्

किन्तु कुत्रचित् तादृश अवसर उपलभ्यते यत्र द्वयोः धर्मयोः मध्ये एकस्य चयनम् अनिवार्यं भवति । सार्वभौमिकधर्मस्य यदा चर्चायां महाभारतस्य श्लोकमेकं स्मरणे आयाति । यथा–

**"अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।**

**दानं दमो दया क्षान्ति दशकं धर्मलक्षणम् ॥[३३६]"**

सार्वभौमिकधर्मे लक्षणमिदं सम्पूर्णतया चरितार्थं भवति । धर्मस्य दशलक्षणेषु प्रथमं अहिंसाया चर्चा अस्ति । भगवता बुद्धेनाऽपि उक्तमस्ति यत्– **"अहिंसा परमो धर्मः"** जगति सर्वेषां प्राणिनाम् जीवनाय अधिकारोऽस्ति । अतः अहिंसा सार्वभौमिकधर्मत्वेन स्वीकुर्वन्ति धर्मशास्त्रिणः । द्वितीयं लक्षणं सत्यम् अस्ति । संसारे कोऽपि धर्मः असत्यं वक्तुं न प्रेरयति । सर्वे धर्माः असत्यमेव निन्दन्ति । उक्तं च उपनिषदि **"सत्यं वद ।"** अस्तेयमस्ति तृतीयं लक्षणम् । परवस्तूनामग्रहणमेवास्तेयम् । जगतः कोऽपि धर्मः स्तेयं न स्तौति । चतुर्थं लक्षणमस्ति शौचम् । शौचं शास्त्रदृष्ट्यैव न अपि तु स्वास्थ्यदृष्ट्याऽपि आवश्यकमस्ति । शौचत्वात् आत्मेन्द्रियमनसः प्रसन्नता भवति । संसारे न कश्चन धर्मः यः शौचस्य नन्दनं कुर्यात् । पञ्चममस्तीन्द्रियनिग्रहः । अयमपि सार्वभौमिकं लक्षणं स्यात् कारणं न कश्चन धर्मः स्वेच्छाचारस्य समर्थनं कुर्यात् । षष्ठममस्ति दानम् । जगतः सर्वे धर्माः दानम् अभिनन्दन्ति । दानस्य महिमायाः पारं न विद्यते । दानस्य सन्दर्भे **आयुर्वेदस्य** वैद्यकीयसुभाषितसाहित्यपुस्तकस्य चतुर्थोऽध्यायः दानपरकोऽस्ति । तत्रत्याः केचन बिन्दव अत्र प्रस्तूयन्ते ।

---

[३३६]. महाभारतम्

**इह चत्वारि दानानि प्रोक्तानि परमर्षिभिः ।**

**विचार्य नाना शास्त्राणि शर्मणेऽत्र परत्र च ॥**

**भीतेभ्यश्चाभयं देयं व्याधितेभ्यस्तथौषधम् ।**

**देया विद्यार्थीने विद्या देयमन्नं क्षुधातुरे ॥"**

ऋषिभिः नाना शास्त्राणि विचार्य लोककल्याणाय चत्वारि दानानि प्रोक्तानि यथा भयाक्रान्ताय अभयदानं, रुग्णाय औषधदानं, छात्राय शिक्षा, क्षुधाव्याकुलाय अन्नं च । तत्राऽपि उक्तं यत् सर्वेषु दानेषु अभयदानं श्रेष्ठं कारणं अन्यदानानि तु तुच्छफलप्रदायकानि, किन्तु अभितिदानं परमं विद्यते । यथा–

**"सन्ति दानान्यनेकानि किं तैस्तुच्छफलप्रदैः ।**

**अभितिदानतुल्यं तु परमेकं न विद्यते ॥"**

वस्तुतः सर्वधर्मेषु दानस्य महिमामण्डनमस्ति । दानं सर्वश्रेष्ठधर्म उच्यते । दानप्रवृत्या संसारस्य असहायजीवाः जीवन्ति ।

## "स्वधर्मः परधर्मश्च"

धर्मः प्रेरणा–लक्षणं वर्तते । मनुष्यः सामान्यप्राणी नाऽस्ति । पशवस्तु स्वाहार–व्यवहारनियमान् जन्मना जानन्ति । यथा किं भोक्तव्यं किं न भोक्तव्यमेतत् पशुभ्यः बोधव्यं न भवति । वृक्षारोहणं वा जले तरणं कोऽपि मर्कटं न शिक्षयति ।

पाचनक्रियाया मन्दत्वे सति गोभ्य उपवासाय आदेशो दातव्यो न भवति । सन्तानोत्पत्तिकालस्य बोधपाठः श्वानमार्जाराभ्याम् दातव्यो न भवति । मूर्खेति अभिधीयमानगर्दभोऽपि तमाखूं न चर्वति । किन्तु मानवः शिक्षया विना किमपि न शिक्षति । मनुष्यः स्वहानि–लाभमपि न विचारयति । यदि धर्मशास्त्राणि न अभविष्यन् तर्हि मनुष्यजातिः स्माप्ता अभविष्यत् । कस्मिनावसरे किं कर्तव्यमिति आदेशः । आदेशपालनमेव धर्मः । उक्तञ्च श्रीमद्भगवद्गीतायाम्–

**"स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥[३३७]"**

स्वधर्मे यदि दोषोऽपि दृष्टिगोचरो स्यात् तथापि लाभप्रदोऽस्ति । अपरस्य धर्मो भयप्रदः । यदि नापितः यज्ञं कारयेत् तर्हि स्वर–मात्रा–विध्यादीनां दोषं कृत्वा स्वस्य तथा यजमानस्य अकल्याणं करिष्यति । इत्थमेव ब्राह्मणः यदि केशकर्तनकार्यं कुर्यात् तर्हि हानिकारकमेव भविष्यति । स्वधर्मपालनेन कल्याणं भवति किन्तु स्वधर्मं परित्यज्य परधर्मालम्बनेन हानिः निश्चिता भवत्येतत् वैज्ञानिकसत्यमस्ति । अयं तु युगप्रभावः यत् अद्य समस्तजातयः वर्णाश्च एकीक्रियते । समाजस्य व्यवस्था तु तदैव सुचारुतया चलति यदा सर्वे स्व–स्वजातिषु व्यवस्थिताः भवेयुः । इयं व्यवस्था यदि आन्दोलिता भवति तर्हि संघर्ष उद्भवति । अत सर्वैः स्वधर्मपालनम् अवश्यं करणीयम् । भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायामुक्तं यत् –

**"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।[३३८]"**

---

३३७. श्रीमद्भगवद्गीता

३३८. श्रीमद्भगवद्गीता

श्रीमद्भगवद्गीताया वचनानुसारं संसारे कर्मणः प्राधान्यमस्ति । उक्तञ्च तत्रैव यत् –

**"स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दन्ति मानवः ।[331]"**

अन्ततो गत्वा एतदेव वक्तुं शक्यते यत् वर्णानुसारं जात्यानुसारं च शास्त्रेण विहितं यत्किमपि कर्म एव सर्वेषां मनुष्याणां कृते धर्म इत्युच्यते ।

# ५.३. "क्रियापरको धर्मः"

धर्मः अतिव्यापकत्वात् कर्तव्यपरकोऽप्यस्ति । कर्तव्यस्य सम्बन्धः क्रियया सह अस्ति । जीवनस्य सर्वाः क्रियाः धर्मरुपाः वाऽधर्मरुपाः भवन्ति । यदि शास्त्रानुकूल क्रिया स्यात् तर्हि धर्मः एवं शास्त्र–प्रतिकूला क्रिया स्यात् तर्हि अधर्मः अस्ति । अतः भोजन–पान–दर्शन–श्रवण–शयन–जागरणादिषु सर्वासु

[331]. श्रीमद्भगवद्गीता

क्रियासु धर्माऽधर्मयोः सम्बन्धः भवति । यथा बलिवैश्वदेवपूर्वकं भोज्य–भोजनं भवति स धर्मः । अत्र बलिवैश्वदेवरुपः क्रियापरको धर्मः । तद्वदेव दिनस्य प्रारम्भ देवदर्शनेन भवति तर्हि अत्राऽपि देवदर्शनक्रियारुपो धर्मः । तद्विपरितमधर्मः । शास्त्रवचनस्य श्रवणं धर्मः । अत्र श्रवणक्रियारुपको धर्मः । यदि कस्मै ब्राह्मणाय दानं दीयते तर्हि दानक्रियापरको धर्मः । कथनस्य तात्पर्यमेतदेव यत् मनुष्याणां सर्वाभिः क्रियाभिस्सह धर्मस्य येन केन प्रकारेण सम्बन्धः अस्त्येव । धर्मं विना तु पशवः समाना एव । उक्तञ्च–

**“आहारनिद्राभयमैथुनं च**

**सामान्यमेतत् पशुभिर्नराणाम् ।**

**धर्मो हि तेषामधिको विशेषो**

**धर्मेण हीनाः पशुभिः समाना ॥**

आहार–निद्रा–भय–मैथुनादीनि पशुभिर्नराणां सामान्यमेव । किन्तु धर्मो हि मनुष्याणां विशेषोऽस्ति । अतः धर्मयुक्ताः मनुष्याः कथ्यन्ते । धर्मरहिताः पशवः ।

## ५.४. सामाजिको धर्मः

वेदादिषु प्रोक्तानि कर्तव्यकर्माणि अर्थात् पूर्तकर्मणां शिक्षा एव सामाजिकधर्मः । पूर्तकर्म एव सामाजिकधर्मत्वेन स्वीक्रियते यस्य आज्ञा वेदादिषु अस्ति, किन्तु तस्य विधिः स्मार्तकर्मसु अस्ति । वस्तुतः समाजस्य प्रति मनुष्याणां यत् दायित्वं भवति तस्य पूर्ति एव सामाजिकधर्मः । उक्तञ्च शास्त्रे –

## “स्वस्मै स्वल्पं समाजाय अधिकम् ।”

समाजं प्रति मानवस्य यत् उत्तरदायित्वमस्ति तस्य शास्त्रविहितपालनं सामाजिको धर्मो भवति । यथा–वृक्षारोपणं, जलाशयनिर्माणं, कूपखननं, धर्मशालादेवालयादीनां निर्माणञ्च । एतैः कर्मभिः समाजस्य कल्याणं भवति फलमपि च लभते । लोकोपकारकप्रवृत्तयः **‘पूर्तधर्मः’** इति कथ्यते । निः स्वार्थ भावेन वापी– सरोवर– जलाशय– धर्मशाला– विद्यालय–अनाथालय–चिकित्सालय– मन्दिराणाञ्च निर्माणेन, वा पुनः स्थापनेन जीर्णोद्धारणेन च यद्धर्मो भवति सः पूतधर्मो वा सामाजिको धर्मोऽस्ति । एवञ्च वृक्षारोपणमार्गबन्धनादीनि लोकोपकाराकाणि कर्माणि जनहितार्थाय सन्ति। अतः तानि पूर्तधर्मे समाविष्टानि भवन्ति । आचार्येण तादृशानां कर्मणाममि माहात्म्यं प्रदर्शितमस्ति । यो जनः नूतनजलाशयनिर्माणं वा पुरातनस्य जीर्णोद्धारं कारयति, सः आत्मना सह स्वकुलस्यापि उध्दारं करोति । स्वर्गलोकं च गच्छति । जीर्णानां स्थानानां जीर्णोध्दारं करोति सः विशिष्टस्य पुण्यस्य अधिकारी भवति ।

आचार्यः इन्द्राय उपदिशति यत् – हे देवेश ! येन निर्मितवापीतडागादिषु नीदाधकालेऽपि जलं न शुष्यति, सो जनः कदापि कठोराणि विषमानि दुःखानि न प्राप्नोति । यथा –

**“यस्तडागं नवं कुर्यात् पुराणं वापि खानयेत् ।**
**स सर्वं कुलमुद्धृत्य स्वर्गे लोके महीयते ॥**
**वापीकूपतडागानि उद्यानोपवनानि च ।**

**पुनः सम्स्कारकर्ता च लभते मौलिकं फलम् ॥**

**निदाघकाले पानीयं यस्य तिष्ठति वासव ।**

**स दुर्गं विषमं कृत्स्नं न कदाचिदवाप्नुयात् ॥**[३४०]

## जलाशयनिर्माणम्

**"धर्मस्यार्थस्य कामस्य फलमाहुर्मनीषिणः ।**

**तडागसुकृतं देशे क्षेत्रमेकं महाश्रयम् ॥**[३४१]**"**

नगरे वा ग्रामे जलाशयनिर्माणेन धर्मार्थकामं प्राप्यते । जलाशयेन सुशोभितं स्थानं सर्वेषां प्राणिनां कृते आश्रयस्थानं भवति । वस्तुतः जलाशये कियत्कालपर्यन्तं जलं तिष्ठति इत्यस्यापि फलविवरणमस्ति । जलेनैव अन्नम् उत्पद्यते । नष्टप्रायजलाशयानां जीर्णोद्धारणेन महत्पुण्यं लभते ।

## "वृक्षारोपणम्"

**"स्थावराणां च भूतानां जातयः षट् प्रकीर्तिताः ।**

**वृक्षगुल्मलतावल्ल्यस्त्वक्सारास्तृणजातयः ॥**[३४२]**"**

---

[३४०]. बृहस्पतिस्मृतिः ६२–६४

[३४१]. महाभारतम् , अनु० ५८/६

[३४१]. महाभारतम् , अनु०५८/२३

स्थावरभूतानां षड् जातय उक्ताः । यथा वृक्षः, गुल्मः, लता, वल्ली, त्वक्सारस्तथा तृणं च । वृक्षारोपकः स्वपूर्वजानां तथा भाविसन्ततीनाम् एवञ्च पितृकूलस्य उद्धारं करोति । उक्तञ्च महाभारते–

**“अतीतानागते चोभे पितृवंशं च भारत ।**

**तारयेद् वृक्षरोपी च तस्माद् वृक्षांश्च रोपयेत् ॥[३४३]”**

पादपाः स्वपुष्पैः देवतानां फलैः पितृणां छायाभिश्चातिथीनां सेवां कुर्वन्ति । शास्त्रे विभिन्नवृक्षारोपणस्य विभिन्नफलं वर्णितमस्ति किन्तु विस्तारभयेन अत्र न विविच्यते ।

## “सार्वजनिकपेयजलकुम्भम्”

यत्र पेयजलस्य अभावो विद्यते, तादृशस्थाने मार्गे वा पवित्रस्थले मण्डपान्तर्गतपेयजलव्यवस्था चिन्तनीया । तृष्णाव्याकुलपथिकानां च कृते जलसेवा परमो धर्मः। जलाशयनिर्माणेन यत्फलं लभते, तदेव पेयजलप्रबन्धेनाऽपि लभते ।

## “गोचरभूमीत्यागः”

यो जनः गवां कृते चरणाय भूमिं त्यजति, स स्वर्गात् अच्युतो भवति । वस्तुतो गोदानेन यत्फलं प्राप्यते, तदेव फलं गोभ्यः त्यक्तभूमेः प्राप्यते । वर्तमानसमये पश्यामः यत् जनाः कृषकाणां गवां च भूमिं बलात् आहरन्ति । अनेन सामाजिकव्यवस्था छिन्ना तथा गवां च दुर्दशा भवति । अयमधर्मः ।

---

[३४३]. महाभारतम् , अनु०५८/२६

गोचरभूमित्यागेन गवां कृषकाणां जीवनयापनं सरलं भवति । अतो गोचरभूमित्यागः सामाजिको धर्मोऽस्ति ।

### “<u>देवालयनिर्माणम्</u>”

देवस्य आलयः इति देवालयः । यत्र देवः निवसति स देवालयः । मानवीय–समाजे देवालयानां महत्त्वं वर्तते । समाजे, नगरे, ग्रामे च देवालयस्य स्थितत्वाद् धार्मिकजनाः सुखदनुभूतिं कुर्वन्ति । देवालयः धर्मस्य आश्रयस्थानमस्ति । अतः यो जनः देशे, नगरे, ग्रामे वा देवालयनिर्माणं कारयति सः धर्मम् आचरति ।

## ५.५. समसामायिको धर्मः

संसारस्य आदिकालः किदृश आसीत् ? विषयेऽस्मिन् भारतीयमान्यता पाश्चात्यमान्यता इत्यनयोर्मध्ये मौलिकम् अन्तरं विद्यते । पाश्चात्याः वदन्ति यत् आदिकालिनमानव असभ्यः, मुर्खः, पाशविकस्तथा स्वार्थरतश्चासीत् । तन्मनसि स्वार्थभावनया सह क्रुरताऽपि आसीत् । शनैः शनैः स सामाजिकप्राणी अभूत् ।

कालान्तरे मानवस्य ज्ञान– विद्या– बुद्धि–आचारादीनां विकासो जातः जायमानश्चास्ति । इदानीं सर्वासु दिक्षु मनुष्येण उन्नति कृता वर्तते । केवलशारीरिकदृष्ट्या मनुष्यः प्रथमे युगे सशक्त आसीत्, किन्तु यथा तेन प्रकृत्या सह अन्तरं वर्धितं, तस्य जीवनं कृत्रिमं जातं तथा तस्य शारीरिकशक्तेः ह्रासः जातः । अयं तु पाश्चात्यवैज्ञानिकानां मतम् ।

अतो मनसि प्रश्नः समुद्भवति तत्–तत्कालिनमनुष्याणां को धर्माचार आसीत् ? विषयेऽस्मिन् भारतीयऋषीणां मान्यता भिन्नैव वर्तते । भारतीयमतमस्ति यत् न शरीरस्य ह्रासः जातः न वा मनोबुद्धेर्विकासः । मनसः स्वभावो हि निर्मलः सद्गुणयुक्तश्चास्ति । काम–क्रोध–द्वेष–क्रुरतादयस्तु विकृतयः सन्ति । विकृतीनां वस्तूषु प्रवेशस्तु क्रमशो भवति । अतो आदिमानवः शुद्धः, सात्विकः, सद्गुणसम्पन्नश्चाऽसीत् । स सरलः, दयाशीलः, त्यागयुक्तश्चासीत् । दोषास्तु तस्मिन् पश्चात् समायाता आयान्त्यपि ।

## "तुलनात्मकमध्ययनम्"

विश्वस्य विश्वस्य सर्वेषां प्राणिनां कृते हिताऽहिताविवेकजन्यमहदनर्थात् त्रातुं तथा निर्विघ्नाभ्युदयसिद्ध्यर्थं केचन नियमाः स्वाभाविकप्रवृत्तेः निवारकाः श्रृङ्खलारुपेण अभ्युपेयाः । महर्षिभिः देशकालस्य परिस्थितिं ज्ञात्वा भिन्न–भिन्नयुगार्थं धर्माः व्यवस्थापिताः । एषा तु भिन्ना चर्चा यत् नियमाः परस्परं

विभिन्ना अथवा कतिपयाशेषु विरुद्धा भवेयुः । यतो हि उन्नति अवनतिश्च अपेक्षाधीना भवति । काचित् स्थितिः कस्मैचित् उन्नतिरुपेन परिगण्यते अन्येभ्यश्च अवनतिरुपेण । अवसाम्प्रदायिकनियमानुसारेण नियमपालकः कश्चिज्जनः स्वसमाजे उच्छृङ्खलप्रवृत्तिमतामपेक्षया ज्यायान् परिगण्यते; यतो हि तस्य स्थितिः उच्छृङ्खलपुरुषापेक्षया श्रेष्ठा वर्तते । किन्तु अनेन एतद् वक्तुमशक्यं यत् एषः अन्येभ्योऽपि श्रेष्ठ इति ।

धर्मस्य एतल्लक्षणं नीतिशास्त्रेण सह अपि प्रायशो युक्तिसङ्गतो भवति । कारणं तत्र – यथा अभ्युदयसाधनं धर्म प्रोच्यते तथैव **"नीयतेऽभ्युदयोऽनया"** इति व्युत्पत्या नीतेरपि अभ्युदयसाधनमेव अर्थो भवति । तदा तु पर्यायवाचकता भविष्यति; परन्तु लोके उभयोः शब्दयोः भिन्नप्रयोगो दृश्यते । अतः उभयोः शब्दयोरपि अवश्यमेव भिन्नार्थो स्वीकर्तव्यः । अतः प्राधान्येन ऐहिकाभ्युदयसाधनं नीतिः तथा प्राधान्येन पारलौकिकाभ्युदयसाधनं धर्मो ज्ञातव्यः ।

अत्र प्राधान्यशब्दस्य अभिप्राय इदमेव यत् नीतिः प्राधान्येन लौकिकाभ्युदयस्य साधनमपि सदपि पारलौकिकाभ्युदयस्यापि साधनं भवति ; यथा धर्मशास्त्रेषु दण्ड्याय दण्डप्रदानेन दण्ड्यदण्डयितारौ उभौ स्वर्गं यातः । अस्योदाहरणानि तु महर्षिलिखितानि तथा राजा सुद्युम्नो वर्तते । एवं पारलौकिकाभ्युदयस्य साधनमपि ऐहिकाभ्युदये सहायकृद् भवति । अनेन एतत्सिद्ध्यति यत् नीतिः पारलौकिकाभ्युदयस्य साधनं न भवेत् भवतुनाम; किन्तु पारलौकिकाभ्युदयस्य व्यापदिका नैव भविष्यति । दूरदर्शिनः परिणामे बद्धादराः भवन्ति । निकटदर्शिनः समीपवर्तिनी फले आकाङ्क्षिणो वर्तन्ते । परिणामे

अनिष्टकरोऽभ्युदयो वस्तुतः अभ्युदयो न अभ्युदयाभासो वर्तते । दुर्योधनस्य नीतिः तात्कालिकं फलदा किन्तु परिणामे सर्वस्य नाशिका । अत एव धर्मविरोधिनी जाता। सुधयः तं कूटनीतिः नित्यभासिका भणन्ति । अपरपक्षे युधिष्ठिरस्य नीतिः यद्यपि आदौ किञ्चित्कालपर्यन्तं कष्टप्रदा; किन्तु परिणामे सर्वतोभावेन अभिवृद्धेः हेतुरुपा। द्वितीयायाः चन्द्रलेखा अल्पमात्रायां भवति तथापि अभिवर्धनोन्मुखा अतः सर्वैर्वन्द्या ।

पूर्णिमायाः पूर्णकलासम्पन्नं बिम्बमपि तादृशं न वन्द्यम् । यतो हि तस्य पूर्णताया अवधिः समाप्ता जाता; अधुना सुधाकरः क्षयिष्णुः वर्तते ।

यदि कोऽपि नीतिः सद्यः (प्रारम्भे) दुःखकरी भवेत्; अवनतेश्चापि जनिका भवेत् किन्तु परिणामे यदि उन्नताभ्युदयस्य च जनिका वर्तते चेत् यथार्थनीतिः। नीतिधर्मयोर्मध्ये एतावान् भेदः अवश्यमेव दृष्टिगोचरो भवति यत् नीतिस्वरुपं देशकालभेदेन परिवर्तनार्हं भवति । कारणन्त्वत्र नीतेः साध्यसाधनभावो लौकिको वर्तते । तं झटिति बुद्ध्याऽवगन्तुं कतिपयाशेषु कदाचित् शक्यते । किन्तु धर्मोऽदृष्टेन सह सम्बध्नाति । अतः तस्य साध्यसाधनभावो चर्मचक्षुसा ज्ञातुं न वारयामः । तद्विचारार्थमपि विलक्षणदीर्घदर्शिनां गवेषकाणाञ्च आवश्यकता वर्तते; अतः तस्मिन् परिवर्तनमपि न साहजिकम् ।

एतदपि सत्यं यत् पुरातनसंस्कृतिपरिपौषकैरपि कालभेदेन धर्मस्य परिवर्तनं कृतम् । कस्मिश्चिद् युगे मन्वादिप्रोक्तम्; कुत्रचित् याज्ञवल्क्यादि प्रोक्तम्; कुत्रचिच्च पराशरप्रोक्तं धर्माणामादरस्मृतिप्रोक्तम् । युगभेदेन धर्मस्य तारतम्योऽपि वर्तते । तथाऽपि अत्र एतद् विचारः कर्तव्यो यत् परिवर्तनं सावधिः भवेद् अथवा निरवधि

भवेद्; निरवधिकपरिवर्तनेन निश्रृङ्खलप्रवृतिर्भविष्यति । तदा तु धर्मस्य प्रयोजनम्; यत् पाशविकी–उच्छृङ्खलप्रवृत्तेः निरोधो वर्तते तदपि न सिध्यति । अपरे जनाः नीतिविरुद्धाः; यतो हि नीतिज्ञोऽपि यदि केनापि सह सन्धिं करोति चेत् केषुचन नियमेषु दृढाः भवन्ति; ये अनुलङ्घनार्हाः भवन्ति; अन्यथा शनैः शनैः अन्यविपक्षिराष्ट्राणि अस्माकं समग्रराष्ट्रस्य उपरि आक्रमणं कर्तुं शक्नुवन्ति । अत एव केचन नियमाः सन्धिमध्ये स्थापयन्ति; येषां विच्छेदेन अन्यनीतीनां समाश्रयणं कर्तव्यम् । यदा लौकिकस्थूलकार्येषु उपयुक्तस्थूलदर्शनेभ्यः निर्धारितलौकिकनियमाः सहसा अनुल्लङ्घनीया भवन्ति; पुनश्च परमसूक्ष्मधार्मिकनियमानां निरवधिकं परिवर्तनं कथं भवितुं शक्यते ?

अत्र प्रथमपक्षोऽपि न युक्त; यतो हि अवधिनिर्धारणकर्ता को भवेत् ? यदि यः कोऽपि निर्धारणकर्ता भवेत् तदा तु यस्य या इष्टावधि भवेत् तस्या एव निर्माणं कुर्यात् । अतः यः सर्वदेशस्य सर्वकालस्य परिस्थितीः जानाति स एव तत्तद्देशकालानुकूलं परिवर्तनं कर्तुं शक्नोति । अनया रीत्या अल्पज्ञपुरुषान् नाऽयमधिकारः । स्मृतीणां मतभेदस्यापि अयमेव अभिप्रायो वर्तते यत् वेदरहस्यज्ञ–सर्वज्ञ–कल्प–महर्षिभिः देशकालस्य परिस्थितिं ज्ञात्वा भिन्न–भिन्नयुगार्थं धर्माः व्यवस्थापिताः । तेऽपि नित्यरुपेण एव तत्तद् युगेभ्यः या व्यवस्था वर्तते; सा एव महर्षिभिः प्रतिष्ठापिता वर्तन्ते । अनेन प्रकारेणैव धर्मस्य नित्यता अपि वर्तते ।

- शुभाऽशुभकर्मणां वासनया वासितः परमाणुरेव धर्म इति जैनाः ।
- क्षणिकविज्ञानसंतत्याश्रितवासना एव धर्म इति बौद्धानां मतम् ।

- योगज्ञानादिना वृत्तिनिरोधेन जीवन्मुक्तिः धर्म इति तु सांख्यवादीनां मतम् ।
- विहितप्रतिषिद्धकर्माणामाचरणवर्जनद्वारा प्राप्तविशिष्टो गुणो धर्म इति तु वैशेषिकानां मतम् ।
- ‘अपूर्व एव धर्मः’ इति तु प्रभाकरादि–मिमांसकानां वचः ।
- वेदबोधितः ‘चोदना लक्षणोऽर्थो धर्मः’ एतेन जैमिनि–सूत्रेण प्रवर्तितः, वेदशास्त्रेण बोधितः, राग–द्वेषरहितः, सत्पुरुषसेवितः होम–याग–दानादिरेव धर्म एतद् जैमिन्यनुयायिमीमांसकानां मतम् ।

# षष्ठोऽध्यायः

## ( रामायणे धर्मतत्त्वाऽध्ययनात्मकः )


६.१. रामायणे धर्मस्वरुपम् । २५५–२५६

(क) वाल्मीकेः धर्मविषयिकी अवधारणा । २५७–२७५

(ख) रामायणे वर्णितधर्मसन्दर्भाः । (काण्डक्रमानुसारेण)

२७६–२८३

६.२. रामायणस्य धर्मतुलना । २८४

(क) वेदरामायणयोः धर्मः । २८५–२९२

(ख) स्मृतिरामायणयोः धर्मः । २९३–३०५

# (षष्ठोऽध्यायः)

## ६.१. "रामायणे धर्मस्वरुपम्"

वैदिकसंस्कृत्यां चत्वारः पुरुषार्थाः प्रोक्ताः –धर्मार्थकाममोक्षाः । तेषु प्रथमो पुरुषार्थोऽस्ति धर्मः । तद्धर्मस्य पूर्तये अन्यानि शास्त्राण्यपि सहायकानि भवन्ति । धर्मशास्त्रेषु यथा को धर्मः ? कथम् आचरणीयः ? कुत्र समासः ? कुत्र व्यासः ? इत्यादिविषयान् आधृत्य चर्चा विहिताऽस्ति । विषयाणामेषां वर्णनं धर्मशास्त्रातिरिक्तं पुराणेष्वपि प्राप्यते । तत्र पुराणेश्वपि धर्मस्य तावत्त्येवावश्यकता महत्ता च स्वीकृता अस्ति यावति स्मृत्यादिधर्मशास्त्रेषु । अतो ग्रन्थैरेतैः धर्मः एतावान् विस्तृततया परिपुष्टतया प्रामाणिकतया च प्रस्तुतः; कारणं धर्मस्य गणना चतुर्षु पुरुषार्थेषु प्रथमपुरुषार्थत्वेन भवति । स्मृतिकारैः धर्मस्य ये नैकाः भेदाः प्रदर्शिताः, तान् धर्मस्य भेदान् ध्यानपथे नयामश्चेत् मानवस्य जीवने जायमानाः सर्वाः क्रियाः तस्मिन् समाहिताः भवन्ति । तदानीं गत्वा मनुष्यः प्रथमपुरुषार्थस्य प्राप्तिं कर्तुमर्हति । प्रश्नोऽस्ति अत्र यत् वाल्मीकिरामायणे धर्मस्य स्वरुपं किमस्तीति ? तर्हि यदा वाल्मीकिरामायणस्य अध्ययनं कुर्मस्तदा प्रारम्भे एव महर्षिवाल्मीकिना लिखितं यत्–

**कोऽन्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान् ।**

**धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥**[३४४]

[३४४]. वा०रा० बाल०/१/२

रामायणे वाल्मीकिः तपःस्वाध्यायनिरतं मुनिवरश्रेष्ठं नारदं पृच्छति , यत् अस्मिन् लोके को गुणवान्, वीर्यवान्, कृतज्ञः, सत्यवक्ता तथा च धर्मज्ञोऽस्ति यस्याऽहं चरित्रं लिखेयम् ? प्रश्नस्यास्योत्तरं स्वयं रामायणे एव प्राप्यते –

**"रामो विग्रहवान् धर्मः साधुः सत्यपराक्रमः ।**

**राजा सर्वस्य लोकस्य देवानामिव वासवः ॥**[३४५]

अर्थात् श्रीरामो धर्मस्य मूर्तिमान् स्वरुपोऽस्ति । स साधुः सत्य पराक्रमी चास्ति । यथा इन्द्रः सर्वदेवानाम् अधिपतिः, तद्वदेव श्रीरामोऽपिसम्पूर्णजगतः राजाऽस्ति ।

अनेनेदं सिद्धयति यत् **"कोऽन्वस्मिन् साम्प्रतं लोके"** इत्यस्य प्रश्नस्योत्तरे **"रामो विग्रहवान् धर्मः"** इत्युत्तरत्वात् अनयोः संगतिः वाल्मीकिरामायणे भवत्येव । अर्थात् भगवन्तं रामं साक्षाद् धर्मस्वरुपत्वात् समाजः स्वीकुर्वन्ति । भगवता रामेण आजीवनं यत्किमपि कार्यं निष्पादितं तत् सर्वं धर्माधारितमेवासीत् । वाल्मीकिरामायणे अधिकांशपात्राणि वेदविहितपुराणसमाहितधर्मशास्त्रसूचित–धर्मद्योतकानि सन्ति । समस्तं रामायणमेव साक्षाद् धर्मग्रन्थः वर्तते । मम विचारानुसारं यथा आदिकाव्यत्वेन रामायणमस्ति तद्वदेव आदिधर्मकाव्यत्वेनाऽपि रामायणमेव भवेत् । अतो वाल्मीकेः धर्मविषयिकी अवधारणा इत्यस्मिन् विषये इदानीं विचारं कुर्मः ।

---

[३४५]. वा०रा०३/३७/१३

## (क) “वाल्मीकेः धर्मविषयिकी अवधारणा”

वाल्मीकिरामायणं यथातु चरित्रमहाकाव्यमस्ति । किन्तु अनेन चरित्रमहाकाव्यमाध्यमेन महर्षिवाल्मीकिना मानवीयतत्त्वान्यस्मान् पुरतः प्रस्तुतानि सन्ति । तानि सर्वाण्यपि तत्त्वानि धर्मपोषकानि सन्ति । अतो वाल्मीकिरामायणे यत् धर्मस्वरुपं विद्यते तत् पूर्णतया वैदिकसंस्कृतिं परिपालयति पोषयति च । तत् स्वरुपं धर्मपरिभाषाऽऽधारेण धर्मशास्त्रद्वारा कथितं वर्णितञ्चाऽस्ति । तत् धर्मस्वरुपं पुराणेषु वर्णितधार्मिकचित्रणादीन् समाधत्य सम्पुर्णरुपेण सनातनसंस्कृत्या समृद्धं परिपुष्टं च प्रतीयते । एतस्योदाहरणानि रामायणे नैकेषु स्थानेषु मिलन्ति । पूर्वम् इत्यस्यमिन् विषये विशदी चर्चा कृताऽस्ति तथापि संक्षेपेण अत्र प्रस्तूयते । यथा–

महर्षि प्राचेतसो वैदिकधर्मस्य श्रेयसाधनत्वं, वेदानाम् अखण्डितं प्रामाण्यं च लोकम् अवगमयितुमेव श्रीमद्रामायणमहाकाव्यम् अस्माकं पुरतः प्रस्तुतवानस्ति । वेदानाम् अखण्डितप्रामाण्यस्य हेतुमपि स सत्यमेव निर्दिष्टवान् । महर्षिवाल्मीकिः रामायणे सर्वत्र सत्य–धर्मयोः महिमानम् अगासीत् ।

साधरणतया जना विचारयन्ति यत् धर्मपालने सत्यस्य तथा सत्यपालने न धर्मस्य प्रामुख्यम् । अत एव स्वे–स्वे निष्ठावन्तो जना अपि असत्यभाषणे संकोचं न अनुभवन्ति । तद्वदेव सत्यनिष्ठजनाः सत्यपालने न धर्मस्य उल्लङ्घनेऽपि संकोचं कुर्वन्ति । इदं तावत्सत्यधर्मयोस्तेषां यथावदनवगममेव । तथ्यमिदं भगवान् वाल्मीकिः सर्वत्र घोषितवान् । श्रीरामद्वारा जाबालिमतखण्डनावसरे रामायणकविरिदं तथ्यं प्रस्तौति –

## “सत्यमेव धर्मः”

**“सत्यमेवेश्वरो लोके सत्ये धर्मस्सदाश्रितः ।**

**सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् ॥**

**ऋषयश्चैव देवाश्च सत्यमेव हि मेनिरे ।**

**सत्यवादी च लोकेऽस्मिन् परं गच्छतिचाक्षयम् ॥[३४६]”**

इदमनेन स्पष्टं भवति यत् वेदोक्तो धर्मो यो दान–याग–होम–तपादिरुपः स सत्यपालनेन सार्थको भवति । वेदस्य धर्मे यद् अखण्डितं प्रामाण्यं तदपि सत्यमूलकमेव । सृष्टि–स्थिति–लयकारक ईश्वरोऽपि सत्यस्वरुप एव । धर्मोऽपि सदा सत्याऽश्रितो भवति । असत्यमूलको धर्माभास एव, न तु धर्मः । धर्मस्याधारभूतत्वेन ईश्वररुपत्वेन च सत्यस्याऽयं महिमा वेदप्रतिपादितः । सत्यस्य विषये न मतभेदो दृश्यते । ऋषय एव न, अपितु स्वर्गाधिष्ठिताः देवा अपि सत्यस्य महिमानं निर्द्वन्द्वं स्वीकृतवन्तः । सत्यस्य सत्यमूलकधर्मस्य सेवनेन मनुष्यो यदक्षरं परतत्त्वं प्राप्नोति तेन सह सायुज्यं यातीति वैदिकमतम् ।

सत्यस्य व्रतमिदं न केवलं व्यक्तिगतजीवने एवाऽपितु सामाजिके पारिवारिके च जीवने राजनीत्यामापि परिपाल्यं भवति । अत एव भगवान् श्रीरामो भणति । यथा–

**“सत्यमेवानृशंसंच राजवृत्तं सनातन ।**

[३४६]. वाल्मीकिरामायणम् सर्ग–१०९

**तस्मात्सत्यात्मकं राज्यं सत्ये लोकः प्रतिष्ठितः ॥[३४७]"**

श्रीरामः राज्यशासने सत्यस्य उपेक्षया जायमानम् अनर्थमपि निर्दिशन् वदति–

**"कामवृत्तोन्वयं लोकः कृत्स्नस्समुपवर्तते ।**

**यद्वृतास्सन्ति राजानस्तद्वृत्तास्सन्ति हि प्रजाः ॥[३४८]"**

वेदाः मानवजीवनस्य परमं प्रयोजनं सत्योपलब्धिरेव निर्दिशन्ति । ज्ञान–विज्ञानयोः मुख्यं प्रयोजनमपि सत्योपलब्धिरेव ।

सृष्ट्यारम्भात् समस्तविश्वेस्मिन् सत्योपलब्ध्यर्थमेव मानवोऽन्विष्यन्नुपगतः । न केवलम् आध्यात्मिकशास्त्राणामेवाऽयं प्रयत्नः, किन्तु भौतिकशास्त्राणामपि । इदं सत्यव्रतं मानवस्त्रिकरणैर्यदा पालयितुं शक्नोति तदा अस्मिल्लोके परलोके च कृतकृत्यो भवति । सत्यस्य पालनेन धर्माचरणेन च जगति सुख–शान्ती प्रतिष्ठिते भवतः । सत्य–धर्मयोः पालनेन मनुष्यस्स्वं चित्तं निर्मलं कर्तुं शक्नोति । अत एव रामायणमिदं स्पष्टम् उद्घोषयति यत्–

**"सत्यधर्माभिरक्तानां नास्ति मृत्युकृतं भयम् ॥[३४९]"**

(मनुष्यैः सत्य–धर्मयोः पालनेन मृत्युकृतं भयम् अपरारयितुं शक्यते ।)

मानवसमाजस्य सुव्यस्थायै धर्मपालनमनिवार्यं भवति । यत्र जनाः स्व–स्व धर्मं न पालयन्ति, स समाजः शाश्वतं विनाशं प्राप्नोति । अत एव धर्मो विश्वस्य

---

[३४७]. वाल्मीकिरामायणम् २/१०८/१०

[३४८]. वाल्मीकिरामायणम् २/१०८/९

[३४९]. वाल्मीकिरामायणम् ६/४६/३४

जगतः प्रतिष्ठादायक इति वेदोपदिष्टः । लोके जन्मप्राप्त्यनन्तरं सर्वेणाऽपि मनुष्येण विविधाः धर्माः पालनीया भवन्ति । स यस्मिन् परिवारे संजातस्तस्य परिवारस्य विषये, यस्मिन्देशे समुत्पन्नस्तस्य विषये, येतु जना स्तस्मिन्निर्भरा स्तेषां विषये, येन शासनेन तस्य लोके सुस्थितिः कल्पिता, तस्य राज्यशासनस्य [सर्वकारस्य] विषये च, सर्वेणापि मनुष्येण, स्व–स्वधर्मः सत्यनिष्ठया पालनीयो भवति । यदि काऽपि स्वस्य विषये नियतानां कर्तव्यानां पालनविषये छलमथवाऽलसतां करोति, तदा समाजस्याथवा परिवारस्य नोचेद्देशस्यैव तस्य कारणान्महति हानिर्भवति । अत एव रामेण सर्वेणापि मनुष्येण स्वपरिवारस्य, देशस्य, समाजस्य च विषये, यानि–यानि कर्माणि कर्तव्यत्वेन शास्त्रेण प्रतिपादितानि, तेषां पालनविषये, जागरुकेण, निष्ठावता च भवितव्यमिति मुक्तस्वरेण उद्घोषितम् ।

यदा स्वमाता कौसल्या, वनाय प्रवजितं रामं, वृध्दं, पतिं परित्यज्याऽनुगन्तुमिच्छति, तदा, स महात्मा, तस्यै, पुत्रगार्धिन्यै देव्यै दशरथस्य पुत्रत्वेन स्वधर्मं, पत्नीत्वेन च तस्याः स्वं धर्मं ज्ञापयन् वदति –

**"कौटुम्बिकधर्मः"**

**"त्वया मया च वैदेह्या लक्ष्मणेन सुमित्रया ।**

**पितुर्नियोगे स्थातव्यमेष धर्मस्सनातनः ॥**[३५०]

**"पुत्रधर्मः"**

**'नास्ति शक्तिः पितुर्वाक्यं समतिक्रमितुं मम ।**

[३५०]. वाल्मीकिरामायणम् २/२१/४८–४९

**प्रसादये त्वां शिरसा गन्तुमिच्छाम्यहं वनम् ॥**

**"नाऽहं धर्ममपूर्वं तं प्रतिकूलं प्रवर्तये ।**

**पूर्वैरयमभिप्रेतो गतो मार्गोऽनुगम्यते ॥**[351]

## "शिष्यधर्मः"

गुरोर्विषये शिष्येण तदाज्ञापालानरुपोऽयं धर्मः यथाऽवश्यं पालनीयः तं ताटकावधम् आज्ञापयतो विश्वामित्रास्य पुरतो ज्ञापयन् वदति : –

**"सोऽहं पितुर्वचः श्रुत्वा शासनाद् ब्रह्मवादिनः ।**

**करिष्यामि न संदेहस्ताटकवधमुत्तमम् ॥**

**"गोब्राह्मण हितार्थाय देशस्य च हिताय च ।**

**तव चैवाऽप्रमेयस्य वचनं कर्तुंमुद्यतः ॥**[352]

अत्र ध्यातव्यं यद् भगवान् रामस्तटकावधं न केवलं गुरुशासनरुपमेव मत्त्वाऽकरोत्, परंतु तस्मिन् वधे गोब्राह्मणहितं देशस्य च हितम् अपि अपश्यत् ।

उपरोक्तश्लोकं गो–ब्राह्मणहितकरणे, देशस्य च हितकरणे च क्षत्रियेण निरन्तरं यत्नवता भवितव्यमिति च सूचयति ।

## "भ्रातृधर्मः पुत्रधर्मश्च"

---

[351]. वाल्मीकिरामायणम् २/२१/३०–३१

[352]. वाल्मीकिरामायणम् १/२६/४–५

सेनया सह चित्रकूटं रामं नेतुम् आगच्छन्तं भरतं दृष्ट्वा तस्मिन् किल्बिषं विशङ्क्य तं सपरिवारं जिघांसन्तं लक्ष्मणं वारयता रामेण भ्रातृणां पितुश्च विषये सर्वेणापि जनेन कथं वर्तितव्यमिति विषयं निरुपयता उक्तं यथा :-

" पितुस्सत्यं प्रतिश्रुत्य हत्वा भरतमाहवे ।
किं करिष्यामि राज्येन सापवादेन लक्ष्मण ॥
"यद् द्रव्यं बान्धवानां वा मित्राणां वा क्षये भवेत् ।
नाऽहं तत्प्रतिगृह्णीयां भक्षान्विषकृतानिव ॥
" धर्ममर्थं च कामं च पृथिवीं चापि लक्ष्मण ।
राज्यमप्यहमिच्छामि सत्येनायुधमालभे ॥
" यद्विना भरतं त्वां च शत्रुघ्नं वापि मानद ।
भवेन्मम सुख किंचिद्भस्म तत्कुरुतां शिखी ॥
"कथंनु पुत्राः पितरं हन्युः कस्यांचिदापदि ।
भ्रातावा भ्रातरं हन्यात्सौमित्रे प्राणमात्मनः ॥
"यदि राज्यस्य हेतोस्त्वमिमां वाचं प्रभाषसे ।
वक्ष्यामि भरतं दृष्ट्वा राज्यमस्मै प्रदीयताम् ॥[३५३]

नूनमनेन भ्रातृणां मध्ये यः पारस्परिको विश्वासः, पारस्परिकं च सौभ्रात्रमपेक्षितं तत्तु साधु निरुपितम् । अपरश्चायं विशेषोऽत्रोपलक्षितः यत् धर्मस्य

[३५३] . वाल्मीकिरामायणम् (२/९७/३–६ ; ८–१६=१७)

पुरतो राज्यस्याऽथवा संपदो न किमपि महत्वमिति । अमुमेव विषयं प्रकटयन् भगवान् श्रीराम अस्मिन्नेव संदर्भे वदति ।

## “पत्युः धर्मः”

पत्युः पत्न्या विषये यो धर्मोऽनुसरणीयस्तं निरूपयन् देव्यै सीतायै श्रीरामः कथयति : –

“ यत्सृष्टाऽसि मया सार्ध्दं वनवासाय मैथिलि ।
न विहातुं मया शक्या प्रीतिरात्मवता यथा ॥
धर्मस्तु गजनासोरु सद्भिराचरितः पुरा ।
तं चाहमनुवर्तिष्ये यथा सूर्यं सुवर्चला ॥
न खल्वहं न गच्छेयं वन जनकनंदिनि ।
वचनं तन्नयति मां पितुस्सत्योपबृंहितं ॥[३५४]”

## “पारिवारिकधर्मः”

पारिवारिके धर्मे यथा माता– पित्रोरनुशासनस्य पालनमावश्यकम्, यथाच तद्भक्तिस्सर्वेषां पारिवारिकाणां जनानां विहिता, तथैव सामाजिके धर्मे गुरु, वृद्धादीनामादरः तेषु भक्तिश्च कर्तव्या भवति । यत्र समाजे गुरुषु वृद्धेषु च आदरः न भवति, स समाजो विकासं कर्तुं न प्रभवति । इदमेव तथ्यं प्रकटयञ्छीरामः कथयति : –

[३५४]. वाल्मीकिरामायणम् २/३०/२९–३१

**"अस्याधीनं कथं दैवं प्रकारैरभिराद्ध्यते ।**

**स्वाधीनं समतिक्रम्य मातरं पितरं गुरुम् ॥**

**"यत्र त्रयं त्रयो लोकाः पवित्रं तत्समं भुवि ।**

**नाऽन्यदस्ति शुभापांगे तेनेदमभिराद्ध्यते ॥**[३५५]

स्व–स्वधर्मपालनविषये सर्वेणापि जनेन जगरूकेण भवितव्यम् । स्वयं प्रमादतोऽपि, नाऽधर्म मनो निदध्यात् । अधर्मस्य वृध्दिमपि नोपेक्षेत । यदि जना अधर्मस्योपेक्षां कुर्युस्तर्हि, सोऽधर्मरूपो विषस्समाजरूपं शरीरमेव प्रसृत्या चिराऽदेव तद्विनाशयेत् । अत एव, रामो, वनगोचरस्सन्नपि ऋषीनकारणं हिसतां राक्षसानां वधं प्रतिजानन् कथयति :

**"तपस्विनो रणे शत्रून्हन्तुमिच्छामि राक्षसान् ।**

**पश्यन्तु वीर्यमृषयस्सभ्रातुर्मे तपोधनाः ॥**[३५६]

## "क्षत्रियधर्मः"

ऋषिणां रक्षणाय रामो महताऽन्देन, स्वप्राणपरित्यागं कर्तुमपि निरंतरं संन्नद्धो वर्नतेस्म । यथा स महात्मा ऋषिणां पालानार्थं समर्पितजीवितस्तथा

[३५५]. वाल्मीकिरामायणम् २/३०/३३–३४
[३५६]. वाल्मीकिरामायणम् ३/६/२५

आर्तानामभयदानेऽपि । अत एव साधूनामुपकारज्ञस्तथाऽऽर्तानां संश्रयश्चऽभिहितः । नूनमिदं शरणागतत्राणरूपं कार्यं भारतीयानामौदार्यस्य भूतदयायाश्च निदर्शनं करोति । विशिष्य भारतीयाः क्षत्रियास्स्वप्राणान् एवं संपदः,स्वं राज्यं किं बहुना स्वंजीवनमेव प्रत्यर्प्य शरणागतत्राणं कृतवन्तः । भगवाञ्छ्रीरामश्शरणागतानाम् अभयदानरूपं कार्यं स्वसनातनं व्रतमेव मन्यते स्म ।

अत एव विभीषणस्याऽभयदानसंदर्भे स महात्मा स्वमिदं महत्तरं व्रतं सुग्रीवस्य प्रतिबोधयन्  कथयति : –

"बध्दाञ्जलिपुटं दीनं याचन्तं शरणागतं ।

न हन्यादानृशंस्यार्थमपि शत्रुं परंतप ॥

आर्तो वा यदि वा दृप्तः परेषां शरणं गतः ।

अरिः प्राणान्यपरित्यज्य रक्षितव्यः कृतात्मना ॥

एष दोषो महानत्र प्रपन्नान्नामरक्षणे ।

अस्वर्ग्यं चाऽयशस्यं च बलवीर्यविनाशनम् ॥[३५७]"

एवं साधारणतः शरणागतरक्षणरूपधर्मस्य परिपालनाऽऽवश्यकता, तस्याऽपालनेन प्रत्यवायं चोद्भाव्य अस्मिन् विषये स्वस्य निर्णयं प्रकटयञ्छ्रीरामो कथयति –

"सकृदेव प्रपन्नाय तवाऽस्मीति च याचते ।

अभयं सर्वभूतेभ्यो ददाम्यतेद् व्रतं मम ॥

---

[३५७]. वाल्मीकिरामायणम् (६/१८/२७–२८–३१)

आनयैनं हरिश्रेष्ठ दत्तमस्याऽभयं मया ।

विभीषणो वा सुग्रीव यदि वा रावणस्स्वयम् ॥[३५८]"

## " चारित्रिकधर्मः"

अस्मिन् संदर्भेऽस्माभिरिदं न विस्मर्तव्यं यत् यावन्मनुष्यो न सत्यनिष्ठो भवति, तावद् धर्मस्य पालने समर्थो न भवति । धर्मस्य पालने यथा सत्यनिष्ठाऽपेक्षिता तथा शील–चरित्रयो निर्माणमप्यावश्यकं भवति । यः शीलविहीनो दुश्चारित्रश्च भवति स धर्मं यथावत् पालयितुं समर्थो न भवति । शील–चारित्रविहीनसमाजो अस्मिन् लोके चिरप्रतिष्ठां न गच्छति । तस्य प्रत्यक्षमुदाहरणं राक्षससमाज एव । रामायणेऽत एव सर्वत्र शीलचारित्रयोरावश्यक्ताया उद्घोषः कृतः । यदा कोपि मनुष्यः शील–चारित्रसंपन्नो भवति तदा सर्वेपि सद्गुणाः स्वत एव तस्मिन्नवसरं प्राप्य निवासं कुर्वन्ति । शील–चारित्रविहीनजनस्य सर्वेपि सद्गुणास्तप्तवालुकासु जलबिन्दुसदृशं क्रमशो विनष्टा भवन्ति । महर्षीणामादरस्य गौरवस्य च हेतुस्तेषां शीलचारित्र संपन्नत्वमेवासीत् । यतस्ते – शील–चारित्रसंपन्ना अत एव धार्मिकाश्च बभूवुः । सिद्धन्तोऽयं सर्वत्राऽव्यभिचरितो दृष्टः । सीतारामौ द्वावपि स्व–स्वशीलचारित्रयो रक्षण विषये सततं जागरूकावास्तामत एव, तावुभौ स्व–स्वधर्ममपि दृढनिष्ठया पालयितुं शक्तवन्तौ ।

एतदर्थं सीता–रामयोरुभयोः शील–चारित्रयोर्गानं आदिकविना सर्वत्र मुक्तकण्ठेन कृतम् । मारीचो रावणाय **रामस्य गुणान्** वर्णयन् गदति । यथा –

---

[३५८]. वाल्मीकिरामायणम् ६/१८/३३–३४

“ नच पित्रा परित्यक्तो नाऽमर्यादः कथंचन ।

न लुब्धो न च दुःशीलो नचक्षत्रियपांसनः ॥

नच धर्मगुणैर्हीनः कौसल्यानंदवर्धनः ।

नच तीक्ष्णो हि भूतानां सर्वभूतहिते रतः ॥
न रामः कर्कशस्तात नाऽविद्वान्नाऽजितेंद्रियः ।

अनृतं दुःश्रुतंचैव न रामे वक्तुमर्हसि ॥

रामो विग्रहवान्धर्मस्साधुस्सत्यपराक्रमः ।

राजा सर्वस्य लोकस्य देवानामिव वासवः ॥[३५९]”

रामदूतहनूमाञ्छ्रीरामस्य गुणान् निरूपयन् देव्यै सीतायै भणति : –

**“ रक्षिता जीवलोकस्य स्वजनस्य च रक्षिता ।**

**रक्षिता स्वस्य वृत्तस्य धर्मस्य च परंतपः ॥**[३६०]

देव्याः सीतायाः शीलम् अभिनन्दयन् वदति : –

“इमान्तु **शीलसंपन्नां** द्रष्टुमिच्छति राघवः ॥[३६१]”

श्रीरामः  शील–चारित्रविष्यकं स्वं मतमुद्घाटयन् जाबालिमिदं कथयति । यथा–

निर्मर्यादस्तु पुरुषः पापाचार समन्वितः ।

मानं न लभते सत्सु भिन्नचारित्रदर्शनः ॥

[३५९]. वाल्मीकिरामायणम् (३/३७/८–९१२–१३)

[३६०]. वाल्मीकिरामायणम् ५/३५/१०

[३६१]. वाल्मीकिरामायणम् ५/१६/२२

कुलीनमकुलीनं वा वीरं पुरुषमानिनम् ।
चारित्रमेव व्याख्याति शुचिं वा यदिवाऽशुचिम् ॥
कश्चेतयानः पुरुषः कार्याकार्य विलक्षणः ।
बहूमन्येत मां लोके दुर्वृत्तं लोकदूषणम् ॥
कस्य यास्याम्यहं वृत्तं केन वा स्वर्गमाप्नुयाम् ।
अनया वर्तमानोऽहं वृत्त्या हीनप्रतिज्ञया ॥[३६१]

यः शीलचारित्रसंपन्नो भवति स एव, सत्यव्रतं तत्प्रतिष्ठितं सर्वविधं धर्मं च यथावत्पालयितुं शक्नोति । यः शील–चारित्रविरहितः स स्वमात्मानं लोकं च वंचयित्वा स्वमात्मानं देशं च यातयति ।नूनं सत्य–धर्मयोः पालनेन महत्तरं कल्याणं भवति । सत्यस्य मनसा, वचसा, कर्मणा च पालनेन मनः शुध्धं भवति । तादृशे शुध्दमनसि जायमानाः संकल्पाः लोककल्याणाय आत्मकल्याणाय च भवति । शुध्दचित्तमेव स्वधर्मपालने निश्चलं संदेहरहितं च भवति । शुध्दमनसा भगवत्साक्षात्कारं कर्तुं शक्यते । मानसशुद्ध्या मनुष्यः संसारबंधनेभ्यो विमुक्तो भवति । शुध्दचित्तेनैव मनुष्यः स्वधर्मं यथावत्पालयित्वा सर्वविधस्य श्रेयसो भाजनं भवति । य अशुध्दचित्तो भवति स नाऽस्मिल्लोके परत्राऽपि शान्तिं न प्राप्नोति । यस्य मानसं स्वार्थवासनाभिर्युक्तं स नोभयलोकयोः सुखं प्राप्तुमर्हति । अत एव श्रीकृष्णोऽर्जुनं उपदिशन् कथयति : –

## “कर्तव्यरुपधर्मः”

---

[३६१]. वाल्मीकिरामायणम् (२/१०९/३–४–७–८)

**"युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।**

**अयुक्तः कामकारेण फले सक्तो निबद्ध्यते ॥**[३६३]

यः कर्तव्यदृष्ट्या धर्मम् आचरति सैव नैष्ठिकीं शांतिमाप्नोति । यस्य चित्तं अशुध्दं कामवासनाभिः कलुषितं च भवति, स स्वार्थभावेन धर्ममाचरति येन, स बध्दः सन् विनाशं प्राप्नोति ॥

लोक–परलोकयो श्रेयोऽभिलषता मनुष्येण इहपरलोकसाधको धर्मः निष्ठापूर्वकं अनुष्ठेयो भवति । यः स्वार्थवशाद् धर्मं त्यजति स स्वस्य आत्मानं स्वस्य परिवारं, स्वस्य समाजं च विनाशयति । अत एव आदिकविः रामस्य गुणान् वर्णयन् हनूमन्तम् इदम् अवाचयत् । यथा–

**" सत्य –धर्मरतः श्रीमान् ।**[३६४]**"**

रामायणे श्रीरामः स्वामनन्यां सत्यनिष्ठां पदे पदे उदघोषयतीति द्रष्टुं शक्यते । तस्मिन् काले प्रतिज्ञायाः कियत्महत्त्वमासीत् इत्यस्य उदाहरण रामस्य वचनेनानेन ज्ञायते । यथा–

**"संश्रुत्य नच शक्ष्यामि जीवमानः प्रतिश्रावं ।**

**मुनीनामन्यथा कर्तुं सत्यमिष्टं हि मे सदा ॥**[३६५]**"**

मुनीनां पुरतः कृता प्रतिज्ञा मम जीविते नाऽन्यथा कर्तुं प्रभवामि । सत्यस्य पालनं मह्यम् अतिप्रियमस्ति ।

---

[३६३]. श्रीमद् भगवद् गीता ५/१२

[३६४]. वाल्मीकिरामायणम् ५/३५/२१

[३६५]. वाल्मीकिरामायणम् ३/१०/१७

# “अधर्मस्य तिरस्कारः”

अथाऽसत्यवदनेन यथोभयलोकहानिर्भवतीति विषयं श्रीराम स्स्पष्टीकुर्वन्निदं वदति :

“उद्विजंते यथा सर्पान्नरादनृतवादिनः ।

धर्मस्सत्यं परो लोके मूलं सर्वस्य चोच्यते ॥

असत्यसंधस्य सतश्चलस्याऽस्थिरचेतसः ।

नैव देवा न पितरः प्रतीच्छंतीति नः श्रुतम् ॥[३६६]”

असत्यवक्तुः जना तथैव बिभ्यति यथा सर्पात् । संसारे सत्यमेव चरमोत्कर्षस्तथा सर्वेषाम् मूलमपि सत्यमेव । असत्यवक्तृणाम् हव्यं पितरः न स्वीकुर्वन्तीत्यस्माभिः श्रुतमस्ति ।

वाल्मीकिः **सुन्दरकाण्डे** अधर्माऽचरणेन उत्पद्यमानं विनाशं बोधयन् तत् तत् पात्रमुखेन कथयति । यथा–

“**महोत्पातो अधर्मात्तु भविष्यति** हि सांप्रतम् ।

नैते धर्मं विजानंति राक्षसाः पिशिताशनाः ॥[३६७]”

( इदानीं अधर्माद् एव महान् उत्पातः भविष्यति, कारणं एते मांसभक्षिणः राक्षसाः स्वल्पमपि धर्मं न जानन्ति ।)

**युद्धकाण्डे** माल्यवान् रावणं स्वम् अधर्मम् अवगमयन बोधयति । यथा –

**“स प्रमादात् प्रवृध्दस्तेऽधर्मोऽहिर्ग्रसते हि नः ।**

---

[३६६]. वाल्मीकिरामायणम् २/१०९/१२–१८

[३६७]. वाल्मीकिरामायणम् ५/२६/३४

**विवर्धयति पक्षं च सुराणां सुरभावनः ॥[३६८]"**

तव प्रमादात् वर्धितोऽहिः अस्मान् निगलयितुं इच्छति तथा देवताभिः पालितो धर्मस्तस्यपक्षं वर्धयति ।

युद्धकाण्डे **माल्यवानेन** धर्माऽधर्मयोः सुन्दरं चित्रणं प्रस्तुतमस्ति । स रावणं सन्धिं कर्तुं प्रयतितवान्, किन्तु रावणस्तु रावण एव, तस्य का वार्ता !

**युद्धकाण्डे** माल्यवानस्य धर्माऽधर्मयोर्विषये सुन्दरं निरुपणम् । यथा–

"असृजद् भगवान् पक्षौ द्वावेव हि पितामहः ।

सुराणामसुराणां च धर्माधर्मौ तदाश्रयौ ॥

धर्मो हि श्रूयते पक्ष अमराणां महात्मनाम् ।

अधर्मो रक्षसां पक्षो ह्यसुराणां च राक्षस ॥

**धर्मो वै ग्रसतेऽधर्मं यदा कृतमभूद् युगम् ।**

**अधर्मो ग्रसते धर्मं यदा तिष्यः प्रवर्तते ॥[३६९]"**

## "दुश्चरित्रस्य तिरस्कारः"

मारीचः रामस्य गुणप्रभावान् निरूपयित्वा रावणं राजधर्मं बोधयन् दुश्चरित्रतायाः परिणामस्वरुपविनाशं दर्शयति । यथा–

**"त्वद्विधः कामवृत्तो हि दुःशीःलः पापमंत्रितः ।**

[३६८]. वाल्मीकिरामायणम् ६/३५/१६

[३६९]. वाल्मीकिरामायणम् ६/३५/१२–१४

**आत्मानं स्वजनं राष्ट्रं स राजा हन्ति दुर्मतिः ॥[३७०]"**

यो राजा त्वादृशो दुराचारी, स्वेच्छाचारी, पापपूर्णविचारी तथा दुर्बुद्धिः भवति, स स्वस्य तथा स्वसजनानामेव न अपितु समस्तराष्ट्रस्य विनाशं करोति ।

देवी सीताऽपि रावणस्य आनयं निन्दन्ती कथयति :

**"अकृतात्मानमासाद्य राजानमनये रतम् ।**

**समृद्धानि विनश्यन्ति राष्ट्राणि नगराणि च ॥[३७१]"**

यस्य मानसम् अपवित्रं तथा सदुपदेशैर्वञ्चितं भवति, तादृश अन्यायीराज्ञः शासने समृद्धशालीराज्यानि नगराणि च नष्टानि भवन्ति ।

## "शील–चारित्र्योः गुणगानम्"

देव्याः सीतायाः शील–चारित्रे प्रशंसन् आञ्जनेयः वानरेभ्य वर्णयति । यथा–

"सफलो राघवोद्योगः सुग्रीवस्य च सम्भ्रमः ।

शीलमासाद्य सीताया मम च प्रीणितं मनः ॥

आर्यायाः सदृशं शीलं सीतायाः प्लवगर्षभाः ।

तपसा धारयेल्लोकान् क्रुद्धा वा निर्दहेदपि ॥[३७२]"

---

[३७०]. वाल्मीकिरामायणम् ३/३८/७

[३७१]. वाल्मीकिरामायणम् ५/२१/११

[३७१]. वाल्मीकिरामायणम् ५/५९/२–३

कपिवराः ! श्रीरामस्य उद्योगः सुग्रीवस्य उत्साहश्च सफलतां प्राप्तौ । सीताया उत्तमशीलस्वभावेन (पातिव्रत्येन) अत्यन्तं सन्तुष्टोऽहम् ।

वानरशिरोमणयः ! यस्याः नार्यः शील–स्वभावः आर्यासीता समं भविष्यति, सा स्वतपसा सम्पूर्णलोकं धर्तुमर्हति वा कुपितायां सत्यां लोकत्रयं ज्वालयितुं शक्नोति ।

सर्वस्यां लङ्कायां प्रदग्धायामपि सीताया अदहनवार्तां श्रुत्वा आञ्जनेयः स्वमन्सीत्थं कथयति : –

“नहि धर्मात्मनस्तस्य भार्याममिततेजसः ।

स्वचारित्राभिगुप्तां तां स्प्रष्टुमर्हति पावकः ॥

“तपसा सत्यवाक्येन अनन्यत्वाच्च भर्तरि ।

असौ विनिर्दहेदग्निं न तामग्निः प्रधक्ष्यति ॥[३७३]”

## <u>“धर्मस्यमूलाधारे सत्यं सत्यं केवलं सत्यम्”</u>

धर्मस्य सत्यमूलकत्वं सकलश्रेयः प्रापकत्वमपि महर्षिवाल्मीकिः निर्द्वन्द्वं प्रदर्शितवान् । यथा–

**“दत्तमिष्टं हुतं चैव तप्तानि च तपांसि च ।**

<u>**वेदाः सत्यप्रतिष्ठाना**</u>स्तस्मात् <u>**सत्यपरो**</u> भवेत् ॥[३७४]”

---

[३७३]. वाल्मीकिरामायणम् (५/५६/२३–२८)

[३७४]. वाल्मीकिरामायणम् २/१०९/१४

अर्थात् दान–यज्ञ–होम–तपस्या–वेदादीनां सर्वेषाम् आधारः सत्यमेव । अतः सर्वैः सत्यपरायणो भवितव्यम् । वाल्मीकिरामायणे सत्यस्य महिमानं कृतमस्ति । कारणं धर्मस्य आधारः सत्यमेवाऽस्ति । यदि मूले सत्यं न स्यात् तर्हि को धर्मः ? उक्तञ्च कविना अयोध्याकाण्डे सत्यस्य महिमायाम् –

**"<u>सत्यमेवेश्वरो लोके</u> <u>सत्ये धर्मः सदाश्रितः</u> ।**

**<u>सत्यमूलानि सर्वाणि</u> <u>सत्यान्नास्ति परं पदम्</u> ॥**[३७५]"

लोके सत्यमेवेश्वरोऽस्ति । सदा सर्वदा सत्यस्याधारेणैव धर्मः तिष्ठति । सत्यमेव सर्वस्य मूलं वर्तते । सत्यात् परं नाऽस्ति किमपि पदम् ।

नैतावदेव अपितु उक्तं रामायणे यत् मनुष्यः सत्येन अक्षरस्थानं प्राप्नोति यथा– **"<u>सत्यवादी हि लोकेऽस्मिन् परं गच्छति चाक्षयम्</u> ।**[३७६]"

महर्षिवाल्मीकिः सर्वानपि मानवदेहधारिणः स्व–स्वधर्मेण कृत्स्नमिदं वसुधातलं स्वर्गुतुल्यं कर्तुं मनुष्यं स्वर्गस्थदेवताभ्योपि स्पृहणीयञ्च कर्तुं रामायणस्य विविधधर्माधिष्ठितपात्राणां चरित्रमाध्यमेन रामायण संहितया प्रेरितवान् । धर्मप्रतिपादकाः ग्रन्थास्तु बहवः सन्ति किन्तु समाजस्य अद्यावधि रामायणे यावच्छ्रद्धा दृश्यते नान्यत्र । श्रद्धायाः मूलं न केवलमादिकाव्यमेव अपितु तत्र आदर्शसमाजनिर्माणाय शिक्षणमस्ति । धर्मरहितः समाजो निश्चयेन विनश्यति तथा धर्मसहितः समाजः सर्वदा जयतीत्यस्य सुन्दरमुदाहरणं रामायणे एव दृश्यते ॥

[३७५]. वाल्मीकिरामायणम् २/१०९/१३
[३७६]. वाल्मीकिरामायणम् २/१०९/११

## (ख) रामायणे वर्णितधर्मसन्दर्भाः (काण्डक्रमानुसारेण)

रामायणस्य स्वरुपं, वाल्मीकेः धर्मविषयीक्यवधारणाञ्च वर्णयन् संक्षेपेण प्रत्येककाण्डस्थान् धर्मसन्दर्भान् विवृणे ।

रामायणस्य प्रत्येककाण्डस्य प्रत्येक प्रसङ्गे धर्माऽधर्मयोः शिक्षाऽस्ति। मानवसमाजस्य सुव्यस्थायै धर्मपालनमनिवार्यं भवति । यत्र जनाः स्व–स्व धर्मं न पालयन्ति, स समाजः शाश्वतं विनाशं प्राप्नोति । अत एव धर्मो विश्वस्य जगतः प्रतिष्ठादायक इति वेदोपदिष्टः । लोके जन्मप्राप्त्यनन्तरं सर्वेणाऽपि मनुष्येण विविधाः धर्माः पालनीया भवन्ति । स यस्मिन् परिवारे संजातस्तस्य परिवारस्य विषये,

यस्मिन्देशे समुत्पन्नस्तस्य विषये, येतु जना स्तस्मिन्निर्भरा स्तेषां विषये, येन शासनेन तस्य लोके सुस्थितिः कल्पिता, तस्य राज्यशासनस्य [सर्वकारस्य] विषये च, सर्वेणापि मनुष्येण, स्व–स्वधर्मः सत्यनिष्ठया पालनीयो भवति । यदि कोऽपि स्वस्य विषये नियतानां कर्तव्यानां पालनविषये छलमथवाऽलसतां करोति, तदा समाजस्याथवा परिवारस्य नोचेद्देशस्यैव तस्य कारणान्महति हानिर्भवति । अत एव सर्वेभ्यः मनुष्येभ्यः स्वपरिवारस्य, देशस्य, समाजस्य च विषये, यानि–यानि कर्माणि कर्तव्यत्वेन शास्त्रेण प्रतिपादितानि, तेषां पालनविषये, जागरुकेण, निष्ठावता च भवितव्यमिति मुक्तस्वरेण उद्घोषितमित्येव रामायणस्य सन्देशः ।

**"दानं दया सतां पूजा व्यवहारेषु चार्जवम् ।**

**एष राम परो धर्मो रक्षणात् प्रेत्य चेह च ॥**[३७७]

## (१) बालकाण्डे वर्णितधर्मसन्दर्भाः ।

बालकाण्डस्य तृतीयसर्गस्य अष्टमे श्लोके श्रीरामस्य गुणान् वर्णयन् महर्षिः लिखति –"कामार्थगुणसंयुक्तं धर्मार्थगुणविस्तरम् । समुद्रमिव रत्नाढ्यं सर्वश्रुतिमनोहरम् ॥ यथा समुद्रः सर्वरत्नानां निधिरस्ति तथैव काव्यमिदं गुणालङ्कारध्वन्यादिभिः सम्पूरितमस्ति ।

षष्ठमसर्गस्य अष्टमे श्लोके अयोध्यावासीनां चारित्र्यं वर्णयन् मुनिः भणति– "कामी वा न कदर्यो वा नृशंसः पुरुषः क्वचित् । द्रष्टुं शक्यमयोध्यायां

[३७७]. वाल्मीकिरामायणम् उत्तरकाण्डम् प्रक्षिप्तसर्ग–२/१०

नाविद्वान् न च नास्तिकः ॥ अयोध्यायाम् न कुत्रचित् कामी, कृपणः, क्रूरः, मूर्खः न च नास्तिकः दृश्यते ।

अष्टादशसर्गस्य अष्टपञ्चाशते श्लोके दशरथस्य विश्वामित्रं प्रति आज्ञाकारितां वर्णयन् वाल्मीकिः गदति–"कर्ता चाहमशेषेण दैवतं हि भवान् मम । मम चायमनुप्राप्तो महानभ्युदयो द्विजः । तवागमनजः कृत्स्नो धर्मश्चानुत्तमो द्विजः ।

त्रयस्त्रिंशसर्गस्य अष्टमे श्लोके राजाकुशनाभः कन्यायाः धैर्यं प्रशंसयन् कथयति –

**"क्षमा दानं क्षमा सत्यं क्षमा यज्ञाश्च पुत्रिकाः ।**

**क्षमा यशः क्षमा धर्मः क्षमायां विष्ठितं जगत् ॥"**

## (२) अयोध्याकाण्डे वर्णितधर्मसन्दर्भाः ।

अयोध्याकाण्डस्य द्वितीयसर्गस्य चत्वारिंशत्तमे श्लोके श्रीरामस्य राजोचित् गुणान् वर्णयन् आदिकविः भणति–"व्यसनेषु मनुष्याणां भृशं भवति दुःखितः । उत्सवेषु च सर्वेषु पितेव परितुष्यति ॥ नगरस्य जनानां दुःखे स्वयं दुःखम् अनुभवति । तथा नगरजनानाम् आनन्दे स्वयमपि सहभागी भवति ।

त्रयोदशसर्गस्य अष्टमे श्लोके राजादशरथस्य रामं प्रति स्नेहः–"अपुत्रेण मया पुत्रः श्रमेण महता महान् । रामो लब्धो महतेजाः स कथं त्यज्यते

मया ॥ अर्थात् अहं तु पूर्वं पुत्रहीन आसीत् । महता प्रयत्नेन महातेजस्वीं महापुरुषं श्रीरामं पुत्ररुपे प्राप्तवान् । तं कथम् अहं त्यजामि ।

एकोनविंशसर्गस्य चतुर्विंशतितमे श्लोके कैकेयिद्वारा वनप्रेषणाय इच्छां ज्ञात्वा रामः कैकेयिं प्रति–"न न्यूनं मयि कैकेयि किंचिदाशंससे गुणान् । यद् राजानमवोचस्त्वं ममेश्वरतरा सती ॥ हे कैकेयि ! तव मयि सम्पूणाधिकारोऽस्ति । अहं त्वदीयां प्रत्येकाज्ञां पालयितुं शक्नोमि, तथाऽपि त्वं मां अनुक्त्वा वनगमनाय पितरमुक्तवती । अनेन ज्ञायते यत् त्वं मयि न कञ्चित् गुणान् पश्यति ।

श्रीरामस्य मनसि वनगमनात् पुर्वं धर्मसम्बन्धीतभावाः–

**"धर्मो हि परमो लोके धर्मे सत्यं प्रतिष्ठितम् ।**

**धर्मसंश्रितमप्येतत् पितुर्वचनमुत्तमम् ॥"**

## (३) अरण्यकाण्डे वर्णितधर्मसन्दर्भाः ।

अरण्यकाण्डस्य दशमसर्गस्य सप्तदशे श्लोके श्रीरामाय प्रतिज्ञायाः कियत् महत्वमिति प्रतिपादयनादिकविः लिखति–"संश्रुत्य च न शक्ष्यामि जीवमानः प्रतिश्रवम् । मुनीनामन्यथा कर्तुं सत्यमिष्टं हि मे सदा ॥ मुनीनां समक्षं प्रतिज्ञां कृत्वा इदानीम् अहं प्रतिज्ञां मिथ्यां कर्तुं नाऽर्हामि, कारणं सत्यस्य पालनं मह्यं सर्वदा रोचते ।

एकोनत्रिंशे सर्गे श्रीरामस्य खरं प्रति कर्मविषयकवचनानि–“लोभात् पापानि कुर्वाणः कामाद् वायो न बुध्यते । ह्रष्टः पश्यति तस्यान्तं ब्राह्मणी करकादिव । अपरञ्च अष्टमे श्लोके–

**“अवश्यं लभते कर्ता फलं पापस्य कर्मणः ।”**

अरण्यकाण्डस्य सप्तत्रिंशसर्गे मारीचः रावणं दुष्कृत्यात् निवारयितुं रामस्य गुणान् तथा रावणस्य दोषान् प्रकटयति । यथा–“न नूनं बुध्यसे रामं महावीर्यगुणोन्नतमम् । त्वद्विधः कामवृत्तो हि दुःशीलः पापमन्त्रितः । आत्मानं स्वजनं राष्ट्रं स राजा हन्ति दुर्मतिः । रामायणस्य सर्वाधिकं लोकप्रियं पदं मारीचो वदति । यथा–

**“रामो विग्रहवान् धर्मः साधुः सत्यपराक्रमः ।**
**राजा सर्वस्य लोकस्य देवानामिव वासवः ॥”**

## (४) किष्किन्धाकाण्डे वर्णितधर्मसन्दर्भाः ।

काण्डेऽस्मिन् तृतीतसर्गस्य नवविंशतितमे श्लोके श्रीरामः हनुमतः भाषाकौशल्यं प्रशंसयन् –“नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् । बहु व्याहरतानेन न किञ्चिदपिशब्दितम् ॥ अविस्तरमसन्दिग्धमविलम्बितम् अव्यथम् । उरःस्थं कण्ठगं वाक्यं वर्तते मध्यमस्वरम् ॥ इत्यादिभिः श्लोकैः हनुमतः प्रशंसा विहिता ।

नवमसर्गस्य चत्वारिंशे श्लोके सुग्रीवः श्रीरामं प्रति–“दुःखितः सुखितो वापि सख्युर्नित्यं सखा गति ॥ मित्रं सुखे वा दुःखे सदा सहायं करोति ।

एकादशसर्गस्य सप्तपञ्चाशते श्लोके पर्यावरणं प्रति स्नेहं प्रदर्शयन् मतंगऋषेर्वचनमिदम्–“वनेऽस्मिन् मामके नित्यं पुत्रवत् परिरक्षिते ॥ इदं वनं पुत्रवत् अस्ति । अत मया वनमिदं सर्वदा रक्षितमस्ति ।

त्रयोविंशसर्गस्य द्वादशश्लोके तारायाः पतिवियोगे मार्मिकवचनानि–“पतिहीना तु या नारी कामं भवतु पुत्रिणी । धनधान्यसमृद्धापि विधवेत्युच्यते जनैः ॥ पुत्र,धनधान्यादियुक्ताऽपि नारी यदि पतिहीना अस्ति तर्हि विधवा कथ्यते ।

**“उपकारेण वीरो हि प्रतीकारेण युज्यते ।**

**अकृतज्ञोऽप्रतिकृतो हन्ति सत्त्ववतां मनः ॥”**

## (५) सुन्दरकाण्डे वर्णितधर्मसन्दर्भाः ।

सुन्दरकाण्डस्य वर्णनं वस्तुतः परमसुन्दरम् । काण्डेऽस्मिन् द्वादशसर्गस्य दशमश्लोके सीतायाः अन्वेषणावसरे हनुमान् उत्साहस्य महत्वं विचारयन्–“अनिर्वेदः श्रियो मूलमनिर्वेदः परं सुखम् । भूयस्तत्र विचेष्यामि न यत्र विचयः कृतः ॥ अर्थात् निरुत्साहो अभूत्वा उत्साहधारणमेव सम्पत्तेः मूलकारणम् अस्ति । उत्साह एव परमसुखस्य हेतुरस्ति । अतः पुनरहं तादृशस्थानेषु सीताया अन्वेषणं करिष्यामि यत्रान्वेषणं न जातम् ।

षोडशसर्गस्य षड्विंशतितमः श्लोकः नार्यः कृते पत्युः महत्वं प्रतिपादयति– “भर्ता नाम परं नार्याः शोभनं भूषणादपि । अर्थात् निश्चितमेव पतिः नार्यै आभूषणादपि परं शोभनं भवति ।

एकोनषष्टितमे सर्गे हनुमता स्त्रीणां शीलम् अभिलक्ष्य उच्यते–“आर्यायाः सदृशं शीलं सीतायाः प्लवगर्षभाः । तपसा धारयेल्लोकान् क्रुद्धा वा निर्दहेदपि ॥” अर्थात् यस्याः नार्यः शील–स्वभावः आर्या सीतासदृशः भविष्यति। सा स्वतपसा सम्पूर्णलोकान् धारयितुं शक्नोति । कुपितावस्थायां लोकत्रयं ज्वालयितुम् अर्हति ।

पञ्चपञ्चाशसर्गे हनुमान् क्रोधोपरि विजयस्य महत्त्वं सूचयति–

**“धन्याः खलु महात्मानो ये बुद्ध्या कोपमुत्थितम् ।**

**निरुन्धन्ति महात्मानो दीपतमग्निमिवाम्भसा ॥”**

## (६) युद्धकाण्डे वर्णितधर्मसन्दर्भाः ।

युद्धकाण्डस्य द्वितीयसर्गे सुग्रीवः श्रीरामं उत्साहप्रदानाय इत्थं भणति – “निरुत्साहस्य दीनस्य शोकपर्याकुलात्मनः । सर्वार्था व्यवसीदन्ति व्यसनं चाधिगच्छति ॥ यः पुरुषः उत्साहशून्यः, दीनः, मनसा शोकेन व्याकुलश्च भवति, तस्य सर्वाणि कार्याणि निरर्थकानि भवन्ति तथा च विपत्सु पतति ।

दशमसर्गे विभीषणद्वारा सीताऽपहरणानन्तरं अपशकुनादिभिः लङ्काचित्रणम्– “यदाप्रभृति वैदेही सम्प्राप्तेह परंतप । तदाप्रभृति दृश्यन्ते निमित्तान्य

शुभानि नः ॥ गवां पयांसि स्कन्नानि विमदा वरकुञ्जरा । दीनमश्वाः प्रहेषन्ते नवग्रासाभिनन्दिनः ॥

अत्र ध्यातव्यम् अस्ति यत् रावणः बलात् न केवलं वैदेह्या एव अपितु कयाऽपि नार्या सह भोगं कर्तुं न शक्तः । ब्रह्मणः शापेन स विवशः । यथा–अद्यप्रभृति यामन्यां बलान्नारीं गमिष्यसि । तदा ते शतधा मूर्धा फलिष्यति न संशयः ॥ इत्यहं तस्य शापस्य भीतः प्रसभमेव ताम् । नारोहये बलात् सीतां वैदेहीं शयने शुभे ॥ ब्रह्मणः शापानन्तरं रावणः भयं प्राप्तः ।

युद्धकाण्डस्य पञ्चत्रिंशसर्गः अतिमहत्वभूतः । अत्र माल्यवानस्य रावणं रोधयितुं परं प्रयत्नः । किन्तु स नाऽवरुद्धः ।

**"धर्मो वै ग्रसतेऽधर्मं यदा कृतमभूद् युगम् ।**

**अधर्मो ग्रसते धर्मं यदा तिष्यः प्रवर्तते ॥**

## (७) उत्तरकाण्डे वर्णितधर्मसन्दर्भाः ।

उत्तरकाण्डस्य दशमे सर्गे धर्मासक्तानां कृते जगति किमपि दुर्लभं नास्तीति कथितम्–"नहि धर्माभिरक्तानां लोके किंचन दुर्लभम् । यः धर्मेऽअनुरक्तः तस्य कृते संसारे सर्वं सरलं भवति ।

रावणः महान् बलवान् आसीत् अत्र न कस्यचित् सन्देहः । किन्तु तस्य कुकर्मात् तस्य शक्तिः ह्रासत्वमुपगता । उक्तञ्च चतुर्विंशसर्गस्य द्वाविंशे श्लोके–"यस्मादेष परक्यासु रमते राक्षसाधमः । तस्माद् वै स्त्रीकृतैनैव वधं

प्रास्यति दुर्मतिः ॥ पतिव्रताभिः साध्वीभिश्च प्रदत्तशापेन रावणस्य बलं निस्तेजं जातम् । अपरं दशाननस्य शिवभक्तिः तु जगविख्याता एव । स शिवस्य परमो भक्तः आसीत् ।

द्वात्रिंशसर्गस्य द्विचत्वारिंशे श्लोके–"यत्र यत्र च याति स्म रावणो राक्षसेश्वरः । जाम्बूनदमयं लिङ्गं तत्र तत्र स्म नीयते ॥ अयं रावणस्य सबलपक्षः यत् स यत्र यत्र गच्छति स्म तत्र तत्र सुवर्णमयं शिवलिङ्गं नयति स्म ।

पञ्चत्रिंशसर्गे वायोर्महत्त्वं प्रतिपादयन् वदति–"वायुः प्राणः सुखं वायुर्वायुः सर्वमिदं जगत् । वायुना सम्परित्यक्तं न सुखं विन्दते जगत् ॥ इदं जगत् वायुना सञ्चाल्यते । प्रक्षिप्तसर्गस्य श्लोकमिदं ध्यातव्यमावश्यकम्–

**"धारणाद् धर्ममित्याहुर्धर्मेण विधृताः प्रजाः ।**

**यस्माद् धारयते सर्वं त्रैलोक्यं सचराचरम् ॥**

## ६.२. रामायणस्य धर्मतुलना

भारतीय समाजे अद्यापि यदि आचरणाय कस्यचित उदाहरणं दीयते तर्हि रामस्य एव कारणं तस्य जीवनं मानवसमाजाय प्रेरणास्पदं वर्तते ।

वाल्मीकिरामायणं जीवन–सभ्यता–संस्कृति–धर्म–आदर्श–चारित्र्य–नीति–व्यवहार–पवित्रता–दर्शन–शासन–मानवता–विचारपद्धति–मनोवृत्ति–गार्हस्थ्य–दाम्पत्यभाव–गौरव–स्वाभिमान–कर्तव्यादीनामनुपमविचारस्रोतोऽस्ति । प्रत्युत अस्मिन् महाकाव्ये इतोऽप्यधिकमस्ति । एतदेवकारणमस्ति यत् अस्य

आदिकाव्यस्योपरि अनादिकालादेव प्राच्यभाषातत्त्वविदः, काव्यमर्मज्ञः, मनोविज्ञानशास्त्रिणः, दार्शनिकाः, वैज्ञानिकाः, कला–विशारदास्तथा योगिनः मुग्धाः सन्ति ।

वयं विद्मः यत् धर्मस्य सर्वप्रथमोल्लेखः वेदेष्वस्ति । तदनन्तरं वेदोत्तरकाले धर्मस्य विविधानि स्वरुपाणि समुपस्थितानि । तदनन्तरं स्मृतिकाले विशदतया धर्मस्य स्वरुपावबोधनमभूत् । उक्तञ्च–

**“श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।”**

अपरं यदा धर्मविषयीकि चर्चा स्यात् तदा परमप्रमाणं तु वेदा एव भवन्ति । अतः रामायणस्य तुलना परमप्रमाणेनैव सह कर्तुमिच्छामि । यथा–

**“वेदं गृहीत्वा यः कश्चिच्छास्त्रं चैवावमन्यते ।**

**स सद्यः पशुतां याति सम्भवानेकविंशतिम् ॥**

(अत्रिसंहिता–११)

## (क) “वेदरामायणयोः धर्मः”

नास्त्यत्र सन्देहो यत् “धर्म” शब्दस्य प्रथमोच्चारणं वेदातिरिक्तं स्यात्। संस्कृतसाहित्ये ‘धर्म’ शब्दस्य प्रथमप्रयोगो वेदेष्वभवदिति निर्विवादम् । सर्वप्रथमं ऋग्वेदस्य ऋचासु ‘धमर्न्’ शब्दो विशेषणत्वेन वा संज्ञारुपत्वेन षड्पञ्चाशत्(५६) वारं प्रयुक्तः । स्पष्टतः शब्दोऽयं ‘धृ’ धातुना निर्मितः, यस्य तात्पर्यमस्ति धारणं, आलम्बनं, पालनञ्च । ऋग्वेदस्य कासुचित् ऋचासु ‘धर्म’ शब्दः पुल्लिङ्गेऽपि प्रयुक्तः । यथा–

**"पितुं नु स्तोषं महो धर्माणं तविषीम् ।[३७८]"**

**"इममञ्जस्पामुभये अकृण्वत धर्माणमग्निं विदथस्य साधनम् ।[३७९]"**

**"त्वे धर्माण आसते जुहूभिः सिञ्चतीरिव ।[३८०]"**

स्थानाधिक्येषु 'धर्म' शब्दस्य प्रयोगो धार्मिकक्रियासंस्कारादिषु जातोऽस्ति । यथा–ऋग्वेदस्य १.२२.१८, ५.२६.६, ७.४३.२४, ९.६४.१ आदि स्थानेषु । ऋग्वेदस्य ऋचेयं उपर्युक्तकथनं प्रमाणयति–**"तानि धर्माणि प्रथमान्यासन्"**।[३८१] तद्वदेव **"प्रथमा धर्मा"**(ऋग्वेद,३.१७.१) तथा **"सनता धर्माणि"**(ऋग्वेद,३.३.१) इत्यनयोरर्थः क्रमशः 'प्रथमाः विधयः' तथा 'प्राचीनाः विधयः' अस्ति । कुत्रचित् अस्यार्थः प्रकटः नाऽपि भवति ।

यथा–**"आ प्रा रजांसि दिव्यानि पार्थिवा श्लोकं देवः कृणुते स्वाय धर्मणे ।**[३८२]

**"धर्मणा मित्रा वरुणा विपश्चिता व्रता रक्षेथे असुरस्य मायया ।**[३८३] तथैव **"द्यावा–पृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ।**[३८४] एवञ्च **"अचित्तो यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ।**[३८५] आदिषु 'धर्म' शब्दस्याऽर्थः 'निश्चितनियमः' (व्यवस्था वा सिद्धान्तः) अथवा 'आचरणनियमः' अस्ति । 'धर्म'

---

३७८. ऋग्वेद, (१.१८७.१)

३७९. ऋग्वेद, (१०.९२.२)

३८०. ऋग्वेद, (१०.२१.३)

३८१. ऋग्वेद, (१०.९०.१६)

३८२. ऋग्वेद, (४.५३.३)

३८३. ऋग्वेद, (५.६३.७)

३८४. ऋग्वेद, (६.७०.१)

३८५. ऋग्वेद, (७,८९,५)

शब्दस्य उपर्युक्तार्थः वाजसनेयी संहितायामपि प्राप्यते । एकस्मिन् स्थाने **"ध्रुवेण धर्मणा"** प्रयोगोऽपि मिलति ।

ऋग्वेदस्य बहवः मन्त्राः अथर्ववेदेऽपि प्राप्यन्ते ; यत्र 'धर्मन्' शब्दस्य प्रयोगः जातः । **अथर्ववेदे** 'धर्म' शब्दः **"धार्मिकक्रियासंस्कारैरर्जितगुण"** स्वरुपे प्रयुक्तोऽस्ति । यथा–

**"ऋतं सत्यं तपो राष्ट्रं श्रमो धर्मश्च कर्म च ।**

**भूतं भविष्यदुच्छिष्टे वीर्यं लक्ष्मीर्बलं बले ॥**[३८६]

**ऐतरेयब्राह्मणग्रन्थे** 'धर्म' शब्दः सकलधार्मिककर्तव्यार्थे प्रयुक्तः। **छान्दोग्योपनिषदि** धर्मस्यैकः महत्त्वपूर्णार्थः प्राप्यते, तदनुसारं धर्मस्य तिस्रः शाखाः सन्ति । यथा–**"त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एवेति द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन् । सर्वे एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति** । (१) यज्ञ–अध्ययन–दान–गृहस्थधर्मः (२) तापसधर्मः (३) ब्रह्मचारित्वम् अर्थात् आचार्यस्य गृहे अन्तपर्यन्तं वासः । अत्र 'धर्म' शब्दः आश्रमाणां विलक्षणकर्तव्यानि सूचयति । इत्थं वक्तुं शक्यते यत् "धर्म"स्य स्वरुपं समयान्तरे परिवर्तनचक्रे परिवर्तितम् । किन्त्वन्तेऽयं "धर्म' मनुष्याणां विशेषाधिकाराणां, कर्तव्याणां, बन्धनानां, आर्यजात्याचार विधि–परिचायकस्य, वर्णाश्रमस्य च द्योतको जातः । **तैतिरीयोपनिषदि** छात्राणाङ्कृते यो "धर्म" शब्दः प्रयुक्तः स अस्मिनेवार्थेऽस्ति यथा–**"सत्यं वद" "धर्मं चर"**

[३८६]. अथर्ववेद, (९.९.१७)

इत्यादिः। **श्रीमद्भगवद्गीता**यामपि "**स्वधर्मे निधनं श्रेयः**" इत्यस्मिन् वाक्येऽपि 'धर्म' शब्दस्य अयमेवाऽर्थः ।

वैदिकऋषिभिः जीवितानां साध्यत्वेन चत्वारः पुरुषार्थारुपदिष्टाः, ते यथा धर्माऽर्थकाममोक्षरुपाः । मोक्षः परमपुरुषार्थः प्रतिपादितः, नतु साध्योऽपितु सिद्धः । शिष्टास्त्रयः साध्याः पुरुषार्थाः । तत्त्वदर्शिनः ऋषयः धर्मसहितार्थकामौ भोग्यत्वेनैव निर्दिष्टवन्तौ । अर्थकामौ केवलौ पतनस्य कारणत्वात् न अनुमतौ, कारणम् अर्थकामयोः सेवनेन मनुष्यः शीलचारित्राभ्यां हीनः सन् मनुष्यत्वं परित्यज्य पशुत्वम् उपगच्छति ।

**वैदिकसंहितासु सत्यधर्मौ संस्कृत्या आधारस्थम्भत्वेन अनुमतौ । अतः सर्वत्र वैदिकवाङ्मये सत्यधर्मयोः महती प्रशंसा कृता वर्तते । सत्य–धर्मावुभावप्यन्योऽन्याश्रितौ स्तः। यः सत्यं वक्ति स एव धर्मं पालयितुं शक्नोति । यो धार्मिकः स एव सत्यपालनं करोतीत्यर्थः** । वेदेष्वस्योदाहरणानि यथा–

१. "**सुविज्ञानं चिकितुषे जनाय सच्चाऽसच्च पस्पृधाते ।**'(ऋग्वेद, ७/१०४/१२)

( मन्त्रेऽस्मिन् महर्षिणा सत्याऽसत्यवचनयोः या पतिस्पर्धाऽस्ति, तस्या निर्देशेन समं सत्यवचनम् ऋजु भवतीत्युक्त्वा सत्यभाषणं सोमोऽववतीत्यसत्यवचनं हिनस्तीति चादिशत् )

२. "**युवा देवास्त्रय एकादश सत्याः सत्यस्य ददृशे पुरस्तात् ।**'(ऋग्वेद, ८/५७/२)

( सूक्तेऽस्मिनिदमुक्तं यत् त्रयस्त्रिंशद्देवाः सत्यस्वरुपाः, यतस्तेऽक्ष्णोः पुरतः सत्यं ददृशिरे । अतस्तदन्तर्गतौ अश्विनावपि सत्यौ स्तः)

३. **"सत्यं इद् वा उ तं वयमिन्द्रं स्तवाम, नाऽनृतम् ।'** (ऋग्वेद, ८/६२/१२)

( वयम् इन्द्रं यत् स्तुमस्तत् सत्यं, नाऽनृतम् )

४. **"ऋतं शंसन्त ऋजु दीध्याना दिवस्पुत्रासो असुरस्य वीराः ।**

**विप्रं पदमंगिरसो दधाना यज्ञस्य धाम प्रथमं मनंत ॥'** (ऋग्वेद, १०/६७/२)

५. **"अग्ने व्रतपते व्रतं चरिष्यामि । तच्छकेयं तन्मे राद्ध्यताम् ।**

**इद महमनृतात्सत्यमुपैमि ।** (अत्र **'व्रत'** शब्दा वैदिककर्मणः द्योतकः। **धर्म–कर्म** शब्दौ अस्य पर्यायौ स्तः ।)

(ऋतस्य सत्यस्य पालका एव ऋतं तरन्ति, नतु अनृतस्य । अनृतस्य वक्तारोऽन्धाः वा बधिराः भवन्ति । यथा–

**"अपानक्षासो बधिरा अहासत, ऋतस्य पन्थानं न तरन्ति दुष्कृतः।"**(ऋग्वेद,९/७३/६)

**अथर्ववेद** इदमुद्घोषयति यत् पृथ्वीमिमां बृहत् सत्य– ऋत– उग्रतप– यज्ञ– ब्रह्मादयः (वेद) धारयन्तीति । यथा–**"सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथ्वीं धारयन्ति ॥'** (अथर्ववेद, १२/१/१)

**शतपथब्राह्मण**मतानुसारं सत्यवदनेन दिव्यत्वप्राप्तिर्भवति, तथाऽनृतवदनेन मर्त्यत्वप्राप्तिर्भवति । अपरं च जगति मनुष्याः सत्यमेव विश्वसंति । तत्त्वसाक्षात्कारसमर्थं चक्षुः सत्यमेव । यथा–**"द्वयं वा इदं न तृतीयमस्ति । सत्यञ्चैवाऽनृतञ्च । सत्यमेव देवा अनृतं मनुष्याः । 'इदमहमनृतात् सत्यमुपैमि' तन्मनुष्येभ्यो देवानुपैति ॥** (शतपथब्राह्मणम्,१/१/३–४) अयमपि मन्त्रः परमर्थवान्, यथा–

**" सत्यं वै चक्षुः । तस्माद् यदिदानीं द्वौ विवदमानौ एयाताम्, अहमदर्शमहमश्रौषमिति । य एवं ब्रूयात् अहमदर्शमिति तस्मा एव श्रद्दध्यात् । तदेवैतत्समर्थयति ।"**

**तैतिरीयोपनिषदि** गुरुकुलात्समावर्तमानं विद्याव्रतस्नातकं भगवान् वेद अनुशास्ति :-**"सत्यं वद । धर्मं चर ॥"** इति । **"सत्यान्न प्रमदितव्यम् ।"**; **"धर्मान्न प्रमदितव्यम् ।"** इति च । (तैतिरीयोपनिषद,प्र.प्र) **"सत्यं परं परं सत्यं सत्येन न सुवर्गाल्लोकच्च्यवन्ते कदाचन सताहि सत्यं तस्मात्सत्ये रमन्ते ॥"** (तै.उ.)

वैदिकवाङ्मये धर्मस्तु संसारस्य प्रतिष्ठारुपको द्योतितः । यथा-**"धर्मो विश्वस्य जगतः प्रतिष्ठा । लोके धर्मिष्ठं प्रजा उपसर्पन्ति । धर्मेण पापमनुदति । धर्मे सर्वं प्रतिष्ठितम् । तस्माद्धर्मं परमं वदन्ति ।"** (तै.उ.)

अनेनेदं स्पष्टं भवति यत् वेदानां संस्कृतिः सत्य-धर्माश्रिताऽसीत् । किं बहूना, सृष्ट्युत्पत्तिक्रमे ब्रह्म चतुरो वर्णान् सृष्ट्वाऽपि विभूतियुक्तं कर्म कर्तुं न प्राभवत् । अतः श्रेयस्करं धर्मम् असृजत् । धर्मोऽयं क्षत्रियस्याऽपि नियन्ता । तस्मात् धर्मात् परं एतस्मिन् सृष्टौ किञ्चिदपि न विद्यते । लोके 'सत्यमेव धर्मः' इति कथ्यते । अत एव सत्यं वदन्तं नरं जना धार्मिकं वदन्ति । तद्वदेव धर्मं कुर्वन्तं दृष्ट्वा सत्यमाचरतीति मन्यन्ते । यतो हि सत्य-धर्मौ द्वावपि धर्मरुपौ, तयोर्न भेदः।

इदानीं **रामायणस्य** धर्मसम्बन्धिदृष्टिं पश्यामः । **<u>वाल्मीकिरामायणेऽपि सत्य-धर्मयोः महती चर्चाऽस्ति</u>** । **अयोध्याकाण्डे** नवाधिकैकशततमे सर्गे सत्यमभिलक्ष्य प्रोक्तम्महर्षिणा-

**“सत्यमेवेश्वरो लोके सत्ये धर्मस्सदाश्रितः ।**

**सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् ॥**

**ऋषयश्चैव देवाश्च सत्यमेव हि मेनिरे ।**

**सत्यवादी च लोकेऽस्मिन् परं गच्छतिचाक्षयम् ॥[३८७]”**

इदमनेन स्पष्टं भवति यत् वेदोक्तो धर्मो यो दान–याग–होम–तपादिरुपः स सत्यपालनेन सार्थको भवति । वेदस्य धर्मे यद् अखण्डितं प्रामाण्यं तदपि सत्यमूलकमेव । सृष्टि–स्थिति–लयकारक ईश्वरोऽपि सत्यस्वरुप एव । धर्मोऽपि सदा सत्याऽश्रितो भवति । असत्यमूलको धर्माभास एव, न तु धर्मः । धर्मस्याधारभूतत्वेन ईश्वररुपत्वेन च सत्यस्याऽयं महिमा वेदप्रतिपादितः । सत्यस्य विषये न मतभेदो दृश्यते । ऋषय एव न, अपितु स्वर्गाधिष्ठिताः देवा अपि सत्यस्य महिमानं निर्द्वन्द्वं स्वीकृतवन्तः । सत्यस्य सत्यमूलकधर्मस्य सेवनेन मनुष्यो यदक्षरं परतत्त्वं प्राप्नोति तेन सह सायुज्यं यातीति वैदिकमतम् ।

सत्यस्य व्रतमिदं न केवलं व्यक्तिगतजीवने एवाऽपितु सामाजिके पारिवारिके च जीवने राजनीत्यामापि परिपाल्यं भवति । एतस्य सुन्दरमुदाहरणं मिलति **अयोध्याकाण्डस्य** अष्टाधिकैकशततमसर्गे । तत्र भगवान् श्रीरामो भणति यथा–

**“सत्यमेवानृशंसंच राजवृत्तं सनातन ।**

**तस्मात्सत्यात्मकं राज्यं सत्ये लोकः प्रतिष्ठितः ॥[३८८]”**

श्रीरामः राज्यशासने सत्यस्य उपेक्षया जायमानम् अनर्थमपि निर्दिशन् वदति–

[३८७]. वाल्मीकिरामायणम् सर्ग–१०९

[३८८]. वाल्मीकिरामायणम् २/१०८/१०

**“कामवृत्तोन्वयं लोकः कृत्स्नस्समुपवर्तते ।**

**यद्वृतास्सन्ति राजानस्तद्वृत्तास्सन्ति हि प्रजाः ॥[३८९]”**

श्रुतयः मानवजीवनस्य परमं प्रयोजनं सत्योपलब्धिरेव निर्दिशन्ति । ज्ञान–विज्ञानयोः मुख्यं प्रयोजनमपि सत्योपलब्धिरेवाऽस्ति ।

सृष्ट्यारम्भात् समस्तविश्वेस्मिन् सत्योपलब्ध्यर्थमेव मानवोऽन्विष्यन्नुपगतः । न केवलम् आध्यात्मिकशास्त्राणामेवाऽयं प्रयत्नः, किन्तु भौतिकशास्त्राणामपि । इदं सत्यव्रतं मानवस्त्रिकरणैर्यदा पालयितुं शक्नोति तदा अस्मिल्लोके परलोके च कृतकृत्यो भवति । सत्यस्य पालनेन धर्माचरणेन च जगति सुख–शान्ती प्रतिष्ठिते भवतः । सत्य–धर्मयोः पालनेन मनुष्यस्स्वं चित्तं निर्मलं कर्तुं शक्नोति । अत एव रामायणे **युद्धकाण्डस्य** षड्चत्वारिंशत् तमे सर्गे स्पष्टम् उद्घोषितं यत्–

**“सत्यधर्माभिरक्तानां नास्ति मृत्युकृतं भयम् ॥[३९०]”**

(यः सत्य–धर्मयोः पालनं करोति स मृत्युकृतं भयम् अपरारयितुं शक्नोति ।)

समाजस्य सुव्यस्थायै धर्मपालनमनिवार्यम् । यत्र जनाः स्व–स्व धर्मं न पालयन्ति, स समाजः निश्चितं विनाशं प्रतिगच्छति । अत एव धर्मो विश्वस्य जगतः प्रतिष्ठादायक इति वेदोपदिष्टम् । लोके जन्मप्राप्त्यनन्तरं सर्वेणाऽपि मनुष्येण विविधाः धर्माः पालनीया भवन्ति । स यस्मिन् परिवारे संजातस्तस्य परिवारस्य विषये, यस्मिन्देशे समुत्पन्नस्तस्य विषये, येतु जना स्तस्मिन्निर्भरा स्तेषां विषये, येन

[३८९]. वाल्मीकिरामायणम् २/१०८/९

[३९०]. वाल्मीकिरामायणम् ६/४६/३४

शासनेन तस्य लोके सुस्थितिः कल्पिता, तस्य राज्यशासनस्य [सर्वकारस्य] विषये च, सर्वेणापि मनुष्येण, स्व–स्वधर्मः सत्यनिष्ठया पालनीयो भवति । यदि काऽपि स्वस्य विषये नियतानां कर्तव्यानां पालनविषये छलमथवाऽलसतां करोति, तदा समाजस्याथवा परिवारस्य नोचेद्देशस्यैव तस्य कारणान्महति हानिर्भवति । अत एव रामेण सर्वेणापि मनुष्येण स्वपरिवारस्य, देशस्य, समाजस्य च विषये, यानि–यानि कर्माणि कर्तव्यत्वेन शास्त्रेण प्रतिपादितानि, तेषां पालनविषये, जागरुकेण, निष्ठावता च भवितव्यमिति मुक्तस्वरेण उद्घोषितम् । इत्थं वेदरामायणयो धर्मविषये न कश्चन भेदः, किन्तु वेदोपदिष्टधर्ममेव साधारणजनानाम् अवबोधनाय महर्षिणा वाल्मीकिरामायणद्वारा चरित्रमाध्यमेन प्रस्तुतः ॥

## (ख) "स्मृतिरामायणयोः धर्मः"

स्मृतयः नाम धर्मसंहिता । स्मृतिशब्दस्यार्थो वेदस्य स्मरणं चिन्तनञ्चास्ति, यथा "स्मरन्ति वेदमनया स्मृतिः । अपरं वेदवाङ्मयात् पृथक् ग्रन्थाः यथा पाणिनि–श्रौत–गृह्य–धर्मसूत्र–मन्वादिभिरन्यग्रन्थैः सह सम्बन्धोऽस्ति, किन्तु संकिणार्थदृष्ट्या स्मृतिधर्मशास्त्रयोरर्थ समानमेव । उक्तञ्च मनुस्मृत्यां –"श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः ।[३११]"

वशिष्ठस्मृत्यनुसारं स्मृतयः धर्मस्य उपादानत्वेन स्वीकृताः । स्मृतीनाम्(धर्म) अभावे शिष्टजनानाम् आचरणमेव प्रमाणभूतं मन्तव्यम् । यथा–"**श्रुतिस्मृतिविहितो धर्मः तदलाभे शिष्टाचारः प्रमाणम्।**[३१२]" इमे स्मृतय एव कस्मिंश्चित्काले

[३११]. मनुस्मृतिः २/१०

[३१२]. वशिष्ठस्मृतिः १/३–४

धर्मशास्त्रत्वेन स्थिताः स्युः , दक्षस्मृत्यां स्पष्टमुल्लिखितमस्ति यत् दक्षप्रजापतिना ब्रह्मचारी, गृहस्थ, वानप्रस्थ, तथा च सन्यासाश्रमाणाङ्कृते धर्मशास्त्रं लिखितम् ।

अस्त्वयमेव निष्कर्षः यत् स्मृतीनामपराभिधानम् धर्मशास्त्रमेव । इमे सर्वदा धर्मविषयकं मार्गदर्शनं कुर्वन्ति । नास्त्यत्र कश्चन विशेषभेदः स्मृतिरामायणयोः। वस्तुतः श्रुतिप्रतिपादितधर्मस्य स्मृतिसु विस्तारो वर्तते । स्मृतिसु यत् धर्मप्रतिपादनमस्ति तदुपदेशात्मकं वर्तते किन्तु रामायणे धर्मोपदेशापेक्षया धर्माचरणं प्रतिपादितमस्ति । इदानीं "स्मृतिरामायणयोः धर्म" इत्यस्मिन् विषये प्रथमन्तु स्मृतीनां प्रतिपाद्यविषयान् पश्यामः ।

## "याज्ञवल्क्यस्मृतिरामायणयोः धर्मतुलना"

स्मृतिरियं मुख्यतया आचार–व्यवहार–प्रायश्चित्तेषु विभक्ता । महर्षियाज्ञवल्क्यः आरम्भे एव लिलेख यत् आत्मदर्शनं, सर्वत्राऽत्मबुद्धिः वा भगवद् बुद्धिरेव परमो धर्मः एवं धर्मसाधनरुपेण योगज्ञानं प्रधानम् । यथा–

**'अयं तु परमो धर्मो यद्योगेनात्मदर्शनम् ।[३१३]'**

**वाल्मीकिरामायणेऽपि** योगः नाम इन्द्रियनिग्रहमभिलक्ष्य एतदेवोक्तं **अयोध्याकाण्डस्य नवदशसर्गस्य** पञ्चत्रिंशात्मके श्लोके –

**"इन्द्रियाणि निगृह्य च ।[३१४]"**

मानवानुद्दिश्य याज्ञवल्क्यस्मृत्याम् धर्मस्य बहुसुन्दरं लक्षणं प्रदर्शितमस्ति –

**"अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।**

---

[३१३]. याज्ञवल्क्यस्मृतिः/आचा०/८

[३१४]. वाल्मीकिरामायणम् २/१९/३५

**दानं दमो दयाक्षान्तिः सर्वेषां धर्मसाधनम् ॥[३१५]"**

अर्थात् मनसा–वाचा–कर्मणा च सर्वपरकारेण हिंसाराहित्यं, यथार्थभाषणम्, अचौर्यम्, पावित्र्यम्, इन्द्रियनिग्रहः, दानम्, दमः, सर्वभूतेषु दया, सर्वथाक्रोधत्यागश्च सर्वेभ्यो धर्मसाधनम् अस्ति । महर्षियाज्ञवल्क्येनोपदिष्टं यत् सदा धर्माचरणं करणीयं, अधर्ममार्गं परिहर्तव्यं, लोकविरुद्धं च न व्यवहर्तव्यमिति ।

अत्र **वाल्मीकिरामायणे अयोध्याकाण्डे** महर्षिणा पातकानि कर्माणि उद्दिश्य उक्तं यत्–

**"कायेन कुरुते पापं मनसा सम्प्रधार्य तत् ।**

**अनृतं जिह्वया चाह त्रिविधं कर्मपातकम् ॥[३१६]"**

**रामायणस्य** स्पष्टमतमस्ति यत् कर्मत्रयम् पातकम् भवति तत्र प्रथमं मनसि पापस्य अवधारणम्, द्वितीयं वाण्या अनृतसम्भाषणम् तथा च तृतीयं शरीरमाध्यमेन तत् पापस्य कार्यरुपे परिणतिः । अत एव याज्ञवल्क्यस्मृत्यामप्युक्तं यत्–

**"कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत् ।**

**अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु ॥[३१७]"**

याज्ञवल्क्यस्मृत्यां **राजधर्मप्रकरणे** राजासम्बन्धिकर्तव्यानि प्रोक्तानि तथा राज्यसंचालनाय दण्डविधानं सूचितम् । ब्राह्मणानां सम्मानं तथा च प्रजारक्षणं राज्ञः मुख्यकर्तव्यं प्रकीर्तितम् । यथा–

---

[३१५]. याज्ञवल्क्यस्मृतिः/आचा०/१२२

[३१६]. वाल्मीकिरामायणम् २/१०९/२१

[३१७]. याज्ञवल्क्यस्मृतिः/आचा०/१५६

**"नातः परतरो धर्मो नृपाणां यद्रणार्जितम् ।**

**विप्रेभ्यो दीयते द्रव्यं प्रजाभ्यश्चाभयं सदा ॥[398]"**

भगवान् श्रीरामः ब्राह्मणानां प्रजायाश्च हितैषी आसीत् इत्यस्य सुन्दरमुदाहरणम् **अयोध्याकाण्डस्य षट्चत्वारिंशतमे** सर्गेऽस्ति यदा श्रीरामो वनं गच्छति तस्मिन काले प्रजायाः रामं प्रति श्रद्धायाः करुणचित्रं महर्षिणा प्रदर्शितमस्ति; तथा श्रीरामस्य अयोध्यावासीनां प्रति स्नेहम् अपि वाल्मीकिना चित्रितम् । यथा–

**"द्विजातीन् हि पदातींस्तान् रामश्चारित्रवत्सलः ।**

**न शशाक धृणाचक्षुः परिमोक्तुं रथेन सः ॥[399]"**

भगवतः श्रीरामस्य चारित्र्ये वात्सल्यगुणानां प्रधानता एव आसीत् यत् ते रथमारुह्य सहगम्यमानान् ब्राह्मणान् पृष्ठे त्यक्तुं न शक्त अतः प्रलपतो द्विजान् अवेक्ष्य सहसा रामो रथाद् अवततार अतः । अर्थात् याज्ञवल्क्यस्मृत्यां यद् राज्ञः दायित्वमुद्घोषितं तत् सर्वं श्रीरामे सुसंगतं भवति ।

**"ब्राह्मणेषु क्षमी स्निग्धेष्वजिह्मः क्रोधनोऽरिषु ।**

**स्याद्राजा भृत्यवर्गेषु प्रजासु च यथा पिता ॥[400]**

---

[398]. याज्ञवल्क्यस्मृतिः/आचा०/३२३

[399]. वाल्मीकिरामायणम् २/४६/१९

[400]. याज्ञवल्क्यस्मृतिः/आचा०/३३८

राज्ञा अतिसावधानतया स्वं प्रजासेवकं मत्वा धर्ममर्यादापूर्वकं राज्यसञ्चालनं विधातव्यम् ।

याज्ञवल्क्यस्मृतेः व्यवहाराध्याये हिन्दुधर्मशास्त्राणां नियमाः विस्तरेण वर्णिताः । यथा न्यायालादीनां व्यवस्था, दण्डविधानं, राज्ये शान्तिस्थापनं, साक्षीणां प्रकाराः, ऋण–आदान–प्रदानस्य प्रक्रिया, क्रय–विक्रयनियमाः एवं चौर्यादीनां कर्मणां दण्डविधिश्च वर्णिताः ।

**अयोध्याकाण्डे** राज्ञे प्रजायाः रक्षणं धर्मेण कर्तव्यमिति सूचितम् । यथा–

**"रक्ष्या हि राजा धर्मेण सर्वे विषयवासिनः ।[४०१]"**

याज्ञवल्क्येन मानवदेहस्य नश्वरतां प्रदर्श्य उक्तं यत् देहोऽयं जलतरङ्गवत् क्षणभङ्गुरः । नास्य विश्वासो कर्तव्यः । अतः संसारस्य केष्वपि पदार्थेषु वस्तुषु वा प्राणिषु स्थिरतायाः वा स्थायित्वस्य भावः मूर्खतेति । इदं पञ्चभौतिकं शरीरं निश्चितं पञ्चतत्त्वेषु विलीयते एव । मृत्युस्तु अबाधसत्यमेव । अतः तस्य शोकः नैव कर्तव्यः, अपितु मृतस्य उद्धारार्थं यथाशक्यं तर्पणं, पिण्डदानम् एवं श्राद्धादिधर्मक्रियानामाचरणं सम्पादनीयम् ।

**"अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः ।[४०२]"**

एतदेवाभिलक्ष्य **रामायणे** वाल्मीकिना मृत्युविषये कथितम् । यथा–

**"तमापन्नः कथं शोचेद् यस्य नास्ति व्यतिक्रमः ।[४०३]**

---

[४०१]. वाल्मीकिरामायणम् २/१००/४८

[४०२]. याज्ञवल्क्यस्मृतिः/प्राय०/ ११

[४०३]. वाल्मीकिरामायणम् २/१०५/३०

महर्षियाज्ञवल्क्येन स्वस्मृतौ स्थाने स्थाने यज्ञदान–स्वाध्याय–सदाचार–अहिंसादीनां सर्वधर्माणां च प्रशंशा कृता । तदनुकूलमाचरणमनुमोदितम् । प्रारम्भे एव महर्षिणा योगसाधनया परमात्मसाक्षात्कारः प्रधानो धर्मः प्रकिर्तितः । यथा–

**"ध्यानयोगेन सम्पश्येत् सूक्ष्म आत्मात्मनि स्थितः ।**[४०४]

योगसाधनया परमतत्त्वं संप्राप्य जीवेन क्रमशः जीवन्मुक्तिः, विदेहमुक्तिः, कैवल्यञ्च प्राप्यते । इत्यलमतिविस्तरेण ।

## "पराशरस्मृतिरामायणयोः धर्मतुलना"

पराशरस्मृतेः रचयिता महर्षिपराशरोऽस्ति । महर्षिपराशरः धर्माचरणमेव परमकलयाणकरं मन्यते स्म । यथा–

**"धर्म एव कृतः श्रेयानिहलोके परत्र च ।**

**तस्माद्धि परमं नास्ति यथा प्राहुर्मनीषिणः ॥**[४०५]

इत्थं धर्माचरणमेव परमकर्तव्यमनुमतम् । धर्ममार्गेण उपार्जितं द्रव्यं हितकरम् एवम् अधर्मोपार्जितं द्रव्यं धिक्कारयुक्तमुपलक्षितम् । अस्मिन् संसारे धनेच्छायै शाश्वतधर्मस्य त्यागो नैव कर्तव्यः । एतदेव रामायणस्य किष्किन्धाकाण्डस्य नवमे सर्गेऽप्युक्तं वाल्मीकिना । यथा–

**"धर्मादर्थः प्रभवति धर्मात्प्रभवते सुखम् ।**

**धर्मेण लभते सर्वं धर्मसारमिदं जगत् ॥**[४०६]

---

४०४. याज्ञवल्क्यस्मृतिः/प्राय०/६४

४०५. महा०शान्ति०२९०/६

४०६. वाल्मीकिरामायणम् ३/९/३०

महर्षिपराशरविरचितपराशरस्मृतिः सर्वस्मृतिसु विशिष्टं स्थानं विदधाति । महर्षिपराशरः युगद्रष्टा महात्माऽसीत् । स्मृत्यामस्यां चतुर्णां युगानां धर्मव्यवस्था विशेषरूपेण वर्णिता । तत्र सविशेषं कलिधर्माणां वर्णनमस्ति । शक्तेः वृद्धिर्वा हानिः युगानुसारं भवति । अतः चतुर्षु युगेषु मनुष्याणां धर्माचरणविधयः विविधाः आसन् । यथा– सत्ययुगे जनाः विशेषशक्तियुताः आसन्, अतस्तस्मिन् काले तपः एव धर्मः आसीत् । त्रेतायुगे ज्ञानधर्मयोः प्रामुख्यं, द्वापरयुगे यज्ञ–यागादीनामनुष्ठानं धर्मः एवं कलियुगे दानमेव धर्मः मतः । यथा–

**"तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।**

**द्वापरे यज्ञमित्युचुर्दानमेकं कलौ युगे ॥[४०७]"**

सर्वेषु युगेषु विविधाः धर्मचिन्तकाः विख्याताः सञ्जाताः । तेषु कलियुगे – महर्षिपराशरः धर्मविषये प्रख्यातः आसीत् ।

महर्षिपराशरस्य स्पष्टमभिमतं यत् आचार–विचाराणां पालनमेव प्रधानो धर्मः। व्यवहारे धर्मपालनमावश्यकं, केवलं वाचिकं धर्मकथनं निष्फलमिति । यथा–

**"चतुर्णामपि वर्णानामाचारो धर्मपालकः ।**

**आचारभ्रष्टदेहानां भवेद्धर्मः पराङ्मुखः ॥[४०८]"**

एतदेव वाल्मीकिना **रामायणे अयोध्याकाकाण्डे** निगदितम् । यथा –

**"निर्मर्यादस्तु पुरूषः पापाचारसमन्वितः ।**

**मानं न लभते सत्सु भिन्नचारित्रदर्शनः ॥[४०९]"**

---

[४०७]. पराशरस्मृतिः १/१३

[४०८]. पराशरस्मृतिः १/३७

[४०९]. वाल्मीकिरामायणम् २/१०९/३

रामायणस्य स्पष्टमतमस्ति यत् यो जनः मर्यादारहितमाचरणं करोति वा पापयुक्तमाचरणं करोति, स कदापि समाजे मानं न प्राप्नोति । कारणं तस्य भिन्नचारित्र्यं दृश्यते । सभ्यसमाजः सर्वदा सुचारित्र्यमेव स्वीकरोति । अत्र पराशरस्य या धर्मविषयिकी अवधारणा अस्ति, सा रामायणे वाल्मीकिनाऽपि प्रतिपादितैव । अतः नाऽनयोर्कश्चन भेदः ।

## "दक्षस्मृतिरामायणयोः धर्मः"

प्राचिनस्मृतिसु दक्षस्मृतिः अतिमहत्त्वशीला । अस्याः रचयिता प्रजापतिदक्षोऽस्ति । दक्षः ब्रह्मणः मानसपुत्रोऽस्ति । प्रजापतिः उपदिशति– गृहस्थाश्रमः अन्यत्रयाणाम् आश्रमाणां जनयिताऽस्ति । अतः आश्रमोऽयं अन्याऽश्रमाणामाधारः आश्रयश्च । तदर्थमेव गृहस्थो जनः **"ज्येष्ठाश्रमी"** कथ्यते । गृहस्थाश्रमे यज्ञ–दान–अतिथिसेवादिभिः सर्वजीवानां यापनं भवति ।

इत्थमेव **रामायणेऽपि अयोध्याकाण्डस्य** षडाधिकशततमे सर्गे गृहस्थाश्रमस्य महती प्रशंसा कृता वर्तते । यथा–

**"चतुर्णामाश्रमाणां हि गार्हस्थ्यं श्रेष्ठमुत्तमम् ।**

**आहुर्धर्मज्ञ धर्मज्ञास्तं कथं त्यक्तुमर्हसि ॥[४१०]"**

महर्षिवाल्मीकिः कथयति यत् चतुर्षु आश्रमेषु गृहस्थाश्रमः श्रेष्ठः । तेनैव अन्याश्रमाणां प्रादुर्भावः भवितुमर्हति ।

---

[४१०]. वाल्मीकिरामायणम् २/१०९/२२

प्रजापतिः स्वस्मृत्यां 'नव–नवक' प्रकरणे गृहस्थैः आचरणीयानि नवकर्तव्यानि उल्लिखितवान् । गृहस्थेभ्यः अतिथिसेवा प्रधानो धर्मः । अतः सर्वप्रथमं प्रजापतिः अतिथिसेवा प्रधानेति मत्वा तद्विषये नवोपदेशानुपदिशति । तद्वदेव नवेतराणि कर्तव्यान्यपि बोधितानि । तद्यथा–

## "नवेतराणि कर्तव्यानि"-

(१) अभ्यागतेभ्यः स्थानम् (२) जलप्रदानम् (३) आसनम् (४) पादशुद्धिकरणम् (५) अभ्यङ्गदानम् (६) आश्रयदानम् (७) शय्या (८) यथायोग्यं सुभोज्यभोजनम् (९) जलमृतिका च ।

एतत्सर्वं सधार्मिकव्यवहारकौशल्यमस्ति । किन्तु रामायणकालिना जनास्तु व्यवहारकुशला आसन् एव; तस्य सुन्दरम् चित्रणं प्राप्यते **बालकाण्डस्य** सप्तमे सर्गे । तत्र महर्षिणा लिखितं यत् –

**"कुशला व्यवहारेषु"**(वा०रा०१/७/१०)

गृहस्थैः प्रतिदिनं प्रातःस्नानं करणीयं, यतो हि नवद्वारयुतमिदं शरीरमतीव मलिनम् । नवद्वारैः नित्यं मालिन्यं जायते, अतः स्नानेनैव पुनः शुद्धिः भवितुमर्हति।

स्नानरहितेन अपावित्र्यशरीरेण जप–होम–अनुष्ठानानि नैव कर्तव्यानीति ।

त्रिकालसन्ध्यावन्दनं गायत्री–जपश्च आवश्यकं कर्म । प्रतिदिनसन्ध्यासेवी पवित्रो भवति । असान्ध्यः धर्माधिकारी न गण्यते । असान्ध्यानां सर्वाणि कर्माणि निष्फलानि भवन्ति । त्रैकालिकसन्ध्यावन्दनं धर्माचरणस्य मुख्यमुपादानमस्ति ।

यथा–

**“सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।**

**यदन्यत् कुरुते कर्म न तस्य फलमश्नुते ॥[४११]”**

सन्ध्यावन्दनस्य महत्त्वं **रामायणकालेऽपि** आसीत् । इत्यस्य उदाहरणानि अनेकेषु स्थानेषु मिलन्ति । यथा **बालकाण्डे** नवविंशतितमे सर्गे उल्लिखितम् यत्–

**“प्रभातकाले चोत्थाय पूर्वां सन्ध्यामुपास्य च ।[४१२]”**

अपरमुदाहरणं प्राप्यते **अयोध्याकाण्डे**, यत्र महर्षिणा प्रोक्तम् यत्–

**“पूर्वां सन्ध्यामुपासीनो जजाप सुसमाहितः।[४१३]**

**(पोष्यवर्गस्य भरण–पोषणं गृहस्थानां प्रधानो धर्मः–)**

प्रजापतिना आश्रितधर्मो विशेषेण वर्णितः । गृहस्थानां कृते आश्रितजनानां (स्वकुटुम्बीनां, सेवकानाञ्च) भरण–पोषणमर्थात् तेषां जीवननिर्वाहप्रबन्धनं प्रमुखधर्मः । तेन ऐहलौकिकं पारलौकिकं च सुखं प्राप्यते । पोष्यवर्गस्य उपेक्षा कादापि नैव कर्तव्या । तेषां पीडनं सदा अधर्मः । यथा–

**“भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम् ।**

**नरकं पीडने चास्य तस्माद्यत्नेन तम् भरेत् ॥[४१४]”**

---

[४११]. दक्षस्मृतिः २/१३–२०

[४१२]. वाल्मीकिरामायणम् १/२९/३१

[४१३]. वाल्मीकिरामायणम् २/६६/

किञ्च दक्षप्रजापतिना गार्हस्थ्यधर्मो सविशेषः प्रतिपादितः । स्मृत्यामस्यां अतिथिसेवा, दानं , नित्यनैमितिककर्म, पोष्यवर्गस्य निर्वाहप्रबन्धनादिविषयाः उट्टङ्किताः ।

**श्री**रामकाले तु तत्रत्या प्रजा गृहस्थधर्मस्य सम्यक्पालनम् कुर्वन्ती आसीत् । इत्यस्य उदाहरणानि पश्यामः । वाल्मीकिरामायणस्य बालकाण्डे इत्यस्य नैकान्युदाहरणानि प्राप्यन्ते । यथा–

**"सर्वे नराश्च नार्यश्च धर्मशीलाः सुसंयताः ।**

**उदिताः शीलवृत्ताभ्यां महर्षय इवामलाः ॥[४१५]"**

तस्मिन् काले जनाः धर्मज्ञा आसन् । अतः तेषां सर्वविधव्यवहारः धर्माधारितमेवासीत् । अयं श्रीरामस्य एव प्रभावो यत् तेषां शासने धर्मस्य कुत्रापि ह्रासः न जातः । इतोऽपि एकं सुन्दरम् उदाहरणम् अस्ति अयोध्यावासीनाम्–

**"कामी वा न कदर्यो वा नृशंसः पुरुषः क्वचित् ।**

**द्रष्टु शक्यमयोध्यायां नाविद्वान्न न च नास्तिकः ॥**

**रामायणस्य अयमेवमूलसन्देशः** यत् रामादिवत् वर्तितव्यं, न रावणादिवत् । रामायणं पठामश्चेत् प्रतीयते यत् रामस्य चिन्ताऽधिक्यं राज्याभिषेकापेक्षया पितुराज्ञापालनेऽस्ति । दशरथोऽपि कैकेय्यै दत्तवचनात् विमुखो भवितुमर्हति स्म ।

---

[४१४] दक्षस्मृतिः २/३०–३१

[४१५]. वाल्मीकिरामायणम् १/६/९

कौशल्यया न तु दशरथस्य आलोचनां कृतवती न तु कैकेय्याः भर्त्स्ना, तथा नैतदाधारेण रामं वनगमनात् रोधितुं शक्तवती । लक्ष्मणस्य संयमः, हनुमतः बलं, भरतस्य विवेकादितत्त्वानि रामायणस्य समाजस्य प्रदेयानि सन्ति । वस्तुतः अयोध्या तथा लङ्का द्वे विभिन्नसंस्कृत्यौ स्तः । अनयोः द्वयोः सङ्घर्षभूमेर्नाम रामायणम् । किन्तु एतद् न विस्मर्तव्यं यत् लङ्कायामपि विभीषणसुषेणादिव्यक्तित्वानि सन्ति; तथा अयोध्यायामपि कैकेयीमन्थरादिनि पात्राणि विद्यमानानि सन्ति । अतः मूल्यानां संस्कृतीनां च कृते भौगोलिकी सीमानिर्धारणम् असम्यगस्ति ।

रामरावणयोर्मध्ये प्रकाशान्धकारयोः सङ्घर्षः अस्ति । यत्र रामः मर्यादायाः तथा चारित्र्यस्य परिपालकः मुल्यवादी अस्ति, तत्रैव रावणः 'स्व' तथा "स्वकीय" इत्येताभ्यां परं किमपि अदर्शमाणो भोगवादी अस्ति । विषयेऽस्मिन् रामस्य भणितिः–

**"निर्मयादस्तु पुरुषः पापाचारः समन्वितः ।**

**मानं न लभते सत्सु भिन्नचारित्र दर्शनः ॥[४१६]"**

अर्थात् मर्यादाच्युतस्था पापाचारे आकण्ठः मनुष्यः सत्पुरुषेसु सन्मानितः न भवति । रामस्य दृष्टौ तदेवादर्शाचरणं विद्यते यत् मूल्यवादीव्यापकसमाजेन अनुमोदितं स्यात् । श्रीराम उपदेशस्य वग्जालापेक्षया चारित्र्यम् अर्थात् प्रत्यक्षसाध्वाचरणस्य पक्षपाती अस्ति । यथा–

**"चारित्रमेव व्याख्याति शुचिं वा यदि वाऽशुचिम् ।"**

अयमभिप्रायः यत् मनुष्यस्य आचरणमेव तस्य पावन–अपावनान्तरिकव्यक्तित्वस्य निदर्शको भवति । किन्तु एतद्विपरितं त्रैलोक्यवसुभोक्तारावणस्य दर्शनमस्ति । यथा–

**"पिब विहर रमस्व भुङ्क्ष्व भोगान् ।[४१७]"**

---

[४१६]. वाल्मीकिरामायणम् २/१०९/३

अर्थात् मदिरापानाधिक्यं कुरू, रमणिभिः विहरतु, रमतु, तथा च जीवनस्य विविधभोगान् आकण्ठं आस्वादयतु ।

इत्थं सङ्घर्षस्य निमित्तकारणं प्रत्यक्षतः सीताहरणम् अवश्यमस्ति, किन्तु वास्तविकसङ्घर्षस्तु भोग–त्याग, अन्याय–न्याय, पाप–पुण्यादिषु मुल्येष्वस्ति ।

रामायणस्य मानवेभ्य अयमेव सन्देशः –

**“कर्मभूमिमिमां प्राप्य कर्तव्यं कर्म यच्छुभम् ।[४१८]”**

अर्थात् इमां कर्मभूमिं प्राप्य प्रत्येकमानवस्य कर्तव्यं भवति यत् स आत्म–कल्याणाय तथा लोकोत्कर्षाय च यत्कार्यं स्यात्, तत् निष्पादयेत् ।

शोधप्रबन्धस्य प्रान्ते महर्षिवाल्मीकेः वचः संस्मर्य विरमामि–

**“धर्मो हि परमो लोके धर्मे सत्यं प्रतिष्ठितम् ।[४१९]”**

**....अस्तु.....**

[४१७]. वाल्मीकिरामायणम् ५/२०/३५
[४१८]. वाल्मीकिरामायणम् २/२०५/२८
[४१९]. वाल्मीकिरामायणम् २/२१/४१

# ॥ उपसंहारम् ॥

विश्वस्य सकलसंस्कृतिषु भारतस्य हिन्दुसंस्कृतिः विशिष्टस्थानमावहते । मानवजीवनस्य कैवल्यप्राप्तेः मूलाधाररुपत्वाद् भारतं विश्वस्य अध्यात्मगुरुरुपेण स्थापयति । बोधयति च संसारस्य सकलमानवान् दिशानिर्देशः ।

मनुष्याणाम् आत्यन्तिकदुःखत्रयनिवृतिरुपाऽपवर्गप्राप्तये धर्माऽर्थकामाः प्रकीर्तिताः । तत्र धर्मेणैव अर्थकामौ अधिगृहीतव्यौ । धर्मेणैव मोक्षावाप्तिर्भवति । अतश्च धर्ममूलेयं संस्कृतिः भारतस्य । धर्मस्य स्वरुपावबोधाय वेदा–ऽऽरण्यक–ब्राह्मणोपनिषत्प्रभृतयः ग्रन्थाः । किन्तु विशिष्टबुद्धिरहिताः साधारणजनाः तत्तत्त्वमवगन्तुं न पारयन्तीति धिया महर्षिव्यासवाल्मीकी रामायणमहाभारतं निर्ममौ । तत्र रामायणमिदं लोकादृता प्रधानं धर्मकृतिः ।

**“प्रधानेषु कृतो यत्नः फलवान् भवति”** तथा च **“एका क्रिया द्व्यर्थकरी पसिद्धा आम्राश्च सिक्ता पितरश्च तृप्ताः”** इति मनसिकृत्य **“रामायणे धर्मतत्त्वविमर्शः”** इति शोधप्रबन्धो विहितः ।

शोधकार्येण सह प्रबन्धस्यास्य विभजने षडाध्यायाः परिकीर्तिताः सन्ति । तेषु प्रथमोऽध्यायः परिचयात्मको वर्तते । तत्र संस्कृतवाङ्मये वाल्मीकिरामायणस्य महत्त्वं तथा रामायनगतविषयाणां सामान्यतया निर्देशस्तथा रामायणस्य इतिवृत्तमुद्भवस्वरुपञ्चोपनिबद्धम् । तदनु प्रसङ्गसङ्गतिमभिलक्ष्य तत्त्वविमर्शात्मको द्वितीयोऽध्यायः प्रपञ्चितः । तत्र रामायणनिष्ठकाव्यतत्त्वं–व्याकरणतत्त्वं–तथा

दार्शनिकतत्त्वस्य विमर्शणं वरीवर्तते । अनेन विवेचनेन रामायणस्य दर्शनग्रन्थपरत्वं सुतरां सिद्धयति । अध्यास्य प्रान्ते अधिरामायणं वर्णितधर्मतत्त्वस्य दिङ्निर्देशेण चर्चा परिकीर्तिता । शोधशीर्षकघटकधर्मशब्दस्य अभिप्रायः–परिभाषा–भेदपभेदानां विवेचनं तृतीयोऽध्याये विस्तृतरुपेण समपादि । चतुर्थेऽध्याये संस्कृतवाङ्मयनिष्ठधर्मतत्त्वस्य आलोडनं प्रत्यपादि । तत्र निखिलप्रमाणमूलकवेदेषु धर्मतत्त्वं, वेदोत्तरकाले धर्मस्य अवस्थितिः, धर्मस्य ह्रासविकासयोः क्रमेण चर्चोपनिबद्धा । श्रुति–स्मृतिग्रन्था अपि धर्मप्रतिपादकाः, अतः तद्गत–धर्मतत्त्वस्वरुपवर्णनञ्च प्रसङ्गसङ्गत्या विशदीकृतवान् । तत्रभवान् महर्षिव्यासविनिर्मितानि अष्टादशपुराणान्यपि धर्ममूलकान्येव । प्रसिद्धा चेयं भणितिः– **"अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।**

**परोपकारः पुण्याय पापाय परपीडनम् ॥"**

अस्मिञ्जगति चेतनाऽचेतनपदार्थानां यथानियमम् उपभोगो भवेत् तथा उपजिव्योऽपजीवकयोरुभयोरपि रक्षणं परिवर्धनञ्च भवेद् इत्येव कदाचित् लौकिकं प्रात्यक्षिकञ्च कारणम् ।

कस्यापि नियमस्य ज्ञानान्तरं प्रायोगिकस्थलस्य दर्शनमावश्यकम् इति मनसिकृत्य पञ्चमेऽध्याये धर्ममीमांसा प्रतिपादिता । अत्र धर्मस्य विविधक्षेत्राणि प्रतिपादितानि । तत्र कर्मविषयको धर्मः, क्रियापरको धर्मः, सामाजिको धर्मः प्रभृतयः । अध्यास्य प्रान्ते तुलनात्मकमध्ययनमपि प्राद्राक्षित् ।

समग्रशोधप्रबन्धस्य साररुपेऽस्मिन् षष्ठेऽध्याये रामायणे धर्मतत्त्वाध्ययनमिति विशदीकृतम् । अत्र रामायणे धर्मस्वरूपमिति प्रकरणमवलम्ब्य वाल्मीकेः धर्मविषयिकी अवधारणा विलिखिता । तथा महता प्रयत्नेन रामायणगत धर्मसन्दर्भाणां सन्निवेश मयाऽकारि । प्रबन्धस्यास्य अवसाने वेद–रामायणयोः धर्मविषयिकी तुलना तथा स्मृति–रामायणयोः तुला प्रदर्शिता । प्रबन्धस्य प्रान्ते वाल्मीकेर्वचः संस्मर्य विरमामि–

**"सत्यमेवेश्वरो लोके सत्ये धर्मः सदाश्रितः।**

**सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् ॥[४१०]"**

[४१०]. वाल्मीकिरामायणम् २/१०९/१३

# सन्दर्भग्रन्थसूची


| क्रमः | ग्रन्थनाम | कर्ता/व्याख्याकारः/सम्पादकः | प्रकाशनम् |
|---|---|---|---|
| १ | श्रीमद्वाल्मीकीयरामायणम् | मूलमात्रम् | गीताप्रेस, गोरखपुर |
| २ | वाल्मीकिरामायणः | शिवबालकराय | मोतीलाल बनारसीदास |
| ३ | पातञ्जलयोगसूत्रम् | पतञ्जलि | गीताप्रेस, गोरखपुर |
| ४ | वाल्मीकिरामायण | परमहंस मिश्र | मोतीलाल बनारसीदास |
| ५ | वाल्मीकिविमर्शः | डॉ.राधावल्लभ त्रिपाठी | संस्कृत परिषद्,सागर |
| ६ | रामचरितमानस | तुलसीदास | गीताप्रेस,गोरखपुर |
| ७ | वैदिकधर्म एवं दर्शन | मू.ले.कीथ | मोतीलाल बनारसीदास |
| ८ | अष्टादशपुराणपरिचयः | डॉ.श्रीकृष्णमणित्रिपाठी | चौखम्भासरस्वतीभवन , वाराणसी, १९८० |
| ९ | संस्कृतसाहित्येतिहासः | लोकमणि दाहाल | चौ.संस्कृत पुस्तकालय,वाराणसी |
| १० | प्राचीन भारतीय साहित्य की सांस्कृतिक भूमिका | रामजी उपाध्याय | लोकभारती प्रकाशन, इलाहाबाद |
| ११ | श्रीमद्भागवत् पुराणम् | गीताप्रेस | गीताप्रेस,गोरखपुर |
| १२ | संस्कृतसाहित्यविमर्शः | द्विजेन्द्रनाथ शास्त्री | मोतीलाल बनारसीदास |
| १३ | साहित्यदर्पणः | शालीग्राम शास्त्री | मोतीलाल बनारसीदास |
| १४ | संक्षिप्तवाल्मीकीय रामायणाङ्क |  | गीताप्रेस, गोरखपुर १९४३ |
| १५ | वाल्मीकिरामायणम् | आङ्लभाषा | ओरिएन्टल इन्स्टिट्युट्, वडोदरा |
| १६ | आचारशास्त्र के मूल सिद्धान्त | अनिरुद्ध झा | मोतीलाल बनारसीदास |
| १७ | श्वेताश्वेतरोपनिषद् | मूलमात्रम् | गीताप्रेस, गोरखपुर |

| | | | |
|---|---|---|---|
| १८ | माण्डूक्योपनिषद् | मूलमात्रम् | गीताप्रेस, गोरखपुर |
| १९ | तैतिरीय उपनिषद् | मूलमात्रम् | गीताप्रेस, गोरखपुर |
| २० | रामायणमीमांसा | स्वामीकरपात्रीजी | |
| २१ | रामायणकालीन संस्कृति | श्रीशान्तिकुमार नानूराम व्यास | |
| २२ | वाल्मीकिरामायण का दार्शनिक विवेचन | डॉ.सविता भट्ट | ज्योति इन्टरप्राइजिज, दिल्ली |
| २३ | रामकथा | कामिल बूल्के | |
| २४ | संक्षेपरामायणम् | वेम्पटि कुटुम्बशास्त्री | राष्ट्रियसंस्कृतसंस्थानम् |
| २५ | भारतीयसंस्कृति में आनन्दरामायण | डॉ.रामपाल शुक्लः | डी.ए.वी.पब्लीशर्श, जयपुर |
| २६ | | | |
| २७ | वाल्मीकि के राम | डॉ.अश्विन निरञ्जन | चिन्तन प्रकाशन,कानपुर |
| २८ | धर्मशास्त्र का इतिहास | डॉ.पाण्डुरंग वामन काणे | उत्तरप्रदेश हिन्दी संस्थान |
| २९ | संस्कृत साहित्य का इतिहास | आचार्य बलदेव उपाध्याय् | शारदा निकेतन, वाराणसी |
| ३० | संस्कृतसाहित्य का इतिहास | वाचस्पति गैरोला | चौखम्भा विद्याभवन, वाराणसी |
| ३१ | धर्मशास्त्राङ्क | | गीताप्रेस, गोरखपुर |
| ३२ | पुराण–विमर्श | पं.श्रीबलदेव उपाध्याय | |
| ३३ | संस्कृतसाहित्य का इतिहास | डॉ.मंगलदेव शास्त्री | मोतीलाल बनारसीदास |
| ३४ | हिन्दू धर्म कोश | राजबलि पाण्डेय | |
| ३५ | अथर्ववेदसंहिता | श्रीरामशर्मा | मोतीलाल बनारसीदास |

| | | | |
|---|---|---|---|
| ३६ | उपनिषद् | श्रीरामशर्मा | मोतीलाल बनारसीदास |
| ३७ | उपनिषद् संग्रह | जगदीश शास्त्री | मोतीलाल बनारसीदास |
| ३८ | गौतम धर्मसूत्र | | चौखम्भा , वाराणसी |
| ३९ | तैत्तिरीयसंहिता | महादेव शास्त्री | मोतीलाल बनारसीदास |
| ४० | आपस्तम्ब धर्मसूत्र | धर्मशास्त्रांक | गीताप्रेस,गोरखपुर |
| ४१ | वशिष्ठ धर्मसुत्र | धर्मशास्त्रांक | गीताप्रेस,गोरखपुर |
| ४२ | लिङ्गपुराणम् | जगदीशलाल शर्मा | मोतीलाल बनारसीदास |
| ४३ | लघुसिद्धान्तकौमुदी | मूलमात्रम् | गीताप्रेस,गोरखपुर |
| ४४ | महाकवि वाल्मीकि | रसदर्शना०परिचय | संस्कृत सेवा समिति |
| ४५ | बौधायन धर्मसूत्र | | चौखम्भा , वाराणसी |
| ४६ | सत्यार्थप्रकाश | महर्षि दयानन्द | |
| ४७ | मनुस्मृति | धर्मशास्त्रांक | गीताप्रेस,गोरखपुर |
| ४८ | याज्ञवल्क्यस्मृति | उमेशचन्द्र पाण्डेय | चौखम्भा , वाराणसी |
| ४९ | व्यासस्मृति | धर्मशास्त्रांक | गीताप्रेस,गोरखपुर |
| ५० | विष्णुस्मृति | धर्मशास्त्रांक | गीताप्रेस,गोरखपुर |
| ५१ | आपस्तम्बस्मृति | धर्मशास्त्रांक | गीताप्रेस,गोरखपुर |
| ५२ | वशिष्ठस्मृति | धर्मशास्त्रांक | गीताप्रेस,गोरखपुर |
| ५३ | पराशरस्मृति | धर्मशास्त्रांक | गीताप्रेस,गोरखपुर |
| ५४ | अत्रिस्मृति | धर्मशास्त्रांक | गीताप्रेस,गोरखपुर |
| ५५ | शङ्खस्मृति | धर्मशास्त्रांक | गीताप्रेस,गोरखपुर |
| ५६ | दक्षस्मृति | धर्मशास्त्रांक | गीताप्रेस,गोरखपुर |
| ५७ | शातातपस्मृति | धर्मशास्त्रांक | गीताप्रेस,गोरखपुर |
| ५९ | यमस्मृति | धर्मशास्त्रांक | गीताप्रेस,गोरखपुर |
| ६० | चरकसंहिता | | मोतीलाल बनारसीदास |
| ६१ | वैद्यकियसुभाषितानि | डॉ.राम सुन्दर राव | चौखम्भा, वाराणसी |

| | | | |
|---|---|---|---|
| ६२ | वैदिकसाहित्य में धर्मदर्शन | डॉ.बालकृष्ण शर्मा | शोधनिबन्धसारांश–२००४ |
| ६३ | वेदों मे धार्मिक तथा नैतिक आदर्श | डॉ.सुचित्रा मित्रा | शोधनिबन्धसारांश–२००४ |
| ६४ | वाल्मीकिरामायणे वैदिकप्रभावः | डॉ.मिथिलाप्रसादत्रिपाठी | शोधनिबन्धसारांश–२००४ |
| ६५ | हिन्दु–संस्कृति अंक | | गीताप्रेस,गोरखपुर |
| ६६ | श्री वाल्मीकि रामायण–दर्शन | रासविहारी पुरुषोत्तमदास जगदीश शाह | श्रीमद्भगद्गीता पाठशाला–१९५३ |
| ६७ | धर्म युग | कुबेरनाथ राय | |
| ६८ | शब्दकोशः | | कमल प्रकाशन |
| ६९ | श्रीमद्भगवद्गीता | प्रभुपाद | इस्कोन प्रकाशन |
| ७० | रूपचन्द्रिका | ब्रह्मानन्द त्रिपाठी | चौखम्भा, वाराणसी |
| ७१ | वाल्मीकि रामकथाओ | रश्मिकान्त महेता | सरस्वती पुस्तकभंडार |
| ७२ | अग्निपुराणम् | आचार्यशिवप्रसाद द्विवेदी | चौखम्भा सं. संस्थान,दिल्ली२००४ |
| ७३ | आपस्तम्बशुल्बसूत्रम् | सत्यप्रकाश | प्रा.वै.अनु.संस्थान, नईदिल्ली१९६८ |
| ७४ | कादम्बरी | काशीनाथ परब | निर्णयसागर प्रेस, मुम्बई २००५ |
| ७५ | छान्दोग्योपनिषद् | | गीताप्रेस,गोरखपुर २०११ |
| ७६ | पौराणिकधर्म एवं समाज | सिद्धेश्वरी एन.राय | पञ्चनदप्रकाशन, इलाहाबाद१९६८ |
| ७७ | बृहत् संहिता | अच्युतानन्द झा | चौखम्बा विद्याभवन |

| | | | |
|---|---|---|---|
| ७८ | पुराण–परिशीलन | पं.गिरिधर शर्मा | बिहार राष्ट्रभाषा परिषद् पटना,१९७७ |
| ७९ | प्राचीन चरित्र कोश | सिद्धेश्वर शास्त्री चित्राव | प्रा.चरित्र कोश मंडल,पूना १९६४ |
| ८० | मार्कण्डेय पुराणम् | प्रो.एम.एल.वाडेकर | ओरिएन्टल इन्स्टिट्युट् वडोदरा |
| ८१ | महाभारतम् | | गीताप्रेस,गोरखपुर |
| ८२ | महाभारतम् | एम.एन.दत्त | परिमल पब्लिकेशन्स दिल्ली२००४ |
| ८३ | मेघदूतम् | | सनिष्ट प्रकाशन |
| ८४ | शुक्रनीतिः | | जे.पी.पब्लिशींग हाउस,दिल्ली२००५ |
| ८५ | शतपथब्राह्मणम् | प्रो.बिनोय राय/डॉ.क्रिष्णलाल | इस्टर्न बुक लिंकर्स दिल्ली २००९ |
| ८६ | सामवेदसंहिता | मोतीलाल घोडा | सयाजीराव प्रेस वडोदरा |
| ८७ | शुक्लयजुर्वेद | स्वामीमहेश्वरानन्द गिरी | गंगाशंकरव्यास,माटुंगा |
| ८८ | सामवेदसंहिता | रविप्रकाश आर्य | परिमल पब्लिकेशन्स, दिल्ली |
| ८९ | स्कन्दपुराण | शान्तिलाल ठक्कर | सस्तु साहित्य वर्धक कार्यालय,मुम्बई१९७४ |
| ९० | हिन्दी–संस्कृत शब्दकोष | शास्त्री देवनाथन | नीता प्रकाशन, नईदिल्ली२०११ |
| ९१ | शिशुपालवधम् | माघ | ध ग्रेसीयस परमिशन, कश्मीर१९३५ |

| | | | |
|---|---|---|---|
| ९२ | सुन्दरकाण्डम् | | गीताप्रेस,गोरखपुर |
| ९३ | रामभक्ति अंक | | गीताप्रेस,गोरखपुर |
| ९४ | संस्कृत रामकथाओ | | सरस्वतीपुस्तकभण्डार |
| ९५ | लघुसिद्धन्तकौमुदी | वसन्त भट्ट | सरस्वतीपुस्तकभण्डार |
| ९६ | जीवनचर्या अंक | | गीताप्रेस, गोरखपुर |
| ९७ | वैदिकवाङ्मय का इतिहास | पं.भगवद्दत्त/सत्यश्रवा | प्रणव प्रकाशन, नईदिल्ली |
| ९८ | हिन्दुसंस्कार | राजबलि पाण्डेय | काशीनागरिक प्रचारिणी सभा, |
| ९९ | कौटिल्य अर्थशास्त्र | | चौखम्बा,वाराणसी |
| १०० | संस्कृति के चार अध्याय | रामधारीसिंह दिनकर | बिहार राष्ट्रभाषा समिति |
| १०१ | संस्कार अंक | | गीताप्रेस,गोरखपुर |
| १०२ | भारतीय संस्कृति | वासुदेवशरण अग्रवाल | बिहार राष्ट्रभाषा समिति |
| १०३ | पतञ्जलिकालीन भारत | वासुदेवशरण अग्रवाल | बिहार राष्ट्रभाषा समिति |
| १०४ | मध्य एशिया क इतिहास | राहुल सांकृत्यायन | |